
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरू कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M2398 विषय नितिशास्त्र

नाव लब्धप्रणाश

लेखक/लिपीकार —

पृठ 136 काळ .... पूर्ण/~~अपूर्ण~~

नव्य न्याय

१

॥श्रीगणेशाय नमः॥ अनुमितिं प्रति पर्वतीयधूमव्यापको वह्निरित्याकारकपरामर्श एव हेतुः॥ ननु वह्निव्याप्य
धूमवान् पर्वत इत्याकारकः तद्धेतुत्वे कारणतावच्छेदककोटौ व्यापकसामानाधिकरण्यरूपव्याप्तिघटकीभूत
सामानाधिकरण्यादिपदार्थविषयतानिवेशाधिक्येन गौरवादिति तु व्यापकताज्ञानकारणतावादिन॥ अथैतन्मते
यत्र पर्वतीयधूमसमानाधिकरणाभावप्रतियोगितावच्छेदकतात्वावच्छिन्नाभावघटितपर्वतीयधूमत्वावच्छिन्न
निरूपितव्यापकतानवह्नेर्गृहीता अपि तु धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वसामान्याभावघटि
तपर्वतीयं धूमसामान्यव्यापकत्वेन तत्रोपदर्शितपरामर्शासंभवेनानुमित्यपलायप्रसंग इति चेन्न न हि व्यापक
ताज्ञानहेतुत्ववादिना पक्षीयहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वावच्छिन्नाभावावगाहिज्ञानस्य हेतुता
स्वीक्रियते येनोक्तानुपपत्तिः स्यात्॥ अपि तु हेतुत्वं शेउपलक्षणविधया पक्षीयत्वावगाहिनो हेतुसमानाधिकरणाभा
वप्रतियोगितानवच्छेदकत्वावगाहिज्ञानस्यैवेति न दोषः॥ अथैतन्मते पर्वतो वह्निसमानाधिकरणाभाववानित्याका
रकोपनीतभानस्थले बोधादिकं प्रति पर्वतादिपक्षकवह्न्यनुमितिसामग्र्याः प्रतिबंधकत्वकल्पनाधिक्याद्गौरवम्॥
व्याप्तिविशिष्टहेतुप्रकारकपक्षविशेष्यकपरामर्शहेतुतामते तु तादृशोपनीतभानादौ साध्यसामानाधिक

शिव
१

रण्यविशिष्टहेतुमत्तावगाहित्वादृशपरामर्शस्यबाधमुद्रयाप्रतिबंधकतायाःक्लृप्तत्वात्॥ ततएवतादृशानुमितिसा
मग्रीदृशायांतदनुत्पादोपपत्तेःसामग्रीप्रतिबंधकतायास्तत्रकल्पनादितिचेदस्तुतादृशालोकस्यैवंतथापिव्याप्तिवि
शिष्टहेतुप्रकारकक्लृप्तपरामर्शहेतुतामतेआलोकव्यापकवन्हिसमानाधिकरणधूमवान्पर्वतइत्यादिज्ञा
नादनुमित्यापत्तिवारणायतादृशज्ञानसत्वेभिन्नविषयकप्रत्यक्षाद्युपपत्तयेचपरामर्शहेतुतायांसामग्रीप्रति
बंधकतायांचविशिष्यहेतुतावच्छेदकनिवेशस्यावश्यकतयाहेतुतावच्छेदकभेदेनतद्बाहुल्यप्रयुक्तगौरवं अ
स्माकंतुसर्वत्रहेतुविषयतानांकिंचिद्धर्मावच्छिन्नविषयतात्वेनैवनिवेशात्तन्नहेतुतावच्छेदकभेदेनकार्यकार
णभाववाहुल्यमिति॥ अत्रोच्यते॥ व्यापकसामानाधिकरण्यरूपव्याप्तिविशिष्टहेतुमत्तापरामर्शस्यचेत्का
रणतास्माभिरुपगम्यतेतदैवोपदर्शितगौरवावसरः॥ वयंतुसाध्याभाववदवृत्तित्वविशिष्टहेतुमत्तापराम
र्शत्वेनैवहेतुतामुररीकरिष्यामः॥ नचतत्रकिमपिगौरवंसंभवति॥ प्रकृतव्यापकत्वापेक्षयासाध्याभाव
वदवृत्तित्वस्यलघुशरीरतयालाघवमेवेति॥ वस्तुतस्तु॥ अभावप्रत्यक्षेयोयांशोधर्मःप्रतियोगितावच्छेदकत्व द
मवगाहतेभावदृशविशिष्टधर्मप्रप्रतियोगिनिष्ठविशेषणतायामवच्छेदकतयातत्रभासतेशुद्धघटत्वादौप्र

प्रतियोगिता

॥३॥ प्रतियोगितावच्छेदकत्वनिष्ठाभाव प्रतियोगितावच्छेदकत्वावगाहि पर्वतीयधूमसमानाधिकरणाभाव प्रति
योगितावच्छेदकत्वावच्छिन्नविशेषणताकज्ञानमना
[illegible]मिति ॥३॥

२

तियोगितावच्छेदकत्वनिष्ठाभावप्रतियोगितावच्छेदकत्वावगाहिपर्वतीयधूमसमानाधिकरणाभावप्रतियोगिता
वच्छेदकत्वत्वावच्छिन्नविशेषणताकज्ञानप्रमेवासिद्धिप्रतियोगितावच्छेदकत्वावगाहिमो नीलघटत्वावच्छिन्न
प्रतियोगिताकाभावप्रत्यक्षस्याप्रामाणिकत्वात् ॥ शुद्धधूमसमानाधिकरणाभाववह्निपर्वतीयत्वघटितताद्दृशा
धर्मनिष्ठप्रतियोगितावच्छेदकत्वावगाहिपरामर्शस्यैव हेतुत्वं स्वीक्रियते लघीयः दर्शितस्य फले अनुमित्यपलापो
दुर्वार एवेति यत्र विशिष्टहेतुमत्रापरामर्श एव हेतुरिति साधीयः ॥ तथापि आभावो न साधीयः इत्याकार
काभावत्वावच्छिन्नधर्मिकप्रतियोगितासंबंधावच्छिन्नप्रतियोगिताकसाध्याभाववत्त्वावगाहिनिर्णयदशायां साध्या
भाववद्वृत्तिमान्यपक्षइत्येतादृशपरामर्शासंभवात् अनुमित्यनुत्पत्तिर्दुर्वार एवेति चेन्न निष्पत एव तत्रानुमि
तिः एवं विशिष्टसत्तायाः सत्तान्तिरेकित्वयादृशात्वाभाववद्दृत्तित्वविरहात् ॥ न हेतुकं द्रव्यत्वादि निरूपि
तव्याप्तिज्ञानस्य प्रमात्वविरहेपि तत्क्षतिः ॥ तत्र भ्रमात्मकपरामर्शादेवानुमित्यभ्युपगमात् ॥ एवं जातिमा
न् सत्त्वादित्यादावपि भ्रमात्मकपरामर्शादेपि अनुमितिरुपपत्तो अतस्तत्र साध्याभाववद्वृत्तिसामान्यादेहेतु
तावच्छेदकीभूतसमवायादिसंबंधेन वृत्तेरप्रघाऽव्योम्नेरप्रसिद्धिवपि नपि न क्षति ॥ अवृत्तिगगनादौसा

शिव

२

ध्याभाववदृत्तित्वरूपव्याप्तिसत्वेपिविशेषदर्शिनोपक्षधर्मताज्ञानविरहादेवनांनुमितिः परिगगनम
वृत्तिरित्याकारकविशेषदर्शनकालेपक्षविशेष्यकतादृशगगनादिप्रकारकस्यसाध्याभाववदृत्तिगग
नवान्यवृत्तिरित्याकारकपरामर्शस्योत्पत्तौबाधकाभावः अवृत्तित्वग्रहस्यवृत्तित्वग्रहंप्रत्येवग्राह्याभा
वावगाहितयाविरोधित्वात्॥तादृशपरामर्शंप्रतितद्विरोधित्वेप्रमाणाभावादितिविभाव्यतेदानीं अनु
मित्यभावस्यप्रामाणि॥कत्वेसाध्याभाववदृत्तित्वविशिष्टवृत्तिमत्वंव्याप्तिरित्येवानुसरणीयम्॥ताद
शव्याप्तिग्रहेचावृत्तित्वग्रहस्यविरोधित्वेनकस्यापिविप्रतिपत्तिः॥वस्तुतस्तु॥तादृशग्रहंप्रतितद्धर्मिकावृत्तित्वज्ञा
नस्यापिविरोधित्वं अनेकग्रंथकारसंमतंसयत्निकंचतत्कल्पनेचपर्वतोवह्निमान्इत्याकारकानुमितौवह्निरवृ
त्तिरित्याकारकविशेषणतावच्छेदकप्रकारकनिर्णयोविघटितायाइच्छादिविशिष्टायाअवृत्तिवह्निमान्
इत्याकारकविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षादिसामग्र्याःप्रतिबंधकत्वाकल्पनेनलाघवात्॥ तथाचगग

नव्य·
३

नमहतीत्याकारकज्ञानकालेगगनादिप्रकारकज्ञानमपिनोत्पद्यतइतिवदंति॥ अत्रेदंचिंतयामः॥व्यापक
सामानाधिकरण्यस्यव्याप्तिज्ञानस्यैवानुमितिहेतुत्वंउचितम्॥तथासतितादृशज्ञानप्रतिवध्येअभावो
नहेतुसमानाधिकरणः प्रतियोगिताताभावीयाइत्याकारकोपनीतभानशाब्दबोधादौअनुमितिसामग्र्याः
प्रतिवंधकत्वाकल्पनेलाघवात्॥ अनुमितिसामग्रीकालेबाधमुद्रयातादृशज्ञानंप्रतिबंधकम्प्रतिवंधक
भावस्यव्यापकसामानाधिकरण्यनिर्णयस्यसत्त्वात अतएवतादृशोपनीतभानवारणोपपत्तेःसाध्या
भाववद्वृत्तित्वरूपव्याप्तिज्ञानस्यहेतुतामतेपितत्प्रतिवध्यीभूताभावोनतत्साध्यीयइत्याद्युपनीतभानादि
कंप्रतिअनुमितिसामग्र्याःप्रतिवंधकत्वाकल्पनेलाघवात्साम्यमितितुनवक्तव्यम्॥यतोगुरुशरी
रव्याप्तिज्ञानप्रतिवध्यानांलघुशरीरव्याप्तिप्रतिवध्यज्ञानापेक्षयाबहुविधतयागुरुशरीरव्याप्तिज्ञाने
हेतुतामतेअनेकविधज्ञानेषुअनुमितिसामग्रीप्रतिसामग्रीप्रतिवंधकतात्रुटिः॥लघुशरीरव्याप्ति

शिव
३

ज्ञानहेतुतामते स्वल्पस्थले तद्योतिकारणीभूतज्ञानविषयस्य शरीरगौरवं लाघवसंपादकमिति ॥ अथमा
स्तु व्याप्तेः शरीरगौरवप्रयुक्तगौरवं एवमपि व्यापकसामानाधिकरण्यरूपव्याप्तेर्हेतुतावच्छेदकघटित
तयाहेतुतावच्छेदकभेदेनपरामर्शहेतुताया मनुमितिसामग्रीप्रतिबंधकतायाश्चानंत्यप्रयुक्तगौरवं दुर्वार
मेवेति ॥ साध्याभाववद्वृत्तित्वरूपव्याप्तेश्च हेतुतावच्छेदकाघटिततया हेतुतावच्छेदकविषयताममनिवे
श्यवह्निव्याप्यधूमवानित्वह्निव्याप्यालोकवानित्याकारकबहुविधपरामर्शानांसाध्याभाववद्वृत्तित्वाव
च्छिन्नप्रकारताकनिर्णयत्वेनैकहेतुतायाम् एवसंभवात् ॥ नादृशव्याप्तिज्ञानहेतुतामतेहेतुतावच्छेदका
भेदेनपरामर्शहेतुताघभेदात् ॥ नचव्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानहेतुतामतेहेतुविषयिता
याविशिष्य धूमत्वावच्छिन्नविषयतात्वेननिवेशानएवनन्मतेहेतुतावच्छेदकभेदेनपरामर्शहेतुतावाहुल्य
म् ॥ तदेवतुकुतः सामान्यतोवच्छिन्नविषयतात्वेनहेतुताविषयतायानिवेशोपि उपपद्यतेरितिवाच्यमाहे

न व्य॰
४

तुविषयितायाविशिष्यधूमविषयतात्वेनानिवेशोआलोकव्यापकरंन्हिसमानाधिकरणधूमवानित्यादि
निर्णयवारणासंभवात्॥ तथातन्निवेशस्यावश्यकत्वादितिचेन्नहेतुतावच्छेदकंविशेष्यअविनिवेशस्यधूमा
लोकादिपरामर्शादिसाधारणस्यनिर्णयस्यदुर्वचतयासाध्याभाववद्वृत्तित्वरूपव्याप्तिज्ञानहेतुतामते
पिहेतुतावच्छेदकभेदेनपरामर्शादिहेतुत्वादिवाहुल्यमावश्यकम्॥ तथाहि॥ वन्हिव्याप्यप्रतियोगिता
–भावाप्रकारकत्वेसाध्याभाववद्वृत्तित्वरूपव्याप्तिज्ञानहेतुतामतेपिहेतुतावच्छेदकभेदेनपरामर्शा
दिहेतुत्वादिवाहुल्यमावश्यकम्॥ तथाहि॥ वन्हिव्याप्यप्रतियोगिताकाभावाप्रकारकत्वेसतिवन्हिव्याप्य
प्रकारकज्ञानत्वंननिरायित्वंवन्हिव्याप्यालोकाभाववान्पर्वतःपर्वतोवन्हिव्याप्यधूमवानिति॥ कारकांशि
कनिर्णयव्यावर्तनात्॥ नापिवन्हिव्याप्यत्वावच्छिन्नसामान्याभावप्रकारकत्वेसतितदवच्छिन्नप्रकारक
त्वंपर्वतोवह्निव्याप्यधूमवानलवेत्येनादृशसंशयस्यापितादृशसामान्याभावाप्रकारकत्वेनतथात्वप्रसं

शिव
४

गात्॥ तादृशसामान्याभावाप्रकारकत्वे सति शुद्धवह्निव्याप्यत्वावच्छिन्नप्रकारकत्वानवेशो च वन्हिव्याप्यधू
मवान्पर्वतः इत्यादिनिश्चयस्याप्यसंग्रहः॥ तादृशज्ञानीयधूमत्वावच्छिन्नव्याप्यप्रकारतायाः केवलवन्हि
व्याप्यत्वावच्छिन्नत्वविरहात्॥ न च तादृशनिर्णयफलानुरोधेन वन्हिव्याप्यवान्पर्वत इत्येतादृशनिर्णयसा
धारणी शुद्धव्याप्यत्वावच्छिन्नप्रकारतापि स्वीक्रियते॥ अतो न तदसंग्रह॥ वन्हिव्याप्यधूमवान्नवा पर्वत इत्या
दिसंशये च तादृशप्रकारतायाः कल्पकाभावान्नातिप्रसंगः॥ पर्वतेऽसंशये तादृश्यपि प्रकारता प्रामाणिकी
सतावद्वन्हिव्याप्यधूमवान्नवा पर्वतः पर्वतो वन्हिव्याप्यवान् इत्याकारकनिखिलनिर्णयेषु शुद्धव्याप्य
त्वावच्छिन्नप्रकारतायाः अनुभवविरुद्धत्वात् तत्स्वीकारे सर्वेषां तथाविधनिर्णयानां वन्हिव्याप्यधूमवान्वन्हि
व्याप्यवानित्युभयाकारकतापत्तेः॥ — तस्य वानुमितिजनकत्वेन केचिदपि विप्रतिपद्यन्त इति वा
च्यम्॥ वन्हिव्याप्यधूमवान्पर्वत इत्याकारकेऽवस्तु नस्तु॥ शुद्धवन्हिव्याप्यत्वावच्छिन्नप्रकारतायाः वन्हि

१४ एवं तत्र च नेकेपि विप्रतिपद्यन्ते इति वाच्यं
वन्हिव्याप्यधूमवानित्याकारके [illegible] ४

नव्य·
५

व्याप्यधूमवान्नवापर्वतइत्याकारकसंशयसाधारणएववारणायतत्रानुगतानियामककल्पनमावश्यकम्॥
एवंचोपदर्शितनिर्णयेषुतदभ्युपगमेतन्निर्णयव्यक्त्युपपादकानामनन्तानामननुगतहेतूनांतादृशावि
षयताप्रयो—क—कल्पनेगौरवम्॥ एवंविरोधसामग्रीकालीनस्यवह्निव्याप्यधूमत्वावच्छिन्न——
कारताकप्रत्यक्षंजायतामित्येतादृशेच्छाधीनवह्निव्याप्यधूमवानितिनिर्णयस्यतथाविधप्रकारता
शालित्वंनसंभवतितादृशप्रकारताशालिनोविरोधेवह्निव्याप्यत्वावच्छिन्नप्रकारताकप्रत्यक्षंजायतामित्येता
दृशेच्छाविरहविशिष्टविरोधिसामग्र्याःप्रतिबंधकत्वात्॥ नचपूर्वोपदर्शितनानामपिच्छानामुत्तेज
कत्वोपगमात्तादृशेच्छाकालीननिर्णयस्यशाब्दव्याप्यत्वावच्छिन्नप्रकारताशालित्वानुपपत्तिरिति
वाच्यम्॥ तथासतितादृशेच्छाभावैःसहवह्निव्याप्यत्वावच्छिन्नप्रकारकप्रत्यक्षंजायतामित्येतादृशेच्छा
याअभावस्यविशेषणविशेष्यभावेविनिगमनाविरहेणप्रतिबंधकतायाबाहुल्यप्रसंगात्तादृशेच्छाका

शिव
५

लेधूमत्वादिभासकसामग्र्यसत्वेविरोधिसामग्रीदशायांवन्हिव्याप्यवान्पर्वतइत्याद्याकारकज्ञानापत्तेश्च॥अ
प्यपर्वतत्वावछिन्नविशेष्यतानिरूपिताभावप्रकारतानिरूपितप्रतियोगितासंसर्गावछिन्नप्रकारतान्याप्या
पर्वतत्वावछिन्नविशेष्यतानिरूपितव्याप्यत्वावछिन्नप्रकारतानवछालिज्ञानत्वमेवपर्वतत्वावछिन्नधर्मि
कवन्हिव्याप्यवत्तानिर्णयत्वंप्रकारताचप्रकारभेदान्नप्रकारतावछेदकभेदाच्चभिद्यते॥ननुविशेष्यभेदा
द्विशेष्यतावछेदकभेदादपिमानाभावात्एवंचवन्हिव्याप्यधूमवान्नवापर्वतइत्यादिसंशयीयपर्वतविशे
ष्यतानिरूपितधूमप्रकारतायास्तादृशविशेष्यतानिरूपिताऽभावप्रकारतानिरूपितप्रतियोगितासं
सर्गावछिन्नप्रकारताभिन्नतयानातिप्रसंग॥वन्हिव्याप्यालोकवान्नवापर्वतःवन्हिव्याप्यधूमवान्पर्व
तइत्यादिसमूहालंबनेचतयाविधधूमप्रकारतायाअभावविशेष्यतानिरूपितालोकप्रकारताभिन्नत्वान्न
तत्संग्रहःयत्तुवन्हिव्याप्यधूमवान्नवापर्वतइत्यादिसंशयेपिपक्षविशेष्यतानिरूपितसंयोगादिसंसर्गा

नव्य
६

वच्छिन्नप्रकारताया अभाववविशेष्यतानिरूपितप्रतियोगितासंसर्गावच्छिन्नधूमप्रकारतातो भेद आवश्य
कत्वाद्भेदे तादृशज्ञानस्य पर्वतविशेष्यतानिरूपितप्रतियोगितासंसर्गावच्छिन्नधूमप्रकारताशालित्वा
त्तस्य च प्रतियोगितासंबंधावच्छिन्नप्रतियोगिताकधूमाभावप्रकारकपर्वतविशेष्यकपर्वतो न धूमीय
इत्याकारकबाधप्रतिबध्यत्वप्रसंगः तादृशधूमप्रकारताया एव तथाविधबाधादिप्रतिबध्यतावच्छेद
कत्वादिति ॥ तन्न ॥ पर्वतविशेष्यतानिरूपितप्रतियोगितासंसर्गावच्छिन्नधूमप्रकारकबुद्धित्वं न तथावि
धबाधादिप्रतिबध्यतावच्छेदकं ॥ अपितु पर्वतविशेष्यतानिरूपितप्रतियोगितानिष्ठसांसर्गिकविष
यतानिरूपितधूमप्रकारताकबुद्धित्वं ॥ उपदर्शितसंशये प्रतियोगितासंसर्गावच्छिन्नधूमप्रकताया
पर्वतनिष्ठविशेष्यतानिरूपितत्वेपि तादृशप्रकारतानिरूपितप्रतियोगित्वनिष्ठसांसर्गिकविषय
ताया न तन्निरूप्यत्वं ॥ अपितु संयोगीयसांसर्गिकविषयताया एवातो नास्योपदर्शितप्रतिबध्यताव

शिव
६

छेदकाक्रांतत्वमितितत्रप्रकारतैक्यंनिराबाधमेवेतिचेत्॥ मैवं॥ वन्हिव्याप्यधूमवान्वह्निव्याप्यधूमाभा
ववान्वापर्वतइत्येतादृशसंशयीयपर्वतत्वावछिन्नविशेष्यतानिरूपितधूमप्रकारताया:स्वावछेदकु
तासमनियतावछेदकताकाभावविशेष्यतानिरूपितधूमप्रकारत्वाभेदस्योक्तिसंभवेपिवन्हिव्याप्य
धूमवान्धूमाभाववान्वापर्वतइत्येतादृशसंशयीयपर्वतत्वावछिन्नविशेष्यतानिरूपितवन्हिव्याप्य
धूमत्वावछिन्नप्रकारताया अभावविशेष्यतानिरूपितशुद्धधूमत्वावछिन्नप्रकारत्वाभेदोक्तिर्नसं
भवति॥ तथासतिवन्हिव्याप्यधूमवान्वन्हिव्याप्यधूमाभाववान्वापर्वतइत्येतादृशसंशयानद्वैल
क्षण्यप्रसंगात्॥ तथाचैतादृशसंशयसाधारण्यं उपदर्शितनिर्णयत्वस्यदुर्वारमेव॥ अथतादृशसंश
येपिपर्वतविशेष्यतानिरूपितधूमादिप्रकारत्वाभावविशेष्यतानिरूपितधूमादिप्रकारतयोरभेद:
स्वीक्रियते॥ नचोपदर्शितसंशयानद्वैलक्षण्यप्रसंगः यतउपदर्शितसंशयेअभावविशेष्यतायाधू

न्य॰
७

मप्रकारतायावह्निव्याप्यत्वविशिष्टधूमत्वावछिन्नप्रकारतात्वेन निरूप्यनिरूपकभावः तादृशसंशयेच के
वलधूमत्वावछिन्नप्रकारतात्वेनेति प्रकारताविशेष्यतयोर्निरूप्यनिरूपकभाववैलक्षण्यादेवतद्वैलक्ष
ण्यमुपपत्स्यत इतिचेत्॥ एवंसति वन्हिव्याप्यनीलधूमाभाववान्पर्वतः वह्निव्याप्यधूमवांश्चेति एतादृशसमुच्च
यीयतयाविधधूमप्रकारतातो भेदोप्यसिद्धः तद्बीजस्यवन्हिव्याप्यनीलधूमवान्नवापर्वतइत्येतादृशसंश
यवैलक्षण्यस्यतद्भेदेपित्वदुक्तरीत्योपपादयितुं शक्यत्वात्॥ तथा च तादृशसमुच्चयादपि अनुमित्यनुदय
प्रसंग इति॥ यत्तु॥ संशये भावाभावोभयकोटिप्रकारतानिरूपितविशेष्यताएकैवसमुच्चये च प्रकारता
भेदेन विशेष्यताएवंच व्याप्यप्रतियोगिकाभावप्रकारत्वानिरूपितव्याप्यत्वावछिन्नप्रकारतानिरूपित
व्याप्यत्वावछिन्नप्रकारतानिरूपितपक्षतावछेदकावछिन्नविशेष्यताकज्ञानत्वमेवव्याप्यवत्तानिर्ण
यत्वमिति॥ तदप्यसत् वन्हिव्याप्यधूमवह्निव्याप्यालोकाभाववानिकमेकत्रइदयमितिरीत्यापक्षांशेऽव

शिव
७

गाहमानज्ञानस्य पितादृशधूमालोकाभावादिप्रकारतानिरूपितैकविशेष्यताकतया तादृशसंग्रहप्रसंगात्॥
तत्र विशेष्यताभेदे समूहालंबनात्मकाद्वह्निव्याप्यधूमवान्पर्वत आलोकाभाववांश्चेत्येतादृशज्ञानाद्व
ह्निव्याप्यधूमवान्पर्वत आलोकवानित्येतादृशस्यैकत्रद्वयमिति रीत्या जायमानस्य धूमालोकाभावादिप्रका
रकज्ञानस्याऽवैलक्षण्यप्रसंगात्॥ केचित्तु स्वावच्छेदकावच्छिन्नत्वस्वनिरूपकज्ञाननिरूपितत्वोभयसंबं
धेन पर्वतत्वावच्छिन्नविशेष्यतानिरूपिताऽभावविशेष्यतानिरूपितप्रतियोगिप्रकारताविशिष्टान्याया
पर्वतत्वावच्छिन्नविशेष्यतानिरूपितव्याप्यत्वावच्छिन्नप्रकारतातन्निरूपकज्ञानत्वमेव प्रकृते निर्ण
यत्वं वह्निव्याप्यालोकाभाववांश्च वह्निव्याप्यधूमवांश्च पर्वत इत्येतादृशज्ञानीयपक्षविशेष्यतानिरूपितव्या
प्यत्वावच्छिन्नप्रकारतानोपदर्शितोभयसंबंधेन कयाचिदपि तादृशाभावविशेष्यतानिरूपितप्रकार
तया विशिष्टतादृशज्ञानीयतथाविधालोकादिप्रकारतायास्तत्स्वावच्छिन्नत्वविरहात्॥ अन्यथा

नव्य.
१८

नीयतथाविधधूमत्वावच्छिन्नप्रकारतायाश्चस्वनिरूपकतानिरूपितत्वविरहात्॥ वह्निव्याप्यधूमवान्न
वापर्वतइत्यादिसंशयीयपक्षविशेष्यतानिरूपितधूमत्वावच्छिन्नप्रकारतात्वोभयसंबंधेनतादृशज्ञानीयाभावत्ववि
शेष्यतानिरूपितधूमत्वावच्छिन्नप्रकारताविशिष्टेःवातेनानतत्संग्रहः संबंधघटकदलद्वयप्रयोजनंतु
स्फुटमेवस्वावच्छेदकावच्छिन्नत्वंचस्वावच्छेदकताव्यापकावच्छेदकताकत्वं॥ अतोवह्निव्याप्यालोकाभाववा
न्वह्निव्याप्यधूमवांश्चपर्वतइत्येतादृशज्ञानीयपक्षविशेष्यतानिरूपितधूमत्वावच्छिन्नप्रकारतायास्तत्ता
नीयाभावविशेष्यतानिरूपितालोकनिष्ठप्रकारतावच्छेदकीभूतवह्निव्याप्यत्वावच्छिन्नत्वेपिनक्षतिः आ
लोकत्वसाधारणीतादृशप्रकारतावच्छेदकतांप्रतितादृशधूमप्रकारतावच्छेदकतायाअव्यापकत्वात्॥
स्वावच्छेदकताव्यापकावच्छेदकताकत्वघटितोभयसंबंधेनतत्रतद्वैशिष्ट्याभावादित्याहुः तदप्यसुंदरंत
थासतिजातिविशेषत्वादिनायत्राभावप्रतियोग्यंशेधूमत्वादिकंविशेषणतयाभातंतत्रवह्निव्याप्यधू

शिवं
१

मवान्यवर्ततो जातिविशेषवद्भावांश्रेलाकारकातादृशातानाद्तुमितेरनुद्पापतेः धूमत्वमात्रवृत्तिभ्भाव
विशेष्यतानिरूपिततज्ज्ञानीयप्रकारतावच्छेदकतांप्रतिपक्षविशेष्यतानिरूपितव्याप्यप्रकार्णरतायाः
आप्तकत्वात्॥ एवंज्ञानव्यक्तिभेदेनविशायताभेदस्याप्रामाणिकतयावह्निव्याप्यधूमवान्पर्वतइत्यादि
निश्चयीयव्याप्यप्रकारतायाःसंशयात्मकत्तानीयाभावविशेष्यतानिरूपितप्रकारताविशिष्टप्रकार
ताभिन्नत्वात्तादृशप्रकारताविशिष्टान्यव्याप्यप्रकारतैवासिद्धेतिनकिंचिदेतत्॥ केचित्तु॥ विरोधानवच्छी
न्नसंयोगादिनिष्ठसांसर्गिकविषयतानिरूपितावह्निव्याप्यत्वावच्छिन्नप्रकारताकत्ज्ञानत्वमेवनिश्चयत्वं
संशयीयसंयोगादिनिष्ठसांसर्गिकविषयतायाश्चविरोधावच्छिन्नत्वात्तद्व्यावृत्तिःनिश्चयेचक्वचिद
पिविरोधस्यसंसर्गकोटिनिविष्टतयाभानानुपगमान्नदोषःनचहेतुतावच्छेदकघटितस्यवह्निव्याप्य
धूमाभाववद्वृत्तित्वादिरूपविरोधस्यनिवेशेहेतुतावच्छेदकभेदेनपरामर्शकारणताभेदआ

वद्रूपकः वह्निव्याप्यत्वावच्छिन्नाभाववद्वृत्तित्वरूपविरोधानवच्छिन्नत्वमात्रस्यसंसर्गविषयतायांनिवेशो
चवह्निव्याप्यधूमवान्नवापर्वतइत्यादिसंशयवारणासंभवः तत्रवह्निव्याप्यत्वावच्छिन्नाभावस्याकोटितया
तदधिकरणावृत्तित्वरूपविरोधस्याभानादितिवाच्यं॥वह्निव्याप्यप्रतियोगिकाभावनिष्ठावच्छेदकतानिरू
पिताधेयत्वनिष्ठावच्छेदकतानिरूपिताभावनिष्ठावच्छेदकतात्वेननिखिलविरोधनिष्ठावच्छेदकताअनु
गम्यतद्दनिरूपकत्वस्यवसंसर्गविषयतायांनिवेशेनानुपपत्त्यभावात्॥नचैवंवह्निव्याप्यालोकाभावा
धिकरणावृत्तित्वावच्छिन्नसंयोगादिसंसर्गकधूमादिनिर्णयासंग्रहइतिवाच्यं॥धूमवत्तातानेआलोका
भाववद्वृत्तित्वादेः संसर्गतयाभानेमानाभावदृत्याहुः तदप्यसुंदरं।विरोधानवच्छिन्नसंयोगादिनिष्ठसां
सर्गिकविषयताकत्वस्यनिवेशेपियत्रसंशयेअभावकोटेरेवसंसर्गघटकतयाविरोधस्यभानंनतु
धूमादेः तादृशासंशयवारणासंभवात्॥नचसर्वत्रैवसंशयेउभयकोटिसंसर्गांशेएवविरोधोभासतइ

तिवाच्यं॥ विरोधावछिन्नसंयोगादिनिष्ठसंसर्गताकबुद्धिप्रतिबंधकविशिष्टसंयोगादिसंसर्गावछिन्न
प्रतियोगिताकधूमाभावावगाहिबाधादिकालीनसंशयेविरोधावछिन्नसंयोगादिनाधूमभावासंभ
वात्॥ नचतदानींसंशयएवनोत्पद्यतइतिवाच्यं॥ शुद्धसंयोगविरोधावछिन्नविशेषणताभ्यांधूमतद
भावकोटिकसंशयोत्पत्तौबाधकाभावात्॥ एवंविरोधावछिन्नसंयोगादिसंसर्गकप्रत्यक्षस्यशुद्ध
संयोगादिपर्याप्तसांसर्गिकविषयताशालित्वेपिबाधकाभावः॥ तादृशविषयतानियामकबाधाभावादि
घटितासामग्र्या अपितदव्यवहितप्राक्कालेसत्वात् एवंचसंशयस्यापिविरोधानवछिन्नसंयोगादि
निष्ठसांसर्गिकविषयताशालित्वात्॥ उपदर्शितप्रणाल्यापिसंशयावर्तनमशक्यं॥ नचशुद्धसंयोगादि
पर्याप्तसांसार्गिकविषयताशालिबुद्धिंप्रतिविरोधावछिन्नसंयोगादिसंसर्गकबुद्धिसामग्र्याःप्रतिबंध
कत्वंकल्पयित्वासंशयस्यतादृशविषयताशालित्वंवारणीयमितिवाच्यं॥ तथाविधानंतसामग्रीप्रति

नव्य॰
१०

बंधकताकल्पनेमहागौरवप्रसंगात्॥ एवंविरोधस्यसंसर्गतयाभानेपिभूयसांविवादःसंशयसमुच्चययोर्वैं
लक्षण्योपपत्तयेतत्रावश्यंविरोधावच्छिन्नत्वमंगीकरणीयं॥ तत्रविरोधानुपस्थितिकालीनसंशयेविरो
धस्यप्रकारतयाभानंनसंभवतिविशेषणज्ञानविरहात्॥ अतःपरिशेषाद्विरोधस्यसंसर्गतासिद्धि
रितिवाच्यं॥ विरोधानुपस्थितिदशायांसंशयस्याप्रामाणिकतयाविरोधस्यप्रकारतामुपगम्यैवसंश
यस्यसमुच्चयवैलक्षण्योपपादनसंभवात्॥ नचधूमालोकादिपरामर्शसाधारणनिश्चयत्वनिर्वचना
न्ययानुपपत्त्याविरोधस्यसंसर्गतयाभानंकल्पयिष्यामीतिवाच्यं॥ तन्निर्वचनासंभवेपिहेतुतावच्छेद
कभेदेनपरामर्शस्यहेतुतासंभवात्तदनुपपत्तेरकिंचित्करत्वात्॥ नचैवंकार्यकारणभावानंत्यप्रसंगे
नगौरवमितिलाघवात्तत्सिद्धिरितिवाच्यं कार्यकारणभावलाघवबलाद्विषयतासिद्धेःप्रतिबंदिग्र
स्तकवलितत्वादित्यलमसदावेशेन॥ एवंहेतुतावच्छेदकघटितधूमाभाववद्विशेष्यतानिरूपितधूमप्र

शिव
१०

कारत्वादिरूपनानाविधाप्रामाण्यग्रहाभावानां पृथक्पृथक् निवेशानुरोधेनापि धूमत्वालोकत्वादिभेदे
न परामर्शहेतुत्वादिभेद आवश्यकः निखिलपरामर्शानामेकहेतुत्वे तथाविधनिखिलाप्रामाण्यग्रहाभा
वानामेकत्र निवेशानप्रसंगात् आलोकाभाववद्द्विशेष्यितानिरूपितालोकप्रकारित्वादिप्रकारकग्रहकालेपि
धूमादिपरामर्शादनुमित्यनुत्पत्तिप्रसंगात् तत्प्रामाण्यग्रहाभावानामनुमितिजनकतावच्छेदकत्वे एवेयमनुपप
त्तिः ननु तस्य पृथक्कारणत्वेपीति तन्मतमेवावलंबनीयमिति वाच्यं॥ अप्रामाण्याग्रहाभावस्य हेतुत्वम
तेपि हेतुतावच्छेदकभेदेन परामर्शहेतुताभेदस्यावश्यकत्वात्॥ अन्यथा धूमाभाववति धूमप्रकारकत्वा
दरूपाप्रामाण्यग्रहकालेपि धूमादिपरामर्शादनुमित्यापत्तिसंभवात्॥ तथाहि॥ तन्मते आलोकादिपराम
र्शकाले धूमाभाववति धूमप्रकारकत्वादिरूपाप्रामाण्यग्रहकाले अनुमित्युत्पादप्रयोजिकाया अन्यविधा
प्रामाण्यग्रहाभाववद्विशिष्यत्वावच्छिन्नप्रकारकनिर्णयत्वावच्छिन्नप्रभृतिकारणस्तोमघटितसामग्रीप्र

कृतेप्यक्षतैव॥ आलोकपरामर्शत्वस्य जनकतानवच्छेदकतया तदवच्छिन्नविरहस्य कारणतावच्छेदकावच्छि
न्नकारणत्वाभावात्मकसामग्रीविरहासंपादकत्वादिति॥ अथ धूमप्रकारत्वादिघटिताप्रामाण्यग्रहाणां स्वी
यधूमाभाववद्विशेष्यतानिरूपितत्वप्रकारतानिरूपितविशेष्यतावच्छेदकधूमप्रकारतात्वादिसंबंधाव
च्छिन्नप्रतियोगिताकाभाववानुमितिजनकतावच्छेदकीभूतव्याप्यप्रकारितायां निवेश्यंते॥ तथा च तावद
भावकूटविशिष्टव्याप्यप्रकारिताशालिनिर्णयत्वेन एकहेतुताकल्पनेपि नानुपपत्तिः धूमपरामर्शद
शायां आलोकाभाववति आलोकप्रकारकत्वादिरूपाप्रामाण्यग्रहसत्त्वेपि तदीयव्याप्यप्रकारितायां
स्वीयआलोकाभाववद्विशेष्यतानिरूपितत्वनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकीभूतआलो
कप्रकारितात्वसंबंधेनासत्त्वादुपदर्शिताप्रामाण्यग्रहाभावकूटस्य तत्राक्षतत्वादिति चेन्न॥ एवं सति ता
दृशाभाववद्विशेषणविशेष्यभावेविनिगमनाविरहेणानंतकार्यकारणभावप्रसंगोऽवच्छेदकगौरवंचेति

प्रत्येकाभावंनिवेश्यधूमपरामर्शत्वादिनाप्रत्येकंहेतुत्वकल्पनमेवेतरपेक्षयोचितमिति ॥ नचतावतामभा
वानांपरस्मिन्प्रत्येकाभावांशेविशेषणतयाऽपराभावोनिवेश्यतेतरैवविपर्यासक्रमेणनिवेशोपिविनिगमना
विरहात्प्रसज्यतेतरेवनएकाभावेऽपराभावस्यसामानाधिकरण्येनैववैशिष्ट्यस्यनिवेशनीयतयासं
बंधगौरवात् ॥ परंतुसर्वेषामेवाभावानांविशेषणताविशेषसंबंधेनैवप्रकारताविशेषणत्वमुपगंतव्य
मितिनदोषइतिवाच्यंप्रकारतानिष्ठैककारणतावच्छेदकतापाताववस्यमभावानामवच्छेदकत्वंनसंभवति
॥ तथासतिअवच्छेदकतावच्छेदकभेदेनावच्छेदकताभ्यासलभेदेनचकारणतायाःभेदप्रसंगात् ॥ कार
णतायास्तदवच्छेदकतायाश्चैक्यस्यचानुपपत्तेः ॥ अवच्छेदकतायाश्चासज्यवृत्तित्वस्यान्यत्रदूषितत्वा
त् ॥ तावदभावेषुव्यासज्यवृत्तिमेकांकारणतावच्छेदकतावच्छेदकतामभ्युपगम्यकारणत्वतदवच्छेद
कत्वैक्योपपादनप्रकारेहेयत्वात् ॥ तस्मात्तादृशप्रकारतानिष्ठकारणतावच्छेदकतायामेकैकाभावो

नव्य·
१२

अवछेदकः तन्निष्ठतादृशावछेदकतायां च सामानाधिकरण्येन संबंधेनापराभावोऽवछेदकत्वे वंरिति
रादरणीयात त्र च विपर्यासक्रमेण निवेशमादाय विनिगमनाविरहोऽस्मल्लक्षणोप्यशक्यवारणः नच निखि
लानां धूमप्रकारत्वाऽऽलोकादिप्रकारत्वादिघटिताप्रामाण्यग्रहाणां किंचिद्धर्मावछिन्नाभाववद्विशे
ष्यितानिरूपितत्वनिष्ठप्रकारतानिरूपितप्रकारित्वनिष्ठविशेष्यतानिरूपितनिरूपकत्वसंबंधावछि
न्नावछेदकतावछेदकधर्मावछिन्ननिरूपितत्वसंबंधावछिन्नत्वानत्वावछिन्नप्रतियोगिताकएकाभा
वो व्याप्यप्रकारितायां निवेश्यत इति न विनिगमनाविरहप्रयुक्तगौरवावकाश इति वाच्यं ॥ तथा सति आ
लोकाभाववति धूमप्रकारकमिदंस्तानामित्येतादृशात्मनदृशायां वह्निव्याप्यधूमवान्पर्वत इत्येतादृशप
रामर्शादनुमित्यनुत्पादप्रसंगात् ॥ तदानीं तादृशज्ञानस्योपदर्शितसंबंधेन तादृशप्रकारितायां सत्वेन ता
दृशसंबंधावछिन्नत्वानत्वावछिन्नप्रतियोगिताकाभावस्यासत्वात् ॥ तादृशविशेष्यतावछेदकतावछे

शिव
१२

दकधर्मेस्वीयप्रकारित्वनिष्ठविशेष्यतानिरूपितत्वप्रकारतानिरूपितविशेष्यित्वप्रकारतानिरूपिताधिक
रणनिष्ठप्रकारतानिरूपिताभावप्रकारतानिरूपितप्रतियोगिप्रकारणतावच्छेदकत्वमपि कंनिवेश्यत
त्रानुमित्युपपादने धूमाभाववत्यालोकप्रकारकमालोकाभाववति धूमप्रकारकं चेदं ज्ञानमित्येतादृशा
ज्ञानकालेतादृशपरामर्शादनुमित्युपपादनासंभवात्॥ धूमत्वस्यतज्ज्ञानीयतथाविधप्रतियोगिप्रकार
कमालोकाभाववति धूमप्रतियोगितावच्छेदकत्वानतीयतादृशप्रकारितानिष्ठविशेष्यतावच्छेदकतावच्छेदक
त्वाद्वति॥ एवं धूमालोकादिपरामर्शानामेकरूपेणहेतुत्वेसिद्धिकालेधूमलिंगकेच्छासत्वेसतिचालो
कादिलिंगकपरामर्शे धूमलिंगकपरामर्शं विनैव धूमलिंगकेच्छाविरहविशिष्टसिद्ध्यभावबलादनुमि
त्यापत्तिः॥ नह्येतन्मते धूमलिंगकेच्छाविरहविशिष्टसिद्ध्यभावादिनाफलजनने धूमपरामर्शत्वावच्छि
न्नस्यसहकारितासंभवति॥ धूमपरामर्शत्वादीनामनुमितिजनकतानवच्छेदकत्वात्॥ किंतुजनकता

वह्नेरेकीभूतवह्निव्याप्यवत्तानिर्णयत्वावच्छिन्नस्यैव तत्सहकारितया नोक्तानुपपत्तिर्वारयितुं शक्यते तथाभू
तालोकपरामर्शस्यैवसत्वात्॥ तस्माद्धूमलिंगकानुमितित्वावच्छिन्नंप्रतिधूमलिंगकपरामर्शेनैवविशिष्य
हेतुत्वकल्पनमावश्यकमेव॥ अथ धूमलिंगकानुमितित्वावच्छिन्नंप्रतिधूमलिंगकेच्छाविरहविशिष्टसि
द्ध्यभाववत्वेन हेतुतानसंभवति धूमालोकोभयादिविषयकसमूहालंबनपरामर्शजन्यायामालोकलिंगके
च्छाधीनानुमितौव्यभिचारप्रसंगात्अपितुसामान्यतः पर्वतादिपक्षकवन्ह्याद्यनुमितित्वावच्छिन्नंप्रतितत्त
ल्लिंगकपरामर्शविशिष्टतत्तल्लिंगकेच्छ॥ विरहकूटविशिष्टतथाविधसिद्ध्यभाववत्वेनैकमेवहेतुत्वकल्प
नीयं एवंचकेवलं धूमलिंगकेच्छासत्वेपिधूमलिंगकपरामर्शविशिष्टधूमलिंगकेच्छारूपोत्तेजकविरहेण
विरहेणविशिष्टाभावासत्वेननानुमित्यापत्तिरितिचेन्न॥ तत्तल्लिंगकेच्छाविरहविशिष्टसिद्ध्यभावजन्यता
वच्छेदककोटौतत्तल्लिंगेच्छाविरहविशिष्टसिद्धिविशिष्टान्यत्वस्यनिवेशेनैवोक्तसमूहालंबनपरामर्शजन्या

नुमितौ व्यभिचारवारणसंभवात्॥ तत्तल्लिंगकपरामर्शविशिष्टतत्तल्लिंगकेच्छाभावकूटं निवेश्यसिद्धेः प्र
तिबंधत्वकल्पनेप्रयोजनविरहात्॥ नचतत्तल्लिंगकेच्छाविरहविरहविशिष्टसिद्ध्यभावत्वेनहेतुत्वे पक्षतायाः
परामर्शस्यचलिंगभेदेनकारणताबाहुल्यात्गौरवमितितदपेक्षयातादृशाभावकूटविशिष्टसिद्ध्यभा
वत्वेनैकहेतुताकल्पनमेवोचितमितिवाच्यं॥ अभावकूटस्यैकत्रनिवेशेविशेषणविशेष्यभावेविनिग
मनाविरहेणानंत्यप्रसंगात्॥ अवच्छेदकगौरवाच्च॥ लिंगभेदेनपक्षतापरामर्शयोः कारणताकल्पन
स्यैवोचितत्वात् एवंहेतुतावच्छेदकविषयतामनिवेश्यसाध्याभाववद्वृत्तित्वावच्छिन्नप्रकारताशालिनि
र्णयत्वेनहेतुत्वेव्यभिचारस्यहेत्वाभासत्वानुपपत्तिः॥ निर्धर्मितावच्छेदककया त्रिग्रहस्यव्यभिचारग
हाप्रतिबध्यतयाव्यभिचारज्ञानसत्वेपिसाध्याभाववद्वृत्तिमान्पक्ष इत्येतादृशपरामर्शस्यसंभवे नि
र्धर्मितावच्छेदककयानिग्रहस्यव्यभिचारग्रहाप्रतिबध्यतयाव्यभिचारज्ञानसत्वेपिसाध्याभाववद्व

तिमान्यक्षरस्येतादृशपरामर्शस्याप्यंशे निर्धर्मितावच्छेदककस्योत्पत्तौ बाधकाभावेनानुमित्युत्पत्तेरावश्यकत्वा
त्॥ केचित्तु सधर्मितावच्छेदकव्याप्तिज्ञानस्याप्यनुमितिहेतुतया तद्विरोधीतयैव व्यभिचारस्य हेत्वाभासत्वोपपत्ति
रिति तन्न॥ अनुमितिकरणयत्किंचिज्ज्ञानविरोधिन एव हेत्वाभासत्वे धूमलिंगकानुमितौ तज्जनकीभूतसमू
हालंबनपरामर्शविरोधीनो द्रव्यत्वादिनिष्ठवह्निव्यभिचारस्यापि तथात्वापत्तेः तथा च यत्र युक्तोनुमित्यनु
त्पादः क्वचित्स एव हेत्वाभासः न चैवं व्यभिचारो भवन्मते न ज्ञानसत्वेपि हेतुतावच्छेदकानवगाहिपरामर्शोत्पत्ति
स्यानुमित्युत्पादावश्यकतया तज्ज्ञानस्यानुमित्यनुत्पादप्रयोजकत्वविरहादिति॥ यत्तु साध्यव्यभिचारी हे
तुरिति व्यभिचारज्ञानकाले साध्यव्याप्यवान्पक्षः इत्येतादृशनिर्णयस्य घटानुमितिसामग्र्याः सत्वेनुमित्य
नुत्पादे व्यभिचारधीरयुक्तः॥ तथा हि॥ यदि तत्र व्यभिचारधीर्न स्यात्तदा साध्यव्याप्यहेतुमान्पक्ष इत्येतादृशा
नुमानिकपरामर्शोत्पत्त्यानुमितिः स्यादेव॥ सा स्तीति च न तथाविधानुमानिकपरामर्शो जायते तत्र तस्यावि

रोधित्वात् व्याप्यसंयोगो निर्धर्मितावच्छेदकत प्रात्यक्षिकपरामर्शस्कभिन्नविषयकानुमितिसामग्रीरूपप्रतिबंध
कसत्वान्नोत्पद्यत इति न तत्रानुमितिरुत्पद्यत इति तत्र तदनुत्पादे व्यभिचारधीरप्यप्रयोजिकेति॥ तदसत्॥ ए
तादृश्यरीत्यानुमित्यनुत्पादप्रयोजकस्य दोषत्वे पर्वतो वह्निमानित्यादौ पर्वतादिनिष्ठघटाभाववत्तादेरपि
दोषत्वप्रसंगात्॥ तथाहि॥ यत्र वह्निव्याप्यधूमवान्पर्वतो घटव्याप्यवान्पर्वतो वह्निसांख्येत्याकारकः समू
हालंबनात्मकः परामर्शस्तत्र च घटाभाववान्पर्वत इत्येतादृशनिर्णयो भूतलं घटवदित्यनुमितिसामग्री च न तत्र
यदि घटाभाववानिति निर्णयो न स्यात्तदानुमानिकवह्निव्याप्यधूमवान्पर्वतो घटवानित्येतादृशनिर्णयोत्पत्त्या
पर्वतो वह्निमानित्यनुमितिः स्यादेव सोस्तीति च न तादृशानुमानिकनिर्णय उत्पद्यते॥ वह्निव्याप्यवान्धूमवान्प
र्वत इत्येतादृशप्रात्यक्षिकपरामर्शाभिन्नविषयकानुमितिसामग्रीरूपप्रतिबंधकसत्वान्नोत्पद्यत इत्यतस्त
त्रानवच्छिन्नानुमीतिरुत्पद्यते अतस्तत्र तदनुत्पादे घटाभाववान्पर्वत इत्येतादृशनिर्णयस्यापि प्रयोजकत्वमिति।

नव्य॰
२५

तस्माद्देतादृशाशी स्याऽनुमितिस्तनुत्यादप्रयोजकत्वेन हेत्वाभासतासंपादकमिति न किंचिदेतत्॥ अग्ने दं समाधीय
ते॥ हेतुतावच्छेदकधर्मान्तरविशिष्ट्यानिवेशेऽपि निर्णयत्वं सुवचमिति न तन्निर्वचनान्यथानुपपत्त्या विशि॥ष्ट्य
हेतुतावच्छेदकनिवेशः॥ तथाहि॥ स्वावच्छिन्नप्रतियोगिताकभेदवत्त्वव्याप्तिप्रकारतानिरूपितस्वावच्छिन्नप्रका
रतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वोभयसंबंधेन किंचिद्धर्मविशिष्टत्वमेव व्याप्यवत्तानि
र्णयत्वमनुमित्याद्युपयोगि स्वावच्छिन्नप्रतियोगिताकत्वं च स्वनिष्ठायाः स्वावच्छिन्नप्रतियोगिताकाभावप्र
कारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वसंबंधावच्छिन्नप्रतियोगितावच्छेदकतातन्निरू
पकत्वं॥ धूमत्वावच्छिन्नाभावादिकोटिको वह्निव्याप्यधूमवान्पर्वतो वा इति संशयपक्षे नैतादृशोभयसंबंधेन के
नापि धर्मेण विशिष्टः धूमत्वान्यधर्मस्य व्याप्तिप्रकारतानिरूपितस्वावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वसंबंधेनासत्त्वात्॥ धूमत्वस्य च तादृशसंबंधावच्छिन्नप्रतियोगितावच्छेद

शिव
२५

कताकत्वाश्रयभेदसंबंधेनासत्वात्॥ तथाहि॥ यदितादृशसंबंधावच्छिन्नधूमत्वनिष्ठप्रतियोगितावच्छेद
कताकभेदस्तत्रैव वर्ततेतदैव तत्र धूमत्वंतादृशसंबंधेनस्यात्॥ नचतादृशप्रतियोगितावच्छेदकताघटकसं
बंधेनधूमत्वरूपतादृशप्रतियोगितावच्छेदकविशिष्टेतत्रतादृशाभेदो वर्तितुमीष्टे इतिवह्निव्याप्यधूमवान्प
र्वतइत्यादिनिर्णयानान्त्वतादृशोभयसंबंधेधूमत्वादिरूपहेतुतावच्छेदकधर्मवत्वमक्षतमेव॥ तादृशाभेदप्र
तियोगितावच्छेदकताघटकसंबंधघटकंपक्षविशेष्यतानिष्ठंस्वावच्छिन्नप्रतियोगिताकाभावप्रकारता
निरूपितत्वंचस्वनिरूपकप्रकारतानिरूपितत्वसंबंधेनसाध्यव्याप्यत्वनिष्ठावच्छेदकत्वान्यावच्छेदकत्व
विशिष्टान्यायास्वनिष्ठावच्छेदकतातन्निरूपकीभूतप्रतियोगिप्रकारतानिरूपिताभावप्रकारतानिरू
पितत्वं॥ यथाश्रुतेनीलधूमाभाववान्पर्वतोवह्निव्याप्यधूमवांश्चपर्वतइत्येतादृशनिर्णयासंग्रहात्॥ विशि
ष्टधूमत्वस्यधूमत्वानतिरेकितयानीलधूमत्वावच्छिन्नाभावस्यापिधूमत्वावच्छिन्नाभावत्वाद्वासवस्था

वच्छिन्नाभावप्रकारतानिवेशे धूमाभावत्वादिनाऽभावांतरावगाहिसंशयवारणासंभवात्॥ यद्याविवक्षितेतु न
दोषः।।उपदर्शितनिर्णयीयाभावविषयतानिरूपितधूमप्रकारतावच्छेदकतायाः स्वनिरूपकप्रकारतानिरूपि
ततत्संबंधेननीलनिष्ठावच्छेदकताविशिष्टत्वात्।।नाद्यस्यावच्छेदकतायां साध्यव्याप्यत्वनिष्ठावच्छेदकता
भिन्नत्वनिवेशाद्यत्रसंशयेवह्निव्याप्यधूमत्वादिनातादृशधूमादिरभावप्रतियोगितयाभानतस्तादृशसंश
यवारणं॥तत्र धूमत्वनिष्ठतादृशावच्छेदकतायां स्वनिरूपकप्रकारतानिरूपितत्वसंबंधेनव्याप्तिनिष्ठा
वच्छेदकताविशिष्टत्वेपि तदन्यावच्छेदकताविशिष्टान्यत्वसत्त्वात्॥नचैवमपि जातिविशेषत्वादिना धूमत्व
मभावविशेषणतापन्नधूमांशेऽवगाहमानस्य जातिविशेषवदभाववाचह्निव्याप्यधूमवान्पर्वतइत्येतादृ
शनिर्णयस्यासंग्रह इतिवाच्यं॥तादृशावच्छेदकतायां निरवच्छिन्नत्वस्यापि निवेशनीयत्वात्॥ अथैवं वह्नि
व्याप्यनीलधूमवान्नवायपर्वतोवह्निव्याप्यजातिविशेषवद्वान्नवापर्वतइत्यादिसंशयसाधारण्यंदुर्वारं।प्र

र्वत्तानीयाभावविषयतानिरूपितधूमनिष्ठप्रकारतावच्छेदकतायाः स्वनिरूपकप्रकारतानिरूपितत्वसंबं
धेन नीलादिनिष्ठावच्छेदकताविशिष्टतया उत्तरत्तानीयतादृशावच्छेदकतायाश्च सावच्छिन्नतया तादृशा
वच्छेदकताविशिष्टान्यनिरवच्छिन्नावच्छेदकताकप्रतियोगिताप्रकारतानिरूपिताऽभावप्रकारतानिरू
पितपक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वसंबंधेन धूमत्वविशिष्टस्य तत्र भेदसत्वादिति चेन्न॥ तादृशो
भयसंबंधघटकीभूतचरमदलप्रविष्टस्वावच्छिन्नप्रकारतेत्यस्य स्वनिरूपकप्रकारतानिरूपितत्वसं
बंधेन व्याप्तिनिष्ठावच्छेदकताभिन्नावच्छेदकताविशिष्टान्यनिरवच्छिन्नस्वनिष्ठावच्छेदकताकप्रकारतेत्यर्थः॥
एवं च व्याप्तिप्रकारतानिरूपीततादृशप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकत्वसंबंधेन ता
दृशासंशययोर्धूमत्वाविशिष्टत्वान्न तादृशसंशयसाधारण्यप्रसंगः॥ अथैवं वह्निव्याप्यनीलधूमवान्पर्व
तो वह्निव्याप्यजातिविशेषवद्धान्पर्वत इत्यादिनिर्णयासंग्रह इति चेन्न॥ का क्षतिः॥ तादृशनिर्णयानां भवन्म

नव्य॰
१७

तद्वास्तन्मतेपिद्वयगेवहेतुतायां॥स्वीकरणीयत्वात्॥एवमपिस्वरूपतःशुद्धधूमत्वालोकत्वाद्यनंतधर्मि
तावच्छेदककव्याप्यत्ववगाहिपरामर्शानामनुगमसंभवेनलाघवस्याक्षतत्वात्॥यत्तुएतादृशानिर्णयत्वस्यहे
तुतावच्छेदकानवगाहिव्याप्यत्वतानिर्णयसाधारण्यंनघटते॥तत्रोपदर्शितोभयसंबंधेनकस्यचिद्धर्मस्यवैशि
ष्ट्यासत्त्वादिति॥तदनुगुणमेव॥यतोहेतुतावच्छेदकानवगाहित्वानस्यानुमितिहेतुत्वेव्यभिचारस्यहेत्वाभास
तानस्यादिशानीन्तुतादृशस्तानस्यानुमितिजनकत्वाभावाद्धेतुतावच्छेदकावगाहित्वानमनिबध्यनयाव्यभि
चारस्यहेत्वाभासताअनायासेनैवोपपन्नेति॥एवमप्रामाण्यग्रहाभावनिवेशानुरोधेनापिनविशिष्टाहे
तुतावच्छेदकनिवेशः॥धूमप्रकारकत्वालोकप्रकारकत्वघटितनानाविधाप्रामाण्यग्रहाणामनुगत
रूपावच्छिन्नप्रतियोगिताकैकाभावस्यैवनिवेशसंभवात्॥तथाहिनिखिलाप्रामाण्यप्रकारताःस्वावच्छि
न्नाभाववद्विशेष्यकत्वावच्छिन्नत्वप्रकारतानिरूपितत्वस्वावच्छिन्ननिरूपितत्वसंबंधावच्छिन्नावच्छेदकता

शिव
१७

कत्वोभयसंबंधेनकिंचिद्धर्मविशिष्टप्रकारतात्वेनानुगमय्यत्वीयतादृशप्रकारतानिरूपितत्वसंबंधावच्छिन्ना
वच्छेदकतावच्छेदकधर्मावच्छिन्नत्वसंबंधावच्छिन्नस्तानत्वावच्छिन्नप्रतियोगिताकाभाववद्विशिष्टायाव्याप्यप्र
कारतातन्निरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकनिर्णयत्वेनैवहेतुत्वमुपगम्यते॥ वह्निव्याप्यधूम
वान्पर्वतइत्येतादृशपरामर्शदशायांधूमाभाववतिधूमप्रकारकमित्येतादृशाप्रामाण्यग्रहसत्वेतादृशप
रामर्शीयव्याप्यप्रकारतायांनोपदर्शितसंबंधावच्छिन्नस्तानत्वावच्छिन्नप्रतियोगिताकाभावोवर्ततेत
त्रोपदर्शितसंबंधेनधूमत्वविशिष्टायास्तादृशाप्रामाण्यस्तानीयधूमप्रकारतातदवच्छेदकतावच्छेदकी
भूतधूमत्वावच्छिन्नत्वसत्वात्तादृशसंबंधेनतन्नस्तानत्वावच्छिन्नस्याप्रामाण्यस्तानस्यैवसत्वात् अतोन
तत्रानुमितिप्रसंगः॥ आलोकाभाववत्यालोकप्रकारकमालोकाभाववतिधूमप्रकारकमित्यादिग्रहद
शायांचनतादृशपरामर्शादनुमित्यनुपपत्तिः॥ तादृशपरामर्शीयधूमप्रकारतायाआलोकाभाववत्यालो

नव्य॰
१८

कप्रकारकमित्येतादृशज्ञानीयालोकप्रकारित्वप्रकारतावछेदकतावछेदकीभूतालोकत्वावछिन्नत्वविर
हात् आलोकाभाववतिधूमप्रकारकमित्येतादृशज्ञानीयधूमप्रकारित्वप्रकारतावछेदक

श्रीगणेशाय नमः ॥ परामर्शं विनाऽनुमितिर्नोदियादनुमितिं प्रति परामर्शो हेतुरिति सिद्धांतः तत्र धूमपरामर्शसत्वे परा
नुमित्यनुदयात्पर्वताद्युद्देश्यकवन्ह्यादिविधेयकानुमितिं प्रति पर्वतादिविशेष्यकवन्ह्यादिव्याप्यधूमादिप्रकारकनिश्चयो हे
तुरित्येवं कार्यकारणभावो विशिष्यकल्पनीयः अथ वन्हिव्याप्यालोकवान्पर्वत इत्यादिपरामर्शादपि पर्वतो वन्हिमा
नित्यनुमितेरुदयात्तत्र [illegible] धूमपरामर्शहेतुतायां व्यभिचार इति चेन्न तादृशव्यभिचारवारणाय धूमपराम
र्शजन्यतावच्छेदककोटौ धूमलिंगकत्वस्य निवेशात् ॥ तत्र धूमलिंगकत्वं न धूमपरामर्शजन्यत्वं स्वजन्यतावच्छेदक
कोटौ स्वजन्यत्वस्य निवेशेनात्माश्रयप्रसंगात् नन्वथ धूमलिंगकत्वं जातिविशेषः तादृशजातिसिद्धिश्च धूमपरामर्श
जन्यतावच्छेदककोटौ प्रविष्टतयैवेति वाच्यं तुल्ययुक्त्यालोकपरामर्शजन्यतावच्छेदककोटिप्रविष्टतयालोकलिं
गकत्वस्यापि जातित्वेन तयोः प्रत्येकपरामर्शजन्यानुमितौ परस्परव्यभिचारेण धूमालोकाद्युभयलिंगकप
रामर्शजन्यानुमितेरेकत्र समावेशतया तदादाय धूमलिंगकत्वस्य सांकर्यप्रसंगात् नन्वोभयलिंगकपरामर्श

रो १

जन्यानुमितौजातिद्वयस्यास्वीकारेणनोक्तापत्तिरितिवाच्यंतत्रतादृशजातिद्वयास्वीकारेऽनुमितेरनुदयप्र
संगात्नन्वतत्रोभयलिंगकत्वाख्यांजातिमेकांस्वीकृत्योभयलिंगकानुमितिंप्रतिउभयलिंगकपरामर्शत्वेन
हेतुत्वस्यकल्पनीयतयातत्रतथाविधानुमित्युत्पत्तौबाधकाभावइतिवाच्यंतथापितादृशोभयलिंगकानुमि
तौजातिद्वयसत्वेबाधकाभावेनोपदर्शितसंकर्यवारणस्याशक्यत्वात्नन्वतत्तज्ज्ञानत्वावच्छिन्नंप्रतितथावि
धोभयलिंगकपरामर्शत्वेनप्रतिबंधकत्वकल्पनादुभयलिंगकानुमितौउभयोःसमावेशाभावान्नोपदर्शितसां
कर्यमितिवाच्यंतादृशप्रतिबध्यप्रतिबंधकभावकल्पनेनोपदर्शितकार्यकारणभावकल्पनादिनान्वगौर
वादितिनन्वधूमलिंगकानुमितौधूमलिंगकत्वंविषयिताविशेषःतादृशविषयितायांमानाभावात्एवंतु
त्वयुक्त्यापरामर्शादावपिवन्ह्यादिनिरूपितविलक्षणविषयितांस्वीकृत्यतस्याअपिवन्ह्यादिनिरूपितविलक्षण
विषयिताशालिनिश्चयत्वेनहेतुत्वकल्पनस्योचिततयाअनुमितिजनकतावच्छेदककोटौव्याप्त्यादिविषयितानि

वेशेऽप्रयोजनाभावादितिकेचित्तु॥ धूमलिंगकत्वंधूमपरामर्शाव्यवहितोत्तरक्षणोत्पत्तिकत्वं॥ अव्यवहितोत्तरत्वं
च स्वाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिकरणत्वेसतिस्वाधिकरणक्षणध्वंसाधिकरणत्वं॥ ससंतनिवे
शादतीतधूमपरामर्शानंतरं[illegible]मक्षणोत्पन्नालोकलिंगकानुमितौनव्यभिचारः॥ विशेष्यदलनिवेशाद्धूमपरा
मर्शपूर्वक्षणोत्पन्नआलोकलिंगपरामर्शजन्यानुमितौनव्यभिचारइत्याहुः॥ तदसत्॥ तथासतिधूमपरामर्शतृती
यक्षणोत्पन्नानुमितौधूमपरामर्शजन्यतावच्छेदकाक्रांतत्वप्रसंगात् तृतीयक्षणस्यस्वाधिकरणप्रथमक्षणध्वंसा
धिकरणीभूतोयोद्वितीयक्षणः तद्ध्वंसाधिकरणत्वस्यसत्वात् नच स्वाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसाधि
करणक्षणध्वंसानधिकरणत्वेसतिस्वाधिकरणक्षणध्वंसाधिकरणत्वंवाच्यंतथासतिनोपदर्शितानुपपत्तिःस्वा
धिकरणप्रथमक्षणध्वंसाधिकरणीभूतोयोद्वितीयक्षणः तध्वंसाधिकरणीभूतोयो यस्तृतीयक्षणः तद्ध्वंसान
धिकरणत्वस्यतृतीयक्षणेसत्वादितिवाच्यंतथाप्यपेक्षाबुद्ध्यात्मकपरामर्शस्यतृतीयक्षणावस्थायितयातत्रानुप

क्षणेऽसत्वानुमितेरसंग्रहापत्तेः ननु स्वाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसाधिक-
रणक्षणध्वंसानधिकरणत्वे सति स्वाधिकरणक्षणध्वंसाधिकरणत्वमेवाव्यवहितोत्तरत्वं वक्तव्यं तथासति
धूमपरामर्शचतुर्थक्षणेऽसत्वाल्लोकलिंगकपरामर्शजन्यानुमितावव्यभिचारस्य दुर्वारत्वादिति चेदीधिति
कृतस्तु ॥ स्वध्वंसाधिकरणक्षण[illegible]ध्वंसानधिकरणत्वे सति स्वाधिकरणक्षणध्वंसाधिकरणत्वमेवाव्यवहि-
तोत्तरत्वं वाच्यं ॥ धूमपरामर्श[illegible]तृतीयक्षणेऽसत्वादनुमितेः धूमपरामर्शध्वंसाधिकरणीभूततृतीयक्षणध्वंसा-
नधिकरणीभूततृतीयक्षणेऽसत्वात्तया नासंग्रहः एवमन्यत्रापीत्याहुः तदप्यसत् ॥ स्वपदं धूमपरामर्शसामा-
न्यपरं तत्तद्धूमपरामर्शपरं वा ॥ नाद्यः सर्वस्यैव क्षणस्य पूर्वोत्पन्नधूमपरामर्शध्वंसाधिकरणतया तद्ध्वंसा-
नधिकरणत्वस्याप्रसिध्या तादृशकार्यतावच्छेदकस्याप्रसिद्धेः नांत्यः तत्तद्व्यक्तिभेदेनानुमितिपरामर्शयोः
कार्यकारणभावभेदस्यावश्यकतया तत्तद्व्यक्तित्वावच्छिन्नं प्रति तत्तद्व्यक्तित्वेनैव हेतुत्वमस्तु किमव्यवहितोत्तरत्व

राम
२

॥इदं पुस्तकं परमहंसग्रंथस्येदं॥
॥श्री महात्रिपुरसुंदर्यै नमः॥ रम॥

श्रीगणेशाय नमः॥ पक्षतां निरूप्य विशिष्टपरामर्शत्वेनानुमितिहेतुताज्ञानहूपकारणतावादिमीमांसकविप्रतिपत्तिं निरस्यम

१ णिकारेण व्यवस्थापितां तत्र संगतिं दर्शयति। लक्षणोपोद्घातेनेति॥ विशिष्टपरामर्शत्वावच्छिन्नकारणताघटितानुमितिल

क्षणोपपादकतयेत्यर्थः॥ विशिष्टज्ञानस्य विशिष्टपरामर्शत्वावच्छिन्नस्य कारणत्वं व्यवस्थापयति। अनुमितिकारणत्वे युक्तिं

मभिधातुं प्रतिजानीते॥ तादृशानुक्तेश्चानुमितिलक्षणघटककारणतानिष्ठविशिष्टपरामर्शत्वावच्छिन्नत्वसाधकतया

लक्षणोपपादकत्वं बोध्यं॥ इदानीमपि विशिष्टपरामर्शत्वस्यानुमितिकारणतावच्छेदकत्वे मीमांसकविप्रतिपत्त्यव

तारवशेनाप्रामाणिकत्वशंकया तदुपपादकप्रमाणाकांक्षासंभवेन तदुपपादकत्वस्य पक्षतानिरूपितसंगतित्वं। मू

ले पक्षधर्मस्येति हेतुतावच्छेदकसंबंधेन पक्षविशेषणतापन्नस्येत्यर्थः व्याप्यविशेष्यकपरामर्शस्य संग्राह्यत्वे राम

विशेषणतेत्यत्र विशेष्यताप्यंतर्भाव्या व्याप्तिविशिष्टज्ञानं। व्याप्तिप्रकारकज्ञानं तथा च पक्षविशेषणतापन्नहेतु १

विशेष्यकतावच्छेदेन व्याप्तिप्रकारकत्ववत्ज्ञानत्वस्य पक्षतावच्छेदकत्वलाभ उद्देश्यतावच्छेदकविधेयभावमहि

प्तातादृशहेतुविषयकत्वव्याप्तिप्रकारकत्वयोरवच्छेद्यावच्छेदकभावत्वाभावात्॥ पक्षतावच्छेदके तादृशज्ञानत्वांशे च
कारणत्वरूपसाध्यस्य स्वरूपसंबंधरूपावच्छेदकतासिद्धिरप्युद्देश्या। अतो व्याप्यतावच्छेदकप्रकारकपक्षधर्म
ताज्ञानत्वेन विशिष्टपरामर्शस्यापि अनुमितिहेतुतापामीमांसकसम्मतत्वेपि तत्सिद्धसाधनावकाशः व्याप्तिस्म
रणमित्यत्र स्मृतित्वस्य हेतुतावच्छेदकत्वाभिमानं निराकरोति॥ स्मरणत्वमिति॥ अविवक्षितमिति॥ हेतुतावच्छेद
कत्वे तत्त्वादिः अविवक्षाबीजमाह। अव्यापकत्वादिति। हेतुताव्यापकत्वादित्यर्थः व्याप्त्यनुभवस्यापि हेतुत्वा
दिति भावः अवच्छेदकत्वलाघवस्य नैयायिकमत एव सत्त्वात्तत्कल्प्यता लाघवस्याप्रयोजकत्वस्य मायात्वात् लाघवादितियं
थस्य तत्त्वरत्वायोमा तत्त्वमन्यथा व्याचष्टे॥ लाघवादिति। प्रथमोपस्थितत्वेति ज्ञानद्वयस्य विशिष्टपरामर्शस्येष्ट
या प्रथममुत्पन्नतया स्वप्रकाशतावादिनां गुरूणां ज्ञानद्वयस्यैव ज्ञानद्वयोपस्थितिरूपतया तस्य प्रथमोपस्थि
तत्वमिति भावः ननु परामर्शहेतुतया ज्ञानद्वयस्यावश्यकत्वमनुमितिहेतुताकल्पने अनुपयुक्तमित्याशंकां

ग॰ परा॰
२

निराचिकीर्षुराह॥ कल्प्यत्व लाघवमिति। परामर्शहेतुत्वेनावश्यकत्वाच्चेति मूले परामर्शहेतुत्वेनेत्यनंतरं तवापीति प्र
रणीयमित्याशयेन तदर्थमाह॥ परामर्शहेतुत्वेनेति॥ तादृशज्ञानं। व्याप्यतावच्छेदकप्रकारकव्याप्त्यादिज्ञानं। मंत
व्यमिति॥ अन्यथा कारणविरहेण परामर्शस्यैवानुदयापत्तेरिति शेषः॥ यद्यपि धूमवान्पर्वत इति ज्ञानं विनापि धूमो
वह्निव्याप्य इति ज्ञाने न पर्वतत्वरूपविशेषणज्ञानसहकृतेन वह्निव्याप्यधूमवान्पर्वत इति विशिष्टवैशिष्ट्यावगा
हिबोधजननसंभवात्परामर्शहेतुतया पक्षधर्मताज्ञानस्यानावश्यकता तथापि पर्वते धूमदर्शनात्मकोद्बोधका
त्धूमो वह्निव्याप्य इति स्मरणं ततः परामर्श इति क्रमस्यैवौत्सर्गिकतयाऽद्दानीं तादृशारीत्यैव परामर्शोत्पत्तिः सर्व
त्रेत्यभिमानेन ज्ञानद्वयस्य परामर्शहेतुतयावश्यकत्वं मूलकृताभिहितं॥ एतदभिमानेनैवानुमितित्वं विशि
ष्टपरामर्शस्यासिद्धिः॥ परामर्शार्थज्ञानद्वयोपगमेऽनुमितिसामग्रीसत्वेन परामर्शोत्पत्त्यसंभवादित्यभिप्राया
ग्रे परामर्शहेतुतायामवच्छेदकलाघवमप्रयोजकीकरिष्यते॥ एतादृशाभिमानेन च नैयायिकमतमवलंब्य। अ

राम
२

यवह्निव्याप्यो धूम इत्यादिनाग्रंथेन निराकृत्यानुमितिपूर्वं विशिष्टपरामर्शोत्पत्तिसिद्धिरुपपादनीया। तावताच पराम
र्शहेतुतया ज्ञानद्वयस्यावश्यकत्वनिराकरणेपि वह्निव्याप्यधूमवान्पर्वत इति परामर्शस्यैव व्याप्यतावच्छेदकप्र
कारकव्याप्तिज्ञानत्वतत्प्रकारकपक्षधर्मताज्ञानत्वाभ्यां तत्तयात् द्रूपावच्छिन्नस्य नियतपूर्ववर्त्तितया उभयवादिसि
द्धत्वेन कल्पनालाघवमस्तु तमेव अत एव तदनंतरं व्याप्यतावच्छेदकत्वानवगाहि शाब्दपरामर्शादनुमित्यु
त्पत्त्यभिधानमेव दीधितिकृता तादृशकल्पनालाघवनिराकरणपरतया व्याख्यास्यते। केचित्तु परामर्शहेतुतयेति
मूलस्य परामर्शस्यानुमितिहेतुतया व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानत्वावच्छिन्नस्य न्यायमतसिद्धत्वनिय
तपूर्वभावित्वादित्यर्थः। परामर्शेनस्वार्थव्याप्यतावच्छेदकप्रकारकव्याप्त्यादिविषयकज्ञानांतरमपेक्ष्यतांभावा
किंतु परामर्श एव तादृशज्ञानात्मक इत्यतोपि परामर्शस्य नियतपूर्ववर्तितावादिनामपि तद्रूपावच्छिन्नस्य निय
तपूर्ववर्तित्वमनुमतमिति भाव इत्याहुः। तदसत्तायच्च धूमत्वसामानाधिकरण्येन वह्निव्याप्यवगाहिविशिष्टप

ग.प.
२

रामर्शस्तत्रव्यभिचारेणमीमांसकमतसित्यकारणतावच्छेदकद्वयस्यविशिष्टपरामर्शत्वव्यापकत्वाभावात्द्रव्यत्वा
दिसामानाधिकरण्यमात्रेणवह्निव्याप्तिज्ञानात्द्रव्यत्वादिनाजलादेर्ह्रदत्वजनिताभानात् अन्यथाख्यात्यापत्तिप्र
पेनधूमत्वावच्छेदेनव्याप्तिप्रकारकज्ञानस्यैवतन्मतेहेतुत्वात्। नचैवंतत्परामर्शीयविशेषस्यव्याप्यतावच्छेदकानवगाहि
त्वाद्वपरामर्शस्थलेमूलकृतैवदास्यमानत्वान्नदोषइतिवाच्यं। एवंसत्येतद्व्याख्यापक्षेमीमांसकमतसित्यका
रणतावच्छेदकद्वयस्यविशिष्टपरामर्शत्वव्यापकत्वमित्यभिमानस्यानुसरणीयतयातादृशज्ञानद्वयस्यविशिष्ट
परामर्शहेतुत्वमित्यभिमानमूलकत्वमेवसम्यक्। केचित्तुनिरुक्तयत्नाप्रवेशप्रयुक्तलाघवानुरोधेनवह्निव्याप्य
धूमवत्पर्वतवानित्याकारकविशिष्टवैशिष्ट्यावगाहिज्ञानमेवनैयायिकमतेऽनुमितिकारणं। तत्रचधूमवान्
पर्वतइतिज्ञानस्यविशेषणतावच्छेदकप्रकारकज्ञानविधयाहेतुत्वं। पक्षमुख्यविशेष्यकज्ञानस्यैवानुमितिहे
तुत्वेचवह्निव्याप्यधूमवत्पर्वताभिन्नःपर्वतइत्याकारकज्ञानस्यैवानुमितिहेतुत्वमित्यभिप्रायकतयापराम

राम
२

र्शहेतुत्वेनावश्यकत्वादिति मूलं वर्णयंति। परे तु मानसत्वव्याप्यपरामर्शत्वमते उपनीतभानात्मकपरामर्श
एवानुमितिहेतुः। यो यत्र विशिष्य पूर्वमवगत इत्यादिनियमो व्याप्तिं तथा च तादृशानियमबलात् वह्निव्याप्यधू
मवान् पर्वत इति ज्ञाने धूमवान् पर्वत इति ज्ञानस्यापि हेतुत्वमित्यभिप्रायकतया परामर्शहेतुत्वेनेत्यादिकं
वर्णयंति। तदसत्। तादृशानियमवादिमते धूमवान् पर्वत इति ज्ञानस्य यदा कदाचिदपेक्षितत्वेपि अव्यव
हितपूर्वकालेऽनपेक्षणात्। न च तादृशानियमनिर्वाहाय तत्प्रकारकतद्विशेष्यकोपनीतभाने तत्प्रकार
कतद्विशेष्यकज्ञानस्य कारकतद्विशेष्यकोपनीतभाने तत्प्रकारकतद्विशेष्यकज्ञानस्य साक्षादेव हेतुत्वं क
ल्पयितुमुचितमिति वाच्यं तादृशानियमवादिमते यस्य कदाचित्तत्प्रकारकतद्विशेष्यकज्ञानसमयैव तत्प्रकारक
तद्विशेष्यकोपनीतभानं निर्वाह इत्यनुभवमपलप्य लाघवानुसरणे गतं तादृशानियमेन तत्प्रकारकोपनीतभाने त
त्प्रकारकज्ञानत्वेन हेतुत्वसंभवौचित्यात् तादृशानियमस्य पूर्ववर्धर्मिकसंशयान्यथानुपपत्त्या दीधितिकृता दूषित
॥ सल्किरद्दराहेतुपकम्यनीमभिति तदपेक्ष्यमाते प्र

ग.प.
४

तत्वाच्च कारणतायाः स्वरूपसंबंधादिरूपत्वे कल्पनालाघवासत्त्वादनन्यथासिद्धनियतपूर्ववर्त्तित्वं कारणत्वमित्य
भिप्रायकतया कल्पनालाघवं विवृणोति तथा चेति। अतिरिक्तधर्मिणः ज्ञानद्वयानंतरमुभयवाद्यसिद्धविशि
ष्टपरामर्शस्य कल्पनामित्यनेनान्वयः। तत्र विशिष्टपरामर्शत्वावच्छिन्ने व्याप्यतावच्छेदकप्रकारकज्ञानत्वेन सा
मान्यतो हेतुत्वे विशिष्य व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानपक्षधर्मताज्ञानाभ्यामनुमितिप्रसंग इत्याशंका
नुत्थाने मूलस्य न्यूनत्वमेवेति तन्निराकरणपरतया एवमित्यादिमूलमुत्थापयति। नन्विति। अनुमितिःस्यादिति। त
स्मिन्नपि ज्ञानद्वयघटितसामग्रीसत्त्वादिति भावः। एवं चैवमित्यादिमूलस्य धूमत्वाद्यवच्छेदेन व्याप्तिज्ञानतत्प्रकारक
पक्षधर्मताज्ञानं च मिलितमनुमित्युत्पादप्रयोजकसामग्री नचोक्तज्ञानद्वयं तथेत्यर्थः। सामान्यरूपेण हेतुत्वे विशे
षरूपेण सामग्रीप्रवेशो न संभवति कारणतावच्छेदकावच्छिन्नस्योभयस्यैव सामग्रीत्वादित्याशंक्य विशेषरूपेणैव हे
तुतामाह।। दीधितौ यद्रूपावच्छेदेनेति। व्याप्तिज्ञानं पक्षानुमितौ हेतुस्तच्चेति विद्यत इत्यध्याहरणीयं।।

राम
४

द्रव्यत्वादिसामानाधिकरण्यमात्रेण वह्न्यादिव्याप्तिज्ञानात्तद्द्रव्यत्वादिना घटजलादेर्ह्रदादिवृत्तिताज्ञानादन्यथाख्या
त्यात्मकानुमित्यापत्तिवारणाय तद्धर्मप्रकारेणानुपेक्ष्य यद्धर्मावच्छेदेनेत्यभिहितं॥ एवं चान्यथाख्यातिमनंगीकु
र्वतां द्रव्यत्वाद्यवच्छेदेन व्याप्तिज्ञानाप्रसिध्या नोक्तापत्तिसंभवः। हेतुत्वस्य फलोपधायकतावच्छेदकत्वे उभयविषय
कैकज्ञानादनुमित्यनिर्वाहः सर्वत्र भेदाभेदसाधारणं कारणसमेलनमेव कार्योत्पत्तिप्रयोजकं न तु भेदनियतं। तद्धि
त्वमपि स्फुटं विवेचयेति हेतुत्वस्य तथात्वमसंभवदुक्तिकं चेत्यभिसंधाय ज्ञानद्वयादित्यत्र द्वयपदं व्याप्तिपक्षधर्मताज्ञा
नयोरभेदानपेक्षामात्रसूचकतया व्याचष्टे॥ ज्ञानद्वयादितीति॥ कल्पनालाघवस्याश्यकत्वादित्यनेन वाच्यतया पौन
रुक्त्यं निरस्य चिकीर्षुर्व्याचष्टे॥ लाघवादिति॥ अवच्छेदकलाघवादिति व्याप्यतावच्छेदकैकप्रकारकव्याप्तिज्ञानत्वाये
पेक्षया व्याप्तिप्रकारकज्ञानत्वरूपावच्छेदकस्य लघुशरीरत्वादित्यर्थः व्याप्तिज्ञानस्येति धर्मिपरं हेतुत्वे कारणताव
च्छेदकत्वे व्याप्तिज्ञानहेतुतायां व्याप्तिज्ञानत्वस्य कारणतावच्छेदकतायाः आवश्यकत्वादिति। उभयसिद्धत्वादित्य

ग० प०

५

र्थः तस्य तदंतर्गतत्वादिति भावः व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानत्वादेर्व्याप्तिप्रकारकज्ञानानुपजीवकत्वात् तत्कृचिदु
पजीव्यत्वादिति पादे असंगतिरिति उपजीव्यपदं विशिष्टसंज्ञानिर्वाहकपरमित्याशयेन विशिष्टनिर्वाहकत्वमुपपा
दयति॥ उपजीव्यत्वं चेति॥ असंभवात् विशिष्टसंज्ञानुपपत्तेर्विशिष्टसत्तायां विशेषणव्याप्तिज्ञानसत्तानियतत्वा
दिति भावः एतावतापि कल्पनालाघवमित्यवधेयं॥ ननु व्याप्तिप्रकारकज्ञानत्वेन हेतुत्वे सिद्धेपि व्याप्तिप्रकारक
पक्षधर्मताज्ञानत्वरूपपरामर्शत्वस्य हेतुतावच्छेदकत्वासिद्ध्या नैयायिकानां नाभिमतसिद्धिरित्यत आशयं तत्प्र
पति॥ एवं चेति। व्याप्तिज्ञाने व्याप्तिज्ञानत्वावच्छिन्ने अतिप्रसंगभंगाय। पक्षधर्मताधीशून्यकालेऽनुमितिवार
णाय क्लृप्तकारणतायामेव पक्षधर्मताविषयकत्वमवच्छेदकमन्यथानुपपत्त्या कल्प्यते॥ पक्षेपि व्याप्तिज्ञानत्वा
वच्छिन्नहेतुतायां पक्षधर्मताविषयकत्वस्यावच्छेदकत्वोपगमे प्रस्थितमुक्तावच्छेदकलाघवादिना तस्याप्यतिप्र
संगानवतारदशायां व्याप्तिज्ञानत्वस्य लाघवात् प्रथमतोऽवच्छेदकत्वसिद्ध्युत्तरकालं अवच्छेदकाभिरहितस्य निष्प्रत्यु

राम

५

हैवेतिभावः॥ ननुपक्षधर्मताधीत्वेन कारणत्वांतरत्वकल्पनयाप्यतिप्रसंगभंगेनान्यथानुपपत्त्या अवच्छेदकाभिर
द्धिकल्पनं कथमित्यत आह॥ लाघवादिति। कारणत्वांतरकल्पनापेक्षया लाघवादित्यर्थः अनतिप्रसंगोपपाद
कत्वाविशेषेपि गौरवादेव न कारणत्वांतरसिद्धिरित्याह॥ नत्विति॥ व्याप्तिज्ञानत्वावच्छिन्नमनुमितेः पूर्वमुप
पसिद्धमेवेति तस्यानुमितेः पूर्वमसिद्धेरित्यग्रिममूलासंगतिरंतस्तदाशयं व्याचष्टे सिद्धस्येति न पक्षधर्मता
विषयकल्पमिति तथा च धूमत्वहेतुतायां तदवृत्तिपक्षधर्मताविषयकत्वस्यानावच्छेदकत्वमयेपि कल्पयितुं शक्य
मितिभावः। आशयमपूरयित्वा व्याप्यत्वज्ञानमित्यादिमूलं व्याकरोति। यद्वेति। एतन्मतेपि लाघवादित्यस्यावच्छे
दकलाघवादित्येवार्थः॥ धूमत्वादेर्व्याप्तेरनतिरिक्तवृत्तितद्रूपावच्छेदकत्वावगाहितायां मीमांसकैः कारणता
वच्छेदके नीवेशनीयतया तन्मतेऽवच्छेदकगौरवादिति भावः॥ अवच्छेदकगौरवेपि मीमांसकमते दर्शितकल्पना
लाघवमक्षुण्णमितिशंकायामुपजीव्यत्वादिति मूलमवतारयति। नन्विति। विशिष्टज्ञानान्यथानुपपत्त्येति॥ त

ग. प.
६

याचज्ञानद्वयकल्पकतया विशिष्टज्ञानमप्यनुमितेः पूर्वं मीमांसकसिद्धमिति न नैयायिकमते कल्पनागौरवमिति भा
वः ॥ ननु मूलकृताऽनुमितेः पूर्वं विशिष्टज्ञानासिद्धिमुद्भाव्य पदव्यवच्छेदकलाघवमप्रयोजकीकृतं तन्न संगच्छते वि
शिष्टपरामर्शासिद्धौ कल्पकविरहेण ज्ञानद्वयस्याप्यसिद्धिप्रसंगात् अतस्तदाशयं प्रकाशयति सेति ॥ सामान्यकं प
त्तं वेदनप्रत्यक्षं तत्सिद्धमित्यर्थः । तथा च तत्तज्ज्ञकल्पकतया विशिष्टपरामर्शस्य तैरभ्युपगमत्वमिति भावः ॥ नन्वे
वं तेषां ज्ञानद्वयस्यावश्यकत्वाभिधानविरोधः विशिष्टज्ञानान्यथानुपपत्त्याऽवश्यकल्पनीयत्वस्यैवावश्यकत्व
पदार्थत्वादत आह ॥ आवश्यकत्वं चेति । उभयवादिसिद्धत्वमिति ॥ तथा च नोक्तरूपमावश्यकत्वमिति न तदभिधान
विरोध इति भावः ॥ अथ यथेत्यादिना मूलकृतो विशिष्टपरामर्शसामग्रीप्रदर्शनस्याप्रकृतोपयोगितां दर्शय
ति ॥ असिद्धिमिति ॥ मीमांसकोज्ञवितां विशिष्टपरामर्शस्यासिद्धिमित्यर्थः । व्याप्योयमित्यभेदप्रत्यय पक्षस्य विशि
ष्टपरामर्शत्वं स्फुटीचिकीर्षुरयमित्यस्यार्थं व्याचक्षाणः पक्षवृत्तितावगाहितां संदर्शयति अयमिति ॥ स एवानु

राम
६

मितिहेतुःरित्यत्र न्यूनताभंगायहेतुं पूरयति॥ लाघवादिति॥ संस्कारसाधारणेन सविषयकत्वेनोपनायकतामते व्याप्त्यु
पनये तत्स्मरणपर्यंतस्यानपेक्षिततया न विशिष्टपरामर्शपूर्वमनुमितिसामग्रीनैयत्यं संस्कारस्यानुमित्यहेतुत्वा
दिति ज्ञानत्वेनोपनायकतावादिमते अनुमितिसामग्रीनिबंधनविशिष्टपरामर्शासंभवरूपदूषणं संगमयति॥
स्मृतीति॥ स्मृतिहेतुतावादिनो। संस्कारस्यानुपनायकतयोपनयानुरोधेन स्मृतिं कल्पयतो। यत्र पक्षे व धूमदर्श
नात्मागेवोद्बोधकांतराद्व्याप्तिस्मरणं तत्र तदुत्तरपक्षधर्मताग्रहस्यैव विशिष्टपरामर्शरूपतामूलत्वोक्तौ तत्र
न्यूनताभंगाय पक्षधर्मताविषयकपक्षीयहेतुदर्शनोद्बोधितव्याप्तिस्मृतिस्थलेपि विशिष्टपरामर्शमुपपादयति॥
अत्रेति॥ अत्र दृश्यापि दृष्टव्यमित्यन्वयः। प्रथमं पक्षस्यग्रहे पक्षधर्मताग्रहोत्वस्या विशिष्टपरामर्शपूर्वमनुमिति
सामग्रीसंभवतीति पक्षाग्रहदशायांतुक्तं॥ सामान्यलक्षणानभ्युपगमे व्याप्तिस्मरणस्य पक्षीयधूमाविषयकतया
विशेषणतावच्छेदकविशिष्टविशेषणज्ञानविरहेण व्याप्तिविशिष्टधूमवैशिष्ट्यज्ञानं पक्षे न संभवतीति अं

ग.प.
७

तदा स्मृतव्याप्तेः पक्षीयधूमे विशिष्टज्ञानस्वीकारः॥ पक्षविशेष्यकेपि परामर्शे पक्षग्रहस्य पक्षतावच्छेदकरूपविशेषणविष
यकतया विशिष्टविशेष्यकज्ञाने विशेष्यतावच्छेदकप्रकारकधीहेतुत्वेन तत्नोपयोगाद्गृहीते पक्षे इत्युक्तं। तादृशवि
शिष्टधीरिति॥ तादृशस्य व्याप्तिविशिष्टस्य हेतोर्विशिष्टधीरित्यर्थः। मूले प्रथमतरस्यानंतरं पक्षधर्मतया भासमानद
ति दूरणीयं॥ ननूक्तरीत्या जायमानस्य विशिष्टपरामर्शस्य व्याप्तिस्मरणपक्षधर्मताज्ञानापेक्षया प्राथम्याभावात्प्र
थमत एवेत्यसंगतमत आह॥ प्रथमत इतीति॥ विशिष्टज्ञानात्पूर्वमिति॥ तथा च॥ प्रथमत एवेत्यस्यानुमितिसामग्र्या
मसंपन्नायामेवेत्यर्थः॥ इति भावः॥ नन्वेवं क्वचिद्विशिष्टपरामर्शसिद्धावपि विशिष्टपरामर्शत्वरूपावच्छेदकस्य लघुत्वे
पि च तेन रूपेण हेतुत्वमतेन दूषणावच्छिन्नस्य नियमकल्पनायाः आधिक्येन गौरवं दुर्वारमेवेत्यत आह॥ एवं चेति। गुरुधर्म
दूषणावच्छेदेनैवेति॥ यद्यपि व्याप्तिविशिष्टवैशिष्ट्यनिष्ठयत्तापेक्षया धूमत्वांशे अवच्छेदकत्वावगाहिनिष्ठयत्त
स्य गुरुत्वेपि धूमत्वादिप्रकारकपक्षधर्मताज्ञानत्वस्यातथात्वात्स्वमेदूषस्य गौरवाभिधानमसंगतं तथापि गुरुधर्मद

राम
७

येत्यस्य गुरुधर्मघटितधर्मद्वयेत्यर्थः कत्वान्न दोषः न्यायत्वादिति। न्यायमते कल्पनीयस्य हि त्वं॥ परमते कल्पनाधर्मिणो
द्वित्वमिति कल्पनासाम्येपि न्यायमते अवच्छेदकलाघवादिति भावः। परमते एकमेव ज्ञानं कारणं अन्यदवच्छेदकमि
तिन धर्मद्वयावच्छेदेन कारणताकल्पनमिति शंकां निराकरोति॥ गृह्यमाणेति। गृह्यमाणव्याप्यतावच्छेदकताकत्वं च
वर्त्तमानव्याप्यवच्छेदकत्वग्रहविषयत्वं॥ पक्षधर्मताग्रहप्रकारीभवदिति॥ विद्यमानपक्षधर्मताग्रहप्रकारार्थकं॥
अतिगौरवादिति॥ तन्नत्कालं विद्यमानत्वप्रवेशेन कालभेदेनानंतकार्यकारणभावप्रसंगादिति भावः। ननु कारण
तावच्छेदकविशिष्टकारणस्यापि क्रुसत्तायाः प्रकृते फलोपधानप्रयोजकत्वोपगमे विद्यमानत्वनिवेशानं विनापातिप्रसंगः
शावयवारणः॥ नचैवमपि समानप्रकारकपुरुषांतरीयव्याप्तिज्ञानकालीनपक्षधर्मताज्ञानादितोऽनुमित्यापत्तिवारणा
यतत्तत्पुरुषीयानुमितिजनकतायां तत्तत्पुरुषीयज्ञानमेवावच्छेदकं वाच्यमिति पुरुषभेदेन कारणताभेदो दुर्वार
एवेति वाच्यं॥ स्वसामानाधिकरण्यस्वविषयधर्मप्रकारकत्वोभयसंबंधेन व्याप्यवच्छेदकताग्रहविशिष्टपक्षधर्म

ग.१.
८

तात्तानत्वेनस्वसामानाधिकरण्यस्वप्रकारपक्षधर्मविषयत्वोभयसंबंधेनपक्षधर्मताग्रहविशिष्टव्याप्त्यवच्छेदकत्व
ग्रहत्वेनवाहेतुत्वोपगमेव्यधिकरणज्ञानद्वयादनुमितिवारणस्यतत्तत्पुरुषीयत्वनिवेशनमंतरेणैवसंभवादि
त्यत आह।। विनिगमकाभावाच्चेति।। दर्शितरूपयोरेकतरस्यहेतुतावच्छेदकत्व इत्यादिः। तथाचविनिगमनाविर
हाद्ग्रहद्वयावच्छेदेनअनन्यथासिद्धत्वकल्पनमावश्यकमेवेतिभावः। वह्निव्याप्यवानयमितिशाब्दपरामर्शस्थले
व्याप्यतावच्छेदकप्रकारकपक्षधर्मताग्रहविरहेणपरमतेऽनुमित्यनुत्पादाच्चानुमितिपूर्वंविशिष्टपरामर्शस्योभ
यवादिसिद्धतास्थलमितिव्याप्यतावच्छेदकप्रकारकपक्षधर्मताग्रहस्यानुमितिनियतपूर्ववर्त्तितायाःकथितोभ
यसिद्धतासंभवप्रदर्शनपरतयायत्रचेत्यादिमूलंसंगमयति। तत्रापिचेति। तत्र। मीमांसकस्य। मूलेतेनविनेति। वि
शिष्टपरामर्शाभावेनेत्यर्थः। विशिष्टपरामर्शशून्यकालेऽनुमित्यनुत्पादापत्तिः विशिष्टपरामर्शहेतुतायांकिंवि
धयावाधिकारत्याकांक्षायामाह। दीधितौतथाचेति। अनुमित्यनुत्पादापत्तौचेत्यर्थः। व्यभिचारादिति। अनु

राम
८

मितिस्वानुत्पादापत्तिकथनादर्थतोऽनुमित्युत्पादलाभेन मूलग्रंथाद्व्यतिरेकव्यभिचारलाभः॥ अत्र स्वमतसिद्धानु
मितिसामग्रीसत्त्वकथनप्रयोजनं स्फुटयति॥ स्वत इति स्वतः। स्वमते। परशाचातींद्रियादिहेतुकेशब्दादिजन्यज्ञानद
यघटितसामग्र्यपि नास्ति तदाऽनुमितिर्न केनाप्यनुमन्यत इति न मीमांसकमते व्यभिचारावकाश इत्यवधेयं।
। मूलेऽनुमानादिति॥ व्याप्यसाधकानुमानादित्यर्थः। अनवस्थानादिति। अनुमित्यात्मकपरामर्शार्थमपि प्रत्य
क्षसामग्रीविरहेणानुमानादेव परामर्शांतरस्याप्युपगंतव्यत्वादिति भावः। पक्षे तद्वृत्तिहेतोरसन्निकर्षेपि तद्व
त्ति धूमो वह्निव्याप्य इति व्याप्तिसाध्यानुमित्यात्मकविशिष्टपरामर्शप्रत्यक्षात्मकपरामर्शात्तु पपाद्य अनवस्थापरिह
रशं कोचिरस्यति॥ दीधितौ नचेति। विशेष्यसन्निकर्षविरहेण पक्षीयधूमरूपपक्षविशेष्यकव्याप्तिव्याप्यवत्तापराम
र्शासंभवाद्व्याप्यविशेष्यकपरामर्शानुधावनं॥ धूममात्रासन्निकर्षेपीति॥ तथाच तदानीं धूमत्वासन्निकर्षेण तद्विशे
ष्यकोक्तपरामर्शस्यासंभव इति भावः। विशेष्यसंनिकर्षवद्विशेषणसंनिकर्षोपि विशिष्टप्रत्यक्षे हेतुरित्याशयेन धू

ग.प.
१

मांतरसन्निकर्षस्थलेपिपर्वतीयधूमरूपविशेषणसन्निकर्षविरहेणधूमत्वेनवह्नित्वावगाहिदर्शितपरामर्शासंभवमाह॥तद्य
क्षीति॥यद्यपिविशेषणसंनिकर्षस्यप्रत्यक्षहेतुत्वेपक्षीयधूमादिसन्निकर्षस्थलेपिसाध्यासन्निकर्षेज्ञानप्रत्यासत्तिं
विनाविशिष्टपरामर्शासंभवादसंनिकृष्टहेतुकस्थलानुधावनमफलंज्ञानप्रत्यासत्तिसत्त्वेचतत्रापिमानसविशिष्ट
परामर्शसंभवः तथापिचाक्षुषादिज्ञानेउपनीतस्यभानोपगमेमनोभिन्नप्रमाणासहकारित्वघटितापादकक
वक्ष्यमाणप्रमाणांतरतापत्तेः प्रत्यक्षप्रमासामग्रीविरहकालीनप्रमोत्पादकत्वापादककप्रत्यक्षविजातीयप्र
मोपधायकतापत्तेश्चानवकाशाद्यत्रमानसान्योपनीतभानासंभवः तादृशस्थलानुधावनमित्यवधेयं॥मूलेपद
साधारणमिति। मनसाबहिर्गोचरप्रमाजननेपदसाधारणंसहकारीभवतीत्यर्थः। तेनबहिर्गोचरप्रमायामसा
धारणकारणत्वमापादकमितिफलितं।सुखादिगोचरप्रमाजनकेसुखादिनिष्ठमनःसन्निकर्षेव्यभिचारवारणा
यबहिर्गोचरेति॥बहिष्ट्वंचलौकिकमानसाविषयत्वं॥स्मृतिजनकसंस्कारादौव्यभिचारवारणायानुभवार्थकंप्र

रम
१

मापदं॥असाधारणपदप्रयोजनमाह॥दीधितावसाधारणमितीति॥शरीरादिरित्यादिपाठात्शरीरमनोयोगादिपरि
ग्रहः॥शरीरादेर्बहिर्गोचरप्रमाजनकत्वेपिजन्यज्ञानसामान्यंप्रत्येवतेषांहेतुतयातादृशप्रमांप्रत्यसाधारणकारण
त्वविरहादितिभावः॥अत्रतादृशप्रमासाधारणकारणत्वंयदिस्मरणावृत्तितादृशप्रमावृत्तिकार्यतानिरूपकत्वंत
दास्मृतिजनकसंस्कारादिवारकप्रमात्वनिवेशवैफल्यं॥विशिष्टवैशिष्ट्यानुभवत्वावच्छिन्नहेतुभूतविशेषणता
वच्छेदकप्रकारकज्ञानादौव्यभिचारश्च॥अतएवजन्यज्ञानत्वावच्छिन्नतादृशप्रमावृत्तिकार्यतानिरूपकत्वंतदित्य
पिनिरस्तं॥यदिचानुभवत्वव्यापकजातिघटितधर्मावच्छिन्नकार्यतानिरूपकत्वेसतितादृशप्रमाजनकत्वंतदा
नुभवत्वस्याप्यनुभवत्वव्यापकतयातदवच्छिन्नजनकेविशेषणतावच्छेदकप्रकारकज्ञानेव्यभिचारवारणसंभवे
पिजन्यसत्त्वावच्छिन्नंप्रतिद्रव्यत्वेनहेतौचक्षुरादौआपारकसत्त्वेनइन्द्रियवदितिदृष्टान्तासंगतिः॥रूपावृत्तित्वेनसामा
न्यत्वेनवातादृशजातिंविशिष्येतद्धोपोद्धारेपिव्याप्तिविशिष्टवैशिष्ट्यानुभवत्वावच्छिन्नंप्रतिविशेषणतावच्छेदकप्र

ग.पर.
१०

कारकज्ञानमुद्रया व्याप्तिस्मरणादेर्हेतुतायाः सर्वतंत्रसिद्धतयैतत्तापादकासिद्धिर्दुर्वारैवेति। अनुभवत्वव्याप्यजा
तिघटितधर्मावच्छिन्नायास्तादृशप्रमावृत्तिकार्यतातन्निरूपकत्वमेव तादृशप्रमाऽसाधारणकारणत्वं वाच्यं॥ अनुभव
त्वव्याप्यत्वं चानुभववृत्तिभेदप्रतियोगितावच्छेदकत्वं तच्च ज्ञानत्वादेरिवानुभवत्वादेरपि व्याप्यत्वमतो न विशेषण
तावच्छेदकप्रकारकज्ञाने व्यभिचारः॥ एवं तादृशधर्मस्य स्मृतित्वे पक्षततया तदवच्छिन्नहेतुभूतसंस्कारादौ व्य
भिचारवारणाय प्रमात्वनिवेशस्यावश्यकता। व्याप्तिस्मरणादेर्व्याप्तिविशिष्टवैशिष्ट्यानुभवत्वावच्छिन्नजनक
त्वेपि नैयायिकैः सन्निकर्षविधयाऽलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति तस्य कारणत्वांतरोपगमात् तत्त्वापादकासिद्धिः
तन्निरूपितायाः अलौकिकप्रत्यक्षत्वावच्छिन्नकार्यतायाः एवानुभवत्वव्याप्यजातिघटितधर्मावच्छिन्नत्वात्तामादाये
वापादकसत्तायास्तत्रोपपादनीयत्वात्॥ अलौकिकप्रत्यक्षत्वस्योपाधितया तदवच्छिन्नजन्यतायाः जात्यवच्छिन्नत्व
विरहादापादकासिद्धिः स्यादतो जातिघटितेत्युक्तं॥ तादृशजनतावच्छेदकतापर्याप्त्यनिवेशस्योरकमेवाघटि

राम
१०

तपदं॥ ननु विवक्षितार्थकमित्यवधेयं॥ आलोकादेरप्यनुभवत्वव्याप्यचाक्षुषत्वादिजातिघटितधर्मावच्छिन्नजनक
तया निर्वाच्यप्रमाणांतरतारूपायाद्यविरहेण व्यभिचार इति तद्वारणाय पादककोटौ विशेषणांतरं पूरयति॥
आलोकादीति। आदिना सन्निकर्षादिपरिग्रहः॥ प्रमाणांतरासहकारीति॥ तमोभिन्नप्रमाणासहकारित्वमित्य
र्थः॥ स्वभिन्नत्वतज्जन्यजनकत्वमेव तत्सहकारीत्वपदार्थः॥ इति चक्षुरादेः सात्यकप्रमाणजन्यजनकत्वसत्त्वेपिन
दृष्टांतासिद्धिः॥ न च चक्षुरादेः स्वभिन्नचक्षुरादिव्यक्त्यंतरजन्यतावच्छेदकचाक्षुषत्वाद्यवच्छिन्नजनकत्वसत्त्वा
त्स्वभिन्नत्वविशेषणदानेपि निस्तार इति वाच्यं॥ स्वभिन्नरूपप्रमाणविशेषणं परित्यज्य प्रमाणजन्यतायां स्वानि
रूपितत्वस्यापि निवेशनीयतयैतद्दोषानवकाशादुपनायकज्ञानस्य मनोरूपप्रमाणसहकारितयापादकासिद्धिरतो
मनोभिन्नेति॥ अथ सहकारित्वमन्यन तज्जन्यजनकत्वं तथासति चक्षुरादेरपि त्वगादिजन्यचक्षुस्त्वगाद्युभ
यवृत्तिद्वित्वादिजनकतया दृष्टांतासिद्धिः॥ नापि तज्जन्यसाजनकत्वं चक्षुरादेरपि इंद्रियत्वेन त्वगादिजन्यप्रत्यक्ष

स्वरूपयोग्यतयातद्दोषत्वादवस्थ्यात्‌। फलोपहितजनकत्वादीनां निवेशनेनैतद्दोषोद्धारेपि शरीरादेरपि निरुक्तप्र
माणांतरसहकारित्वसत्वेन तद्वारकमूलोक्तासाधारणपदवैयर्थ्यमतस्तज्जन्यतावच्छेदकजातिघटितधर्मावच्छि
न्नजन्यतानिरूपकत्वमेव तत्सहकारित्वं॥ तथा च मनोभिन्नत्वरूपप्रमाणविशेषणवैयर्थ्यं॥ उपनायकज्ञान
जन्यतायामनोजन्यतावच्छेदकमानसत्वघटितधर्मानवच्छिन्नत्वात्‌॥ नैयायिकैर्बहिरिंद्रियजन्योपनीतभा
नसाधारणालौकिकप्रत्यक्षत्वावच्छिन्नं प्रत्येवोपनायकज्ञानत्वेन हेतुत्वोपगमात्‌॥ न च प्रत्यक्षत्वजातिरपि
मनोजन्यतावच्छेदिका प्रत्यक्षत्वावच्छिन्नं प्रति इंद्रियत्वेन सामान्यकारणतासत्वादिति वाच्यं॥ तादृशसामा
न्यकार्यकारणभावस्याप्रामाणिकत्वे मनोभिन्नत्वविशेषणोपादानेपि तथाविधचक्षुरादिप्रमाणजन्यतावच्छे
दकप्रत्यक्षत्वमादाय तद्दोषप्रसंगः इति निरुक्तसहकारिताघटकजातौ प्रत्यक्षनिष्ठभेदप्रतियोगितावच्छेद
कत्वविशेषणस्यावश्यकतया मनोभिन्नत्वानिवेशेपि उक्तदोषाभावात्‌॥ न च न देयमेव मनोभिन्नत्वरू

पप्रमाणविशेषणंदीधितिस्थंतरपदस्यस्वभिन्नपरतयैवसार्थकत्वादितिवाच्यं॥ मनोभिन्नत्वानुपादानेमनःस
हकारिसुखादिमनःसंनिकर्षेव्यभिचाराप्रसक्तेःतत्रस्यबहिःपदवैयर्थ्यापत्तेरिति॥ मैवं॥ उपनायकज्ञानस्यजन्य
तावच्छेदकंभानसत्वमेवबहिरिंद्रियजसत्ताने उपनीतस्यविशेषणतयातत्रविशेषणज्ञानविधयैवोपनायक
ज्ञानहेतुत्वात्तत्साधारणधर्मस्यजन्यतानवच्छेदकत्वेपिक्षतिविरहात्तथाचनिरुक्तमनःसहकारित्वसुखोपना
यकज्ञानस्याक्षतमेवेतिमनोभिन्नत्वरूपप्रमाणविशेषणमावश्यकं॥ अथवामनोभिन्नत्वेनतत्प्रमाणविशेषणीयं
अपितुइंद्रियत्वावच्छिन्नजन्यतामादायउक्तदोषस्यवारणायनिरुक्तंजातिविशेषणंपरित्यज्यप्रमाणजन्यतायांम
नोनिरूपितत्वमेवनिवेश्यंतावतैवबहिःपदसार्थक्यादित्यालोकादिसहकारिसहकारितयाचस्फुरद्दावसिद्धिर
तःप्रमाणेति॥ प्रमाणत्वंचात्रअननुगतवृत्तिजातिपर्याप्तकार्यतावच्छेदकतावत्वंचक्षुरादेश्चक्षुष्ट्वादिनासुखत्वा
क्षुषत्वाद्यवच्छिन्नप्रत्येवसामान्यहेतुत्वान्नत्वेदमक्षतमेवेत्यालोकस्यभावत्वाच्चाक्षुषत्वंद्रव्यचाक्षुषत्वादिकंवा

ग. प.
१२

जन्यतावच्छेदकं चक्षुः संयोगादिरूपविषयेंद्रियसंनिकर्षस्यापि द्रव्यचाक्षुषत्वादिकमेव तथा च सुहृच्चाक्षुषत्वादि
कमिति न तत्सहकारितामादाय चक्षुरादावसिद्धिः नचैवमपि चक्षुर्मनोयोगो गोदिजन्यतावच्छेदककोटौ विषयो
दिनिवेशे प्रयोजनविरहेण सुहृच्चाक्षुषत्वादिकमेव तज्जन्यतावच्छेदकमुपेयते॥ एवं च तेषामपि निरुक्तप्रमा
णत्वशालित्वेन तत्सहकारित्वमादायेंद्रियेसिद्धिरिति वाच्यं॥ संयोगान्यत्वस्यापि प्रमाणत्वशरीरेऽतर्भा
वनीयत्वात्॥ नवोक्तप्रमाणांतरासहकारित्वनिवेशोपि उद्भूतरूपे व्यभिचारस्तस्य मूर्तप्रत्यक्षत्वावच्छिन्नं प्र
त्येव जनकतया चक्षुरादिजन्यतावच्छेदकावच्छिन्नजन्यताकत्वरूपतत्सहकारित्वाभावादिति वाच्यं। मिमांसकै
र्गुणप्रत्यक्षत्वस्य मुपगमेन मूर्तचाक्षुषत्वस्यैव तज्जन्यतावच्छेदकत्वोपगमेन तस्य चक्षुः सहकारितायाअ
क्षततत्वात् एवं महत्वस्यापि द्रव्यचाक्षुषत्वमेव जन्यतावच्छेदकं न तु द्रव्यप्रत्यक्षत्वमतो न व्यभिचारः तु
टेरस्पार्शनं लोपयत येद्रव्यस्पार्शनं प्रतित्रुटि महत्वव्याव्रत्तावि जातोपमहत्वत्वेन हेतुत्वांतरस्यावश्यकं

राम
१२

तथा चाक्षुषत्वस्य महत्त्वजन्यतावच्छेदकत्वेऽपि न परमाणुद्व्यणुकस्पर्शनापत्तिः विषयस्याहेतुत्वप्रमाणिक
मेवेति न तत्र व्यभिचारः अथ व्याप्तिस्मरणस्यापि योग्यताज्ञानविधया शाब्दप्रमाणसहकारितया तत्रापादकासिद्धिरिति
चेन्न सहकारिता शरीरे चरमजन्यतायाः फलोपधानरूपाया एव विवक्षणीयत्वात् शाब्दफलानुपधायकव्याप्तिस्मा
रणस्यैव पक्षत्वेनापादकासिद्ध्यनवकाशात् इदं त्ववधेयं निरुक्तप्रमाणांतरासहकारित्वस्य स्वातंत्र्येणतापादक
कोटिनिवेशो गौरवात् अपि त्वनुभवत्वव्याप्यजातिघटितधर्मावच्छिन्नवहिर्गोचरप्रमानिष्ठकार्यतानिरूपकता
त्मकतादृशप्रमासाधारणकारणताघटकजातावेव प्रमाणांतरजन्यतानवच्छेदकत्वं निवेशनीयं तच्च स्वानिरूपि
तामनोनिरूपिताचपाजन्यतावच्छेदकतापर्याप्त्यनधिकरणत्वे पर्याप्तिनिवेशाच्चाक्षुषत्वादेरालोकादिजन्यता
वच्छेदकघटकत्वेऽपि न दृष्टांतासिद्धिः मनोनिरूपितेत्यस्य मनस्त्वघटितधर्मावच्छिन्नानिरूपितार्थकतया मनस्त्व
घटितचक्षुर्मनोयोगत्वावच्छिन्ननिरूपितजन्यतामादायोक्तदोषस्यानवकाशः एवं च स्वानिरूपितामनस्त्वघटित

ग.प.

भै

धर्मावच्छिन्नाभिरूपितावयाजन्यतानदवच्छेदकत्वपर्याप्त्यनधिकरणं याऽनुभवनिष्ठभेदप्रतियोगितावच्छेदिका जातिस्त
द्रूहितधर्मावच्छिन्नायावहिर्विषयकानुभवनिष्ठकार्यतातन्निरूपकत्वं मापादकृद्दलसमुदायार्थः अयाद्यीभूतं
प्रमाणांतरत्वं मानसान्यप्रमायाः असाधारणकारणत्वं असाधारणकारणत्वं च व्यापारवदसाधारणफलोपहि
तकारणत्वं व्यापारनिवेशात् प्रतीकांतरवत्तु पनायकृत्तानेआपाद्यविरहनिर्वाहः असाधारण एव प्रवेशात्
भणादके शरीरादिवारकासाधारण्यविशेषणसार्थक्यं फलोपधाननिवेशाद्व्याप्तिज्ञानस्यानुमित्यात्मक
प्रमास्वरूपयोग्यतामादायनेष्टापत्तिः ॥ अनुमित्यनुपधायकस्य तस्य पक्षत्वात् । वस्तुतः प्रमाणव्यवहारवि
षयत्वं मापार्थ । इति कृतो अभिप्रेतं ॥ अन्यथाऽऽलोकेपि उक्तापाद्यसत्त्वेनालोकादिवारणायेत्यादितद्ग्रंथासंग
तीः स्यात् । प्रमाणव्यवहारविषयतावच्छेदकं प्रमाणांतरासहकारित्वगर्भं ॥ आलोकादौ व्यापारवत्त्वेपि प्रमा
णव्यवहारविरहादतो व्यवहारापादनप्रसंगोऽप्यालोकस्य वारणीयत्वाभिधानसंगतिः ॥ वन्हिव्याप्यधूमवान्पर्व

राम

१२

तदस्यादिविशिष्टपरामर्शात्मकवह्निविषयकप्रमायां व्याप्तिज्ञानस्य करणत्वेन तत्त्वं च ममेव प्रमाणं स्यात्॥ तादृशप्र
मायां साक्षात्कारत्वाग्रहेण तदसिद्ध्या तत्कारणस्य प्रत्यक्षप्रमाणानंतर्भावात् अतादृशप्रमितिर्न संभवतीति सूचना
यांतरपदं नतु तदर्थस्यापाद्यकोटिप्रवेशः॥ एतेन प्रमाणांतरत्वं यदि कृतप्रमाणभिन्नप्रमाणत्वं तदा आपाद्याप्रसि
द्धिः॥ यदि प्रत्यक्षप्रमाणभिन्नप्रमाणत्वं तदापि चक्षुरादेः दृष्टांततयोपन्यासविरोधः॥ यदि च मानसान्यप्रमाकरणत्वं
तदापि मानसान्यत्ववैयर्थ्यं प्रमाणव्यवहारविषयत्वस्यैवाभिष्टतया तन्मात्रोपादनेनैवोद्देश्यसिद्धेः॥ न च मानसप्रमा
जनके उपनायकसत्ताने मानसप्रमाकरणत्वं तत्करणव्यवहारश्चेश्वरेतिरशपनिवारकतया तत्सार्थक्यमिति वाच्यं क
रणत्वस्य व्यापारगर्भतयेच्छायत्नेरनवकाशात्। अथास्तु करणत्वं व्यापारगर्भं तथापि प्रकृते तन्मनन्तर्भाव्य मानसा
न्यप्रमासाधारणफलोपहितकारणस्यापादनसंभवेन तदेव मूलाभिप्रेतमस्त्विति चेन्न तथा सति सिद्धांते व्यापा
राभावेन करणत्वासंभवाभिधानस्य मूलकृतोऽलग्नकत्वापत्तेरिति निरस्तं॥ आलोकादेरो व्यवहारमभ्युपगम्य

ग.प.
१४

प्रमाणांतरासहकारित्वविशेषणमंतरेणैव तत्र व्यभिचारं वारयतः। कस्यचिच्च तमाह॥ तदयेति। ननु प्रमाणव्यवहार
विषयस्यालोकादेः प्रत्यक्षानुमानेत्यादिसूत्रे अपरिगणनात् तद्विरोध इत्यत आह। प्रत्यक्षेति। विभागात् आलोकादी
नामपि विभक्तत्वात् तद्व्याघातः विभाजकसूत्रे विरोधः॥ अत्रेदमस्वरसबीजं। आलोकस्य सव्यापारस्य प्रमाकर
णत्वोपगमसंभवेपि निर्व्यापारस्य तत्संयोगादेः तदुपगमासंभवेनोक्तविशेषणप्रत्यक्षेप आवश्यकः। आत्मशरी
रीरादेरपि प्रमाणत्वोपगमसंभवेन असाधारणविशेषणस्यापि परित्यागापत्तेः तांत्रिकाणां प्रमाणव्यवहारविरह
श्च तुल्य एवेति। प्रमाणांतरासहकारित्वविशेषणपूरणं विनैव निर्वाहाय प्रकारांतरेण व्याचष्टे॥ यद्वेति। यज्जातीये
ति। यज्जात्यवच्छिन्नेत्यर्थः। तद्विजातीयेति। तज्जातिमद्वृत्तिजातिमदित्यर्थः॥ ईश्वरव्यावृत्तिलाभाय अनुमित्यादावनु
पधायकव्याप्तिज्ञानादौ प्रत्यक्षत्वविरुद्धजातिमत्प्रमाहेतुमात्रवृत्ती यं॥ प्रत्यक्षमायाः मनोन्यकरणेनासमवहितं य
दृष्टिविषयकप्रमोत्पादकं तन्निष्ठवृत्तिजातिमत्प्रमाहेतुरित्युक्तौ मानसप्रमायां मनोन्यकरणाप्रसिद्ध्यापत्तेरेन

राम
१४

चाक्षुषादिप्रमायाश्चोपादेयतया मानसप्रमाहेतुतोपनये तद्वृत्तिजातिमत्प्रमाहेतुत्वमेवापाद्यं मानसप्रमायाः स्व
तद्वृत्तिजातिमत्त्वात् तत्रेष्टापत्तिरिति यत्त्वं तत्त्वेन जातेरुपादानं तथा च सति पत्यादेन प्रत्यक्षत्वजातिमादाय तद्विरु
द्धजातिमत्प्रमाहेतुतापादनेननेष्टापत्त्यवसरः प्रकृते प्रमानिष्ठजातिमादायैवापादानमित्येतत्सत्त्वनायप्रमायार
ति॥ तज्जातिमत्प्रमाविजातीयप्रमाहेतुत्वमेवापाद्यं एवं च यज्जातीयेत्यनेन स्मृतित्वोपादाने तद्धत्प्रमायाअप्रसिध्या
सामान्यव्याप्तिभंग इत्यतः प्रमायाइति। केचित्। प्रत्यक्षकरणमनःसहकारेणेव उपनयस्य प्रमोत्पादकत्वोपगमा
त्॥ आपादकासिद्धिवारणाय मनोन्येति। मनोभिन्नप्रत्यक्षकारणमनोयोगादिसमवधानस्यावश्यकत्वादसिद्धिरि
ति॥ करणेनेति॥ तदसमवहितं सत्यत्प्रमोत्पादकं तदजन्यं प्रमोत्पादकं। बहिर्विषयकत्वनिवेशस्य व्यावृत्तिः पूर्ववत्॥
मनोन्यकरणेनासमवहितस्योपनयस्य मनःसहकारेण बहिर्विषयकप्रत्यक्षजनकत्वे बाधकाभावादप्रयोजकत्वशंका
स्यादित्याशंकायां कल्पांतरमाह॥ यज्जातीयेति॥ यज्जातीयसामग्रीविरहे तज्जातीयोत्पत्तेरप्रसक्त्या प्रमायां जन्यमानायां वि

जातीयेव साजनयितुं शक्येति नाप्रयोजकत्वशंका। न चैवमपि केरुपनीतभानस्थले उपनयघटितायाः प्रत्यक्षसामग्र्या
उपगमादाधायादकासिद्धिरिति वाच्यं। उपनीतविषयोपधानेन साक्षात्त्वस्याग्रहात्तदभावग्रहात्तादृशविषये द्रव्यादिप्रत्य
क्षसामान्यहेतुभूतेंद्रियसंयोगादिविरहाच्चोपनयजन्यज्ञाने प्रत्यक्षत्वासंभवेनापादकस्य प्रसिद्धत्वात्। अत्र च बा
ह्याभ्यंतरप्रत्यक्षादौ लौकिकसन्निकर्षवद्विषयोपरागेण साक्षात्त्वस्योपनीतविषयोपरागेण च तदभावस्याग्रहात्
साक्षात्त्वं विषयिताविशेष एव। ननु प्रत्यक्षत्वं जातिः स एव लौकिकसन्निकर्षजन्यतावच्छेदकः एवं चोपनीतभानस्य प्र
त्यक्षत्वे न किंचिद्बाधकं। बाधकविरहेपि साधकविरहान्नसवंशो उपनीतभाने प्रत्यक्षत्वजातिरिति नाशंकनीयं। लौकि
कान्यप्रत्यक्षत्वस्यैव उपनायकज्ञानजन्यतावच्छेदकतया तत्र तत्सिद्धेः। लौकिकान्यज्ञानत्वस्य तथात्वेऽप्रसिद्धिसाध्यकानु
मितौ स्मृतौ च व्यभिचारप्रसंगात्। न च प्रत्यक्षत्वविरुद्धं जात्यंतरमेव तथास्त्विति वाच्यं। आंशिकोपनीतभानासंग्रहात्। एतादृ
शजातिस्वीकारे तस्याः प्रत्यक्षत्वसामानाधिकरण्येन व्याप्यव्यापकभावस्यावश्यकत्वात्। आंशिकोपनीतभाने च मानसत्व

चाक्षुषत्वादीनां प्रत्यक्षत्वसाधकत्वादित्याह यो नैयायिकसिद्धं तत्प्रकारा अग्रे ग्रंथकारेणैव स्फुटीकरणीयाः। नन्वस्तु उक्तव्या
प्तिबलादि जातीयाप्रमात्वकरणमन्यदेवास्तां कुतो व्याप्तिस्मरणादेः प्रमाणांतरतेत्यत आह॥ ततइति। ततः। तादृशव्या
प्त्यनुरोधात्॥ सिद्धायां। स्वीकृतायां। आवश्यकत्वात्॥ अवश्योपेयकारणताकत्वात्॥ बाधकाभावादित्यस्य करणत्वइ
त्यादिः तस्यैव व्याप्तिस्मरणादेरेव॥ तथात्वं तादृशप्रमाकरणत्वं॥ ननु संशयत्वप्रयोनप्रमेय इति मूलमसंगतं तयोरप्यबा
धितविषयेप्रमात्वात्॥ अथ सर्वांशे प्रमात्वमत्र विवक्षितं संशयस्यास्त्वप्रमस्य च किं त्विदंशे भ्रमत्वं नियमतः स्वीक्रियते इ
ति चेन्नाभूत्सर्वांशे तयोः प्रमात्वं तथापि तत्र संयोगादिरूपप्रत्यासत्तिमन्यविषयमानार्थं ज्ञानस्य प्रत्यासत्तित्वमावश्यकमि
ति तस्य प्रमाणत्वं दुर्वारमेवेत्यतो मूलंस्याशयं व्याचष्टे॥ संशयेति। न विशिष्टानुभवत्वरूपेण योग्यतासहितेंद्रियसंयोगा
दिरूपान्यवस्तुसंसर्गविषयकप्रत्यक्षत्वरूपो॥ तथात्वे किमनिष्टमित्याकांक्षायामाह॥ येनेति। येनेत्याशंकोनेत्यन्वयः॥ तद
भावादीत्यादिपदाद्विषयाबाधपरिग्रहः॥ प्रमापि जनयितव्येति॥ अप्रमाया अप्यबाधितविषये प्रमात्वस्यावर्जनीयत्वादि

तिभावः ॥ तथा च स्वप्रमाणत्वापत्तिर्दुर्वारैवेति भावः ॥ धर्मिज्ञानकोटिस्मरणादिरूपाविति धर्मिणी लौकिकसंनिकर्षादिस
त्वे अनुभवात्मकेनान्यदा च स्मरणरूपेण तज्ज्ञानेन सहितं यन्न गृहीतासंसर्गकधर्मस्य पूर्ववत्कदाचित्स्मरणं रूपं कदाचि
च्चानुभवात्मकं ज्ञानं तद्रूपावित्यर्थः धर्मिज्ञानमित्यत्र च धर्मिपदं धर्मस्याप्युपलक्षणं अस्मादेः लौकिकप्रत्यासत्तिसहकृ
तेंद्रियादेः । आदिनानुमानादिपरिग्रहः संस्कारादिति अतो भोऽवयोपयोग इति शेषः असंनिकृष्टे धूमे धूमत्वेन हेतुना व्याप्त
नुमानं धूमत्वत्वेन व्याप्तिव्याप्यत्वपक्षधर्मताज्ञानं । विनानसंभवतीति अनुमानादिविशिष्टव्यवहारोपपादनं मूलकृतः ता
दृशज्ञानदशाभिप्रायकतयोपपादयन्न्यूनताभंगायान्यदा व्यवहारमन्यथोपपादयति । धूमत्वादावित्यादिना । असंस
र्गाग्रहादेरित्येवकारेण विशिष्टज्ञानव्यवच्छेदः यद्यपि तन्मते विशिष्टज्ञानस्थलेऽप्यसंसर्गाग्रह एव विशिष्टव्यवहारहेतुः त
थापि विशिष्टज्ञानं तथापि विशिष्टज्ञानस्यापि विशिष्टविषयकत्वमप्युररीकृत्य तन्नत्यदार्थविषयत्वेन असंसर्गाग्रहनिष्ठकार
णतायामवच्छेदकत्वात्तविशिष्टविषयकानुमानस्य व्यवहारप्रयोजकत्वोक्तेर्न संगतिः अत एवेत्यादिमूले न व्याप्यताव

च्छेदकधूमत्वाद्यनवगाहिशाब्दादिपरामर्शस्थले तादृशपरामर्शप्रकारीभवद्व्याप्यतावच्छेदकीभूतव्याप्यतावच्छेदेन व्याप्यग्रहदशा-
यामनुमितिर्न भवतीत्यभिहितं। तत्र च नैयायिकानां अप्रतीद्रियादिहेतुकस्थले अनुमितिर्न भवतीत्यत्र किं संभवानुल्पत्तरां
कां परिजिहीर्षुराशयं व्याचष्टे अतीन्द्रियेति व्याप्यत्वप्रकारकज्ञानस्य व्याप्यत्वप्रकारकपक्षधर्मताज्ञानस्य सर्वत्रानुभवसिद्धत्व-
मनेन दुरपह्नवत्वं दर्शितं॥ बाधितरत्यस्य व्यभिचारनिश्चये नेत्यादिः परिशेषादिति व्याप्तिविशिष्टपक्षवैशिष्ट्यावगाहिपरा-
मर्शो व्याप्यतावच्छेदकप्रकारकव्याप्तिपक्षधर्मताज्ञानयोरेकतरासंभवे न अपरस्य फलानुरोधेन कारणतायां वाच्यत्वादि-
ति ध्येयं॥ व्याप्यतावच्छेदकप्रकारकज्ञानस्य व्याप्यतावच्छेदकप्रकारकव्याप्तिपक्षधर्मताज्ञानत्वावच्छिन्नस्य। तत्र व्याप्यत्वाव-
च्छेदेन व्याप्तिप्रकारकज्ञानं कल्पनाबीजमाह॥ कारणं विनेति। ननु तत्र तदभावेऽप्यनुमित्युत्पत्त्या तस्य हेतुतैव किन्न बाध्य-
ते इत्यत आह॥ तेन विनेति॥ तत्र शाब्दव्याप्यवत्ताज्ञानस्थले। नन्वेवं फलापलापोऽविशिष्ट इत्यत आह॥ तवेति॥ स-
र्वथैवापलाप इति कालविलंबेनापि तत्र विशिष्टपरामर्शासंभवादिति भावः। कालविलंबादिति व्याप्यत्वावच्छेदेन व्या-

ग॰प॰
१७

तिशानोत्पत्त्याकालविलंबेनानुमितिसंभवादिति भावः उपनीतमानानंगीकर्तॄणां व्याप्त्यवच्छेदेन व्याप्तिज्ञानं तत्रानुमितिरूपं स्मृ
तिरूपं वेति हृदयं ॥ तुल्यमित्यनेन मूले पक्षधर्मे व्याप्तिसंशयस्य प्रतिबंधकत्वमुक्तं तच्च न युक्तं ॥ विशेषदर्शनेन ज्ञातद्व्या
नंतरं संशयानुत्पादे तत्प्रतिबंधकतायां मानाभावादित्यत आह ॥ तुल्यमितीति ॥ अभ्युपगमवादः ज्ञानद्वयानंतरसं
शयोत्पादाभ्युपगमेनोक्तिः नयाच संशयस्यानुमितिप्रतिबंधकतायां न निर्भरः किंतु विशेषदर्शनात् संशयानुत्पत्ता
वेवात एवाग्रे संशयोत्पत्त्याशंकापि संगच्छत इति भावः मूले धूमसामान्यानिश्चयस्येति सामान्यधर्मपुरस्कारेण विरोधि
निश्चयस्येत्यर्थः द्रव्यत्वसामानाधिकरण्येन गंधादिनिश्चयेपि पृथिव्यन्यद्रव्यत्वादिना गंधादिसंशयात् इति भावः धूमसा
मान्ये संशयः शुद्धधूमत्वं पुरस्कारेण व्याप्यत्वसंशयो मा भूदिति तत्प्रकारेण व्याप्तिनिश्चयसत्त्वादिति भावः विशेषसंशयः
विशेषधर्मावच्छेदेन तद्वत्तासंशयो विशेषनिश्चयनिवर्तनीयः विशेषधर्मपुरस्कारेण विरोधिनिश्चयमात्रनिवर्तनीयः धूम
विशेषसंशयनिरासार्थं पर्वतीयधूमत्वपुरस्कारेण व्याप्यत्वसंशयस्थलेऽनुमितिनिरासार्थं । एवं च व्याप्तिनिश्चयः

राम
१७

र्वतीयधूमत्वपुरस्कारेण व्याप्तिनिश्चयो वाच्यः अनुमितिहेतुतयास्वीकार्यः यद्यपि पूर्वं धूमत्वदर्शनस्यैव व्यावर्त्तकधर्मदर्शनविध
या संशयविरोधित्वमुक्तं न तु व्याप्तिनिश्चयस्येति धूमसामान्ये व्याप्तिनिश्चयात् तत्सामान्ये संशयानुत्पादोपगमेन विशेषसंशयो
पपादनं न युज्यते॥ तथापि पर्वतवृत्तित्वसामानाधिकरण्येन धूमत्वदर्शनात् तदवच्छेदेन व्याप्यभावसंशयनिवृत्तावपि पर्वतीय
धूमत्वावच्छेदेन व्याप्यभावसंशयो दुर्वारः पर्वतीयत्वावच्छेदेन धूमत्वनिश्चयासंभवादिति शंकायां धूमत्वज्ञानस्य विशेषद
र्शनत्वेनेत्यादिसिद्धान्तोपरिसंभवात् धूमत्वपुरस्कारेण व्याप्तिनिश्चयस्य पर्वतीयधूमत्वावच्छेदेन तदभावसंशयनिवर्त्तकत्व
मपि तादृशग्रंथतात्पर्यविषयः तत्रैवेयं शंका अथ पर्वतवृत्तित्वावच्छेदेन तत्सहितधूमत्वावच्छेदेन वा व्याप्तिविरहशंकानेयापि
कसिद्धानुमितिहेतुताकस्य व्याप्तिविशिष्टधूमे पक्षधर्मतावैशिष्ट्यावगाहिनिश्चयस्यापि निर्वृत्या असमानधर्मितावच्छेदकत्वा
त् पक्षधर्मताविशिष्टे व्याप्तिनिश्चयश्च तच्छंकानिवर्त्तकोपि नानुमितिहेतुः व्याप्तिविशिष्टवैशिष्ट्यबोधस्यैवानुमितिहेतुतया वक्ष्यमाण
त्वात् उभयविधपरामर्शस्य वयात्वेपि व्याप्तिविशिष्टवैशिष्ट्यबोधघटितानुमितिसामग्रीदशायां तादृशशंकाया दुरुच्छेदतया तत्रैवे

ग. प.
४

पाधिकेऽनुमितिस्वीकारे मीमांसकानामपि ज्ञानद्वयसत्त्वेनच्छेकासत्त्वेऽप्यनुमिताविशेषापत्तिसंभवेन तादृशशंकोच्छेदोपायानुसरणवैयर्थ्या
त्। यत्तु व्याप्तिविशिष्टे धूमे पर्वतवृत्तित्वशंकादशायां मीमांसकमते अनुमित्यापत्तिपरतया मूलशंकावर्णनेनोक्तानुपपत्तिवारणं तद्
व्याप्तिनिश्चयो वाच्य इत्यस्यापि व्याप्तिविशिष्टे धूमे पक्षधर्मतानिश्चयस्यानुमितिहेतुतास्वीकारपरतया वर्णनं तदशुद्धं। मीमांसकम
ते धूमत्वावच्छेदेन पक्षधर्मतासत्त्वेनान्यथाख्यातिस्वीकारप्रसंगभयेन धूमत्वसामानाधिकरण्येनैव पक्षधर्मतानिश्चयहेतुतायावा
च्यतया व्याप्तिविशिष्टधूमत्वावच्छेदेन पक्षवृत्तित्वशंकायाः सुदृढधूमत्वसामानाधिकरण्येन पक्षधर्मतानिश्चयाप्रतिबध्यतया मी
मांसकानामनुमितिजनकपक्षधर्मतानिश्चयस्य तादृशशंकाभेदकत्वाभिधानेन समाधानासंगतेरिति चेत् न। पक्षवृत्तिधूमत्ववि
शिष्टे व्याप्तिवैशिष्ट्यज्ञानमात्रस्यानुमितिहेतुत्वेऽपि नैयायिकानामुद्देश्यसिद्धेः तदभ्युपगमेनैव तादृशपरामर्शप्रतिबध्यायाः पक्ष
वृत्तित्वाद्यवच्छेदेनाव्याप्यत्वशंकाया ज्ञानद्वयस्थले संभवशंकासंगतेः वस्तुतस्तु पक्षवृत्तिधूमत्वावच्छेदेन व्याप्तिविरहशंकायां व्या
प्तिविशिष्टे पक्षधर्मतानिश्चयोऽपि विरोधि। यज्ज्ञानं यदुभयसामानाधिकरण्यमवगाहते तस्य तदेकतरावच्छेदेनापरधर्माभावशंकानि

राम
१८

वर्त्तकताया अनुभवसिद्धत्वात्पक्षधर्मधूमत्वस्य परामर्शधर्मितानवच्छेदकत्वेपि तदवच्छेदेना व्याप्यत्वशंकायाः पक्षवृत्तिधूमत्वव्याप्यत्व
सामानाधिकरण्यावगाहिकथितपरामर्शसत्त्वेकदाप्यसंभवादित्यभिप्रायकत्तयायथाश्रुतग्रन्थमूलसंगतिः सामान्यघटितविशेष
धर्मपुरस्कारेण संशये सामान्यधर्मसामानाधिकरण्यमात्रावगाहिनिश्चयस्याविरोधित्वेपि सामान्यधर्मावच्छेदेन विरोधिनिश्चयस्य वि
रोधित्वमावश्यकं अवच्छेदकावच्छेदेन विपरीतज्ञानप्रतिबध्यतावच्छेदककोटौ तद्धर्मितावच्छेदकपर्याप्ततद्धर्मितावच्छेदकतापर्यन्ता
निवेशादित्यभिप्रायेण समाधत्ते ॥ यत्त्वहीति। व्यावर्तकधर्मदर्शनस्य धर्मितावच्छेदकावच्छिन्नत्वावगाहित्वं स्पष्टयितुं व्याचष्टे। दीधि
तौ यत्त्वयत्त्वावच्छिन्न इति। परेतु धूमसामान्ये संशयो मा भूदिति व्यावर्तकधूमत्वेन निश्चिते पर्वतीयत्वरूपसामान्यधर्मविशिष्टे तदवच्छेदेना
व्याप्यत्वसंशयो मा भूदित्यर्थः विशेषसंशयश्चेत्यादेः पूर्वोक्त एवार्थः समानविषयकत्वमेव विरोधितायां तत्त्वं ननु समानप्रकारकत्व
मपीत्याशयेन समाधत्ते। यत्त्वहीति। यथाश्रुतार्थकमेवतत्त्वा। समानधर्मिकव्यावर्तकधर्मदर्शनं च ॥ सामान्ये। सामान्यधर्मविशिष्टविशेष्यकं
विशेषे विशेषधर्मविशिष्टविशेष्यकं तथा च पर्वतीयधूमे पर्वतीयत्वमात्रेण धूमत्वनिश्चयेपि पर्वतीयधूमत्वपुरस्कारेण संशय

त०प०
१९

संभवतीति भावः यद्यपि भिन्नधर्मिकस्यापि धूमत्वे व्याप्यत्वावच्छेदकतावगाहिनिश्चयस्य धूमत्वघटितधर्मावच्छिन्नविशेष्यताकसंशयप्रतिबंध
कत्वात्तादृशनिश्चयादपि प्रकृते संशयनिवृत्तिः संभवति तथापि शुद्धपर्वतीयत्वावच्छेदेनाव्याप्यत्वशंकानिरासार्थं धूमत्वनिश्चयस्याद
रणीयतया तत एव पर्वतीयधूमत्वावच्छिन्नविशेष्यकसंशयनिवृत्तिरुपपादिता समानविषयकत्वेन विरोधिता वादिना धर्मितावच्छेदकेऽप
वच्छेदकत्वावगाहिनोऽपि भिन्नधर्मिकज्ञानस्याविरोधित्वाभिप्रायेणैवेति स्वातंत्र्येण मूलं वर्णयति सामान्यप्रत्यासत्तिमनंगीकुर्वतो व्याप्ति
निश्चयस्य पर्वतीयधूमाविषयकतया धूमत्वे व्याप्यत्वावच्छेदकत्वावगाहित्वेऽपि धूमत्वघटितधर्मावच्छिन्नपर्वतीयधूमधर्मिकसंशयविरो
धित्वे विवादः संभवतीति दृष्टांतेनानुभवं द्रढयन्निराकुरुते यथाहीति । तदभावेन विशिष्टेन तत्संशय इति योजना ॥ धर्मिविशेषण
त्वं च तदभावादीनां धर्मितावच्छेदकताख्यविषयत्वं स्थाणुत्वाभावव्याप्यवक्रकोटरादीति स्वतंत्रज्ञानदशायामपि स्फुटं करत्वाद्यवच्छिन्नधर्मि
तावच्छेदकीकृत्य स्थाणुत्वादिसंशयानुदयात् व्याप्तिविशिष्टेत्युपेक्ष्य व्याप्यतया गृहीतेनेत्युक्तं । तदव्यवहिततया कृक्षणे तत्क्षणे वा त
स्य पुंसो व्याप्यतया निश्चयविषयेणेत्यर्थः । तदभावेन तदभावव्याप्तिविशिष्टेन च विशिष्टे तद्वत्ताज्ञानमाहार्यमेव प्रसिद्धमिति । तादृशत्ता

राम
१९

नेच्छाया एव हेतुत्वात्॥ तदभावादेव नाहार्यतादृशसंशयप्रसंगः करादिमान् स्थाणुर्न वेति संशयः करत्वाद्यवच्छिन्नेस्थाणुत्वाभावव्या
प्तिनिश्चयशून्यकाले इच्छां विनापि प्रसिद्ध इत्यनाहार्यतादृशज्ञाने तथाविधव्याप्तिनिश्चयत्वेन प्रतिबंधकतां कल्पयित्वा तादृश
निश्चयपदशायामसौ निरसनीयः तथेत्यादि। तद्विशिष्टेपि न तत्संशय इत्यनुषंगेणान्वयः पक्षवच्छेदेन तदभावादिनिश्चयः तस्या
पि तदभावादितुल्यत्वादिति भावः अनुभवबलादित्याग्रिमहेतौ त्वन्वयानुरोधेन इत्यविवादं इति हरणीयं ननु धूमत्वावच्छेदेन व्या
प्यभावव्यावर्तकधर्मः प्रकृतेन गृहीतो अपि तु तदभावो व्याप्तेरेवेति व्यावर्तकपदस्य तदभावावच्छेदकमात्रपरत्वाभिमानिनामा
शंकां निराकरोति। व्यावर्तकश्चेति। स्थाणुत्वाभावव्याप्यः करः करवांश्चायमिति ज्ञानदशायामप्ययं स्थाणुर्न वेति संशयविरोधि
तया व्याप्तिविशिष्टवैशिष्ट्यरूपेस्य व्याप्यतया गृहीत इत्फकं। अथ पदवच्छेदेन तदभावो वगतस्तस्य पक्षस्तदभावावच्छेदकत्वेनावग
न इत्येवार्थः। अवच्छेदकत्वं चानतिरिक्तवृत्तित्वं ननु स्वरूपसंबंधविशेषः पुरुषत्वादौ स्थाणुत्वाभावादेस्तादृशावच्छेदकतया अप्रा
माणिकत्वात्। मीमांसकानामपि धूमत्वादौ व्याप्यानतिरिक्तवृत्तित्वज्ञानमेवानुमितिहेतुत्वेनोपगतमित्यभिप्रायेण मूलं संगम

नीयं॥ एवं चानतिरिक्तवृत्तित्वस्य व्याप्तिरूपतया व्याप्यतयाग्राहीतस्त्वनेन पौनरुक्त्यं। न च पदावच्छेदेनेत्यादेर्यत्र पदाभावस्य व्याप्तिः
संसर्गतया अवगतेति व्याप्यतये सस्य व्याप्तिप्रकारेणेत्यर्थ इति भेदः पुरुषो न स्थाणुरित्याकारके पुरुषत्वावच्छेदेन स्थाणुत्वाभावग्र
हे च पुरुषत्वांशे व्याप्तिः संसर्गतयैव भासते न तु प्रकारतया तद्विशिष्टबोधकपदानुल्लेखात्॥ संसर्गतया प्रकारतया च कथनं भा
नस्य शब्दरूपप्रतिबंधकताभेदसूचनाय तत्प्रकारकज्ञानस्य तदीयसंसर्गविशेषावगाहित्वेनैव प्रतिबंधकतायां अनतिप्रसंगा
य कल्पनीयतया तत्संसर्गकज्ञानस्य तदीयसंसर्गानवगाहितया तेन रूपेणासंग्रहादिति वाच्यं॥ संसर्गता संसर्गविशेषावच्छिं
न प्रकारतयोः संसर्गविशेषानवच्छिन्नप्रकारतान्यविषयतात्वेनानुगमेनातिप्रसंगविरहात् इति चेन्न। अवच्छेदकावच्छेदेन स्थाणुत्वा
भावादिज्ञाने अवच्छेदकांशे व्याप्तिः संसर्गतयापि न भासते पुरुषो न स्थाणुरित्यादिज्ञानस्य पुरुषत्वांशे निष्प्रकारताकया अनुभ
वसिद्धत्वात् किंतु धर्मितावच्छेदकपुरुषत्वादिव्यापकताविशिष्टविशेषणतैव स्थाणुत्वाभावादेः पुरुषत्वादौ संसर्गतयाभास
ते॥ एवं च यद्व्यापकताविशिष्टविशेषणतासंसर्गेण तदभावो धर्मिण्यवगत इत्येव पदादित्यादेरर्थ इति न पौनरुक्त्यं॥ यदि च विशे

षणतात्वेनव्यापकतायासंसर्गघटकत्वेऽप्रमेयत्वाद्यवच्छेदेनस्थाणुत्वाभाववाँदिशानमपिप्रमास्यादितिस्थाणुत्वाद्यभावीयविशेषणतात्वेन
व्यापकत्वमेवतथावाच्यं॥तथाचस्थाणुत्वाद्यभावस्यापिसंसर्गोतः पातित्वेतद्दशाएवव्यापकत्वभावमुचितं॥नथासतिस्थाणुत्वा
भावः पुरुषनिष्ठाभावाप्रतियोगी अयंचपुरुषइत्यादिशाब्दस्यस्थाणुत्वाद्यभावधर्मिकपुरुषत्वादिव्यापकतायहसहितपु
त्वे रुषत्वादिप्रकारकनिश्चयैनप्रतिबंधकतायाअयंस्थाणुर्नवेतिसंशयंप्रतिक्रमसत्वात्पुरुषोनस्थाणुरयंचपुरुषइत्यादिशा
नस्यापितद्रूपाक्रांततयानदृष्टकूप्रतिबंधकत्वंउक्तशाब्दप्रतिबंधकतायांव्यापकतीयसंसर्गविशेषावगाहित्वान्निवे
शेपिनक्षतिः व्यापकताविशिष्टघटितसंसर्गज्ञानेपिविशिष्टघटकवैशिष्ट्यावगाहित्वाभावादितिमन्यते। तदापदित्यादेरपिय
व्यापकतयातदभावोवगतइत्येवार्थः॥नचव्याप्तिघटकसामान्याधिकरण्यांशमानस्याप्रयोजकतयायोवेत्यादेरप्युक्तएवार्थ
इतिपौनरुक्त्यंदुर्वारमितिवाच्यं॥व्यापकतापदेनतद्वद्न्यावृत्तित्वस्यैवाभिहितत्वात्॥व्यापकसामानाधिकरण्यज्ञानस्यपदवच्छेदे
नेत्याद्यंतर्भावेपिक्षतिविरहात्॥वस्तुतस्तुव्याप्यस्याभावांशेतद्धर्मव्यापकतायासंसर्गघटकविशेषणविधयाभानमात्रंनविरोधितायां

ग.प.
२१

प्रयोजकं तथा सति यत्र पुरुषोऽन्तरः स्थाणुरित्यादिज्ञाने करादिव्यापकताविशिष्टस्थाणुत्वाद्यभावीयविशेषणतादैः संसर्गतयाभा
नं तादृशज्ञानसहितस्य करादिमानयमित्यादिज्ञानस्यापयं स्थाणुर्नवेत्यादिसंशयविरोधिताप्रसंगात् अतस्तद्धर्मविशिष्टे
ग्राह्याभावावगाहित्वसहितमेव तद्धर्मव्यापकतायाः तथाभानं विरोधिताप्रयोजकमित्युपेयं तथा च ग्राह्याभावांशे तद्धर्मव्या
पकताप्रकारकस्य तद्धर्मविशिष्टे ग्राह्याभावानवगाहिज्ञानस्य तद्धर्मवत्ताज्ञानधर्मितावच्छेदकविशिष्टविरोध्यकज्ञानविरोधि
तयाऽनतद्भावव्याप्यतद्भावावच्छेदकधर्मदर्शनयोरेकरूपेण प्रतिबंधकतासंभवः न च ग्राह्याभावे तद्धर्मव्यापकताप्रकारक
स्यैव संसर्गघटकतया तद्विषयकस्यापि तद्धर्मविशिष्टे ग्राह्याभावानवगाहिनो ज्ञानस्य विरोधित्वमिष्टमेव संसर्गघटकविष
यतायाः प्रकारतातुल्यत्वादिति वाच्यं। तथा सति पुरुषः स्थाणुर्नवेत्यादिसंशयस्यापि स्थाणुत्वाद्यभावांशे पुरुषत्वादिव्या
पकताविषयकतया तत्सहितपुरुषत्वादिप्रकारकस्य स्वसमानधर्मितावच्छेदककस्थाणुत्वादिविशिष्टज्ञानाविरोधितायाः
निर्बीजत्वापातात् न हि त्वन्मते तादृशसंशयस्य संशयत्वमेवाविरोधित्वबीजमिति संभवति। पुरुषत्वविशिष्टे स्थाणुत्वाभावावगाहित्वा

राम
२१

यविरोधितायामप्रयोजकत्वेन स्थाणुत्वाभावांशे संशयत्वस्य घटादिरूपोदासीनविषयांशे संशयत्वतुल्यत्वात्॥ एतेन पुरुष
त्वादिसामानाधिकरण्येन स्थाणुत्वादिविशिष्टबुद्धौ पुरुषत्वाद्यवच्छेदेन तद्विपरीतनिश्चयस्य विरोधितायां अभावांशे पुरुष
त्वादिव्यापकतावगाहित्वमेव बीजं न तु पुरुषत्वादिविशिष्टे अभावावगाहित्वमपि तच्च तदनवगाहिनोपि स्थाणुत्वाभाव
व्याप्यपुरुषत्वं पुरुषत्वव्यापकः स्थाणुत्वाभावः इत्यादिव्यापकताप्रकारकज्ञानस्य पुरुषः स्थाणुरित्यादिधीविरोधित्वात्॥
तथा च तादृशव्यापकताप्रकारकज्ञानस्य तादृशव्यापकताविषयकत्वेनैव प्रतिबंधकतासंभवात्। अवच्छेदकावच्छेदे
न बाधबुद्धौ दृश्यक्रमप्रतिबंधकतायां मानाभावस्तस्याप्युक्तानुगतरूपाक्रांतत्वात्॥ एवं धर्मितावच्छेदकसामानाधिकरण्येना
भावविशिष्टबुद्धेर्धर्मितावच्छेदके प्रतियोगिव्यभिचारधीरूपतया अवच्छेदकावच्छेदेन प्रतियोगिविशिष्टज्ञानस्य तत्प्रतिबध्यते
प्रतियोगिन्यवच्छेदकव्यापकतावगाहित्वमेव बीजं तथा च व्यापकताप्रकारकतत्संसर्गकज्ञानसाधारणानुगतरूपेण प्रतिबध्यता
कल्पनसंभवात् अवच्छेदकावच्छेदेन विशिष्टबुद्धावच्छेदकसामानाधिकरण्यावगाहिबाधबुद्धेरपि दृश्यक्रमप्रतिबंधकत्वेमा

मु.प.
२२

नाभावः नरत्वादरशव्यभिचारज्ञानस्य व्यापकताज्ञानविरोधित्वमेव नास्तीति वाच्यं ॥ लाघवेनैव तद्विरोधितास्वीकारौचित्यात्
प्राचीनसिद्धांतसिद्धत्वाच्चेति परास्तं ॥ संसर्गविधया व्यापकतामात्रावगाहित्वस्यैव विरोधितावीजत्वे अवच्छेदकावच्छेदेनाभावाव
गाहिनः पुरुषः स्थाणुर्नवेत्यादिसंशयस्य पुरुषः स्थाणुर्नवेत्यादिज्ञानाविरोधितायां निर्वीजतापातात् तादृशव्यापकतावगा
हित्वस्य व्यापकतानिरूपकधर्मविशिष्टे स्वाश्रयाभावावगाहित्वसहितस्यैव विरोधितावीजतया करादिव्यापकताविशिष्टस्थाणु
त्वाद्यभावं संसर्गघटकतयावगाहमानस्य पुरुषो न स्थाणुरित्यादिज्ञानस्य करादिमान् स्थाणुरित्यादिज्ञानाप्रतिबंधकत्वनिर्वाहा
यतद्धर्मावच्छिन्नविशेष्यकत्वाश्रयाभावावगाहित्वे तद्बाधबुद्धेर्ग्राह्याभावांशे व्यापकताप्रकारकबुद्धेस्तद्व्याप्यधर्मधर्मितावच्छे
दककबुद्धौ तादृशव्यापकताप्रकारकत्वेन स्वरूपप्रतिबंधकताया अवश्यकत्वात् व्यभिचारधियो व्यापकताग्रहविरोधित्ववादि
नां ग्राह्यांशे तत्संशयस्यापि तद्विरोधिताया अनुमततया संसर्गविधया व्यापकतावगाहित्वस्य तत्र विरोधितावीजत्वे पुरुषः स्थाणु
र्नवेत्यादिसंशये अवच्छेदकावच्छेदेन स्थाणुत्वाद्यभावावगाहिताया एव अनुपपत्तेः चेति ॥ यदि चावच्छेदकसामानाधिक

राम
२२

रूपमात्रेण तदवच्छेदेन विशेषणमवगाहमानयोर्बुद्ध्योर्वैलक्षण्यविरहाद्यावच्छेदकावच्छेदेन वृत्त्यौ व्यापकतायाः संसर्गघटक
पातेभावमुपेयते पुरुषत्वादिधर्मितावच्छेदकवृत्त्यौ च करादिव्यापकतायाः संसर्गघटकतयाभानमप्रामाणिकं तदा पुरुषो न
स्थाणुरित्यादिज्ञानसहितस्य करादिमत्ताज्ञानस्य स्थाणुत्वादिविशिष्टधीविरोधित्वात्र सम्भवेदनुगतरूपेण वप्याद्याभावांशे
तद्धर्मव्यापकताप्रकारकज्ञानस्य तद्धर्मावच्छेदेन तद्व्याप्याद्याभाववत्ताज्ञानस्य च तद्धर्मदर्शनप्रतिबंधकतापानिवेशः। पुरुषस्था
णुर्नवेत्यादिसंशये कालीनपुरुषत्वादिग्रहस्य अविरोधित्वोपपत्तये व्यापकताज्ञाने पुरुषत्वाद्यवच्छिन्नविशेष्यकस्थाणुत्वा
दिसंशयभेदे निवेशनीयः। स्थाणुत्वाद्यभावांशे व्यापकताप्रकारकनिश्चयस्तादृशस्थाणुत्वादिसंशयस्वरूपोनास्त्येव तादृशनिश्च
यस्याप्यकाले पि तादृशसंशयविरोधित्वात्सत्वेन तादृशसंशयरूपव्यापकताप्रकारकनिश्चयासंग्रहभयेन तादृशस्य भेदस्य प्रति
बंधकत्वावच्छेदकत्वासंभवस्यावकाशः। एवं तादृशसंशयभेदं निवेश्य पुरुषत्वाद्यवच्छेदेन स्थाणुत्वाभाववन्निश्चयसाधारणेन रू
पेण स्थाणुत्वाभावः पुरुषत्वव्यापक इति बुद्धेः पुरुषस्थाणुरित्यादिधीप्रतिबंधकतासंभव इति ध्येयं। अत्रापि ज्ञानं जंतमुपे

ग.प.
२२

स्यं अवगतो गृहीत इति निश्चितं तत्प्रयोगोपदेशसंशयानुत्पादे निर्वाहः तद्व्यवहितप्राक्क्षणे तज्ज्ञानसत्त्वमपेक्षितं न तु तदैवेति ज्ञाभावप्र
तेन चिरविनष्टज्ञानजोद्बुद्धसंस्कारसत्त्वेपि संशयानुत्पादज्ञाभावप्रत्याभिधानमिति हेयं उद्बुद्धसंस्कारज्ञानयोरनुगमासंभवेन
एकरूपप्रतिबंधकतापावान्यतयागौरवात्॥ उद्बुद्धसंस्कारात्स्मरणस्यावश्यकतयानैव कार्यकालवर्त्तिता संशयप्रति
बंधसंभवाच्च। यदवच्छेदेन व्यावर्तकदर्शनं तद्धर्मविशिष्टेन संशयरूपत्वमेव विशिष्य दर्शयति यद्वेति॥ स्थाणुत्वाभावस्य पुरु
षत्वावच्छेदेन ग्रहे पुरुषः स्थाणुर्नवेति न संशय इत्येकोऽन्वयः। एवं स्थाणुत्वाभावस्य पुरुषत्वावच्छेदेन ग्रहे पुरुषत्वस्येदंत्वावच्छेदेन ग्र
हेऽयं स्थाणुर्नवेति न संशय इत्यपरः। चरमश्चेत्स्फुटः एव। तदर्स्योन्याभावादिरित्यस्य व्यावर्त्तकतया बोध्य इत्यर्थकेनाग्रिमेणाद्ध
श्च्य इत्यनेन संबंधः। सर्वत्रादिपदात्तदवच्छेदकतद्व्याप्यरूपव्यावर्तकयोः परिग्रहः। तत्पदं सर्वत्र यथास्थं परं॥ संशयत्वं स्वव्यावर्त
कदर्शनप्रतिबध्यतावच्छेदकत्वं भ्रमं निराकरोति एवमिति। न तद्रूपोपीति व्यावर्तकधर्मदर्शनदशायामित्यादिः तथाच संशयनि
ष्ठसाधारणज्ञाप्यत्वमेव तत्प्रतिबध्यतावच्छेदकमिति भावः विशेषदर्शनस्य व्यावर्तकदर्शनस्य। विपरीतज्ञानमात्रेति। तस्मा

राम
२२

नसामान्येत्यर्थः अग्नेधूमत्वपुरस्कारेणेत्यादौ प्रमेयमित्यस्य समानलिंगं पक्षे रूपविशेष्यपदं पूरयति इदमिति। इदंत्वस्य तेजो
भावत्वात्मकत्वे तदवच्छिन्ने भावत्वसंशयायोगात् हृदिरणोति॥ नीलत्वेनेति। मूले अनुमानमनुमितिः तथा चेदं भावो अभावो वेति
संशयपृष्ठलेशाय मानमिदमुभयथापि प्रमेयमित्यनुमितिस्तत्वमतेनस्यादित्यर्थः उभयथापीदं प्रमेयमिति ज्ञानस्यावधारणत्वला
भात्तादृशज्ञानस्यानुमितित्वं लभ्यते अनुमित्यनुत्पत्तौ हेतुरग्रहादित्यंतः अग्रहादित्यस्य पक्षधर्मतानिश्चयमकारयेता
दिः अग्रेतादात्म्यसंबंधेनान्यतरवत्तो लिंगत्वमुपेत्य अन्यतरस्य धर्मस्य लिंगतायाः सिद्धांतेपि प्रमाणतया अत्रापि भावत्वा
दिरूपनिधर्मस्य लिंगतावच्छेदकस्यावहे मूलतात्पर्यमवगम्यते इत्यभिसंधायभावत्वादिपदं भावस्वत्वादिपरतया व्याचष्टेदी
धितौ भावत्वाभावत्वयोरिति॥ अप्रसिद्धेरभावस्यतुर्निरूपतयालिंगत्वाभावादित्यसंभवपरतयाहेतुंपूरयव्याचष्टे॥ अप्रसि
द्धत्वेनेति। भावभेदवैशिष्ट्यस्याभावभेदाश्रितितया लिंगतावच्छेदकघटकतासंभवोर्तिपर्यवसितो अर्थः ननु परैः केवलान्वय्यनुमा दि
नानंगीकारात्॥ भावभिन्नपदार्थानंगीकाराच्च भावभिन्नत्वरूपाभावत्वघटितान्यतरत्वावच्छिन्नलिंगेन प्रमेयत्वानुमानो

ग॰ प॰
२४

पश्चादेवं विरुद्धमित्यत आह भावत्वाभावत्वादिकमिति। अतिरिक्तं चेति। यद्यप्यभावस्याधिकरणरूपत्वेपि स्वरूपसंबंधादिरूपाभावत्व
घटितान्यतरस्य हेतुतासंभवस्तथापि दर्शितसंशये भावभेदस्य कोटितया तद्घटितान्यतरस्य हेतुत्वं मूलाभिप्रेतमित्याशयेनेदं साध्य
स्य केवलान्वयित्वज्ञानकाले यत्किंचिद्रूपावच्छिन्नस्यैव वृत्तिमतो लिंगतासंभवतीति मूले तदकथनात् न्यूनतां भंगयाह॥ केवला
न्वयिन इति॥ अयमालोको धूमो वेति संदेहदशायां धूमालोकान्यतरत्वस्यानुमापकत्वरूपं लिंगत्वमुक्तं वह्नौ साध्येप्यधिकरणतया
नसंभवतीति साध्यांतरं पूरयति। व्याप्यत्व इति। वन्ह्यादिव्याप्यत्वे साध्ये इत्यर्थः। लिंगपदस्यापरत्वलिंगतावच्छेदकपरत्वेन व्याप्यादिसा
ध्यपरतया मूलसंगतिरित्याह॥ लिंगतावच्छेदकं चेति। ननु यद्धर्मिकव्यतिरेकज्ञानप्रतिबध्यं तत्तद्धर्मिकतन्निश्चयत्वावच्छिन्नजन्यमि
त्येतादृशं यत्पक्षीयधूमधर्मिकसाध्यव्याप्तिनिश्चयत्वेनानुमितिहेतुत्वसाधिकायां मूलोक्तव्याप्तेर्ग्राह्यव्यतिरेकनिश्चयप्रतिबध्ये
घटत्वाद्यौ व्यभिचारज्ञानसामान्यप्रतिबध्ये अव्यभिचारज्ञाने च व्यभिचार इत्याशंक्याह॥ यत्संशयेति। व्याख्यातत्वमिति॥
तन्त्वत्वसंशयस्याधारणव्यतिरेकज्ञानत्वेन प्रतिबंधकत्वं नास्ति घटकं यावत्संशयस्य सर्वेन्नैवाप्रतिबंधकत्वोपगमात् अव्यभि

राम
२४

चारग्रहेऽपि व्यभिचारनिश्चयत्वेनैव प्रतिबंधकत्वमिति। अथेत्यादिशंकायां व्याप्तिपरत्वे स्वप्रमनुपपत्तेर्वक्ष्यमाणतया फलानुत्प
त्तिनियततत्स्वरूपप्रतिबंधकत्वनिवेशे मूले वक्ष्यमाणस्वरूपासिद्धेः परिहारसंभवेन समाधानासंगतेः लाघवेन विशिष्टपरामर्शकार
णताव्यवस्थापनपरतया तां व्याचष्टे। यद्वेति। व्यतिरेकसंशये कार्यानुत्पत्त्यनुरोधेन निश्चयत्वेन हेतुतायाः पूर्वमाशंकिततया पौ
नरुक्त्याशंकायाः परिहाराय मूलस्य व्याप्यभेदज्ञानमित्यत्र ज्ञानपदस्य निश्चयपरतां स्फुटयितुं व्यतिरेकज्ञानसामान्यमुपेक्ष्य त
न्निश्चयकथनं॥ कार्यानुत्पत्तौ॥ कार्यानुमित्यनिनियते। इत्थं च मूले यद्वस्तुतस्तिप्रतिबंधकमित्यत्र प्रतिबंधकत्वं कार्यानुत्पत्तिनियत
त्वरूपमेवेति बोध्यं। लाघवात्। अवच्छेदकलाघवात्॥ संशयसाधारणज्ञानत्वावच्छिन्नाभावहेतुत्वेऽपि अप्रामाण्यनिश्चयत्वावच्छिन्नाभा
वस्य विशेषणत्वाद्गौरवं बोध्यं। अत एवोक्तं यस्य लाघवप्रदर्शनपरत्वादेव। अनुमितिहेतुः कल्पनालाघवादिति शेषः। वक्ष्य
तीति। उक्तयं यस्यव्याप्तिपरत्वे भेदाग्रहहेतुत्वेऽपि व्याप्तिबलादिविशिष्टपरामर्शस्य कारणतासिद्धेरावश्यकत्वात्तापनिराकृ
त्यभेदाग्रहमात्रकारणतोपगमस्यासंगत्यापत्तेरिति भावः। एवं च समाधाने अनुमितिप्रतिबंधकमित्यस्य कारणीभूताभाव

प्रतियोगि इत्यर्थः फलानुत्पत्तिनियतत्वनिर्वाहार्थं भयोच्यत इति शेषः। येन। यदपेक्षया लाघवेनेत्यर्थः। विशेषदर्शनाद्भ्रमोत्प
त्त्यभावस्य प्रागुक्तत्वान्न चेत्यादिशंकानुत्थितेस्तदाशयं प्रकाशयति॥ तामान्यत इति। धूमत्वस्य विशेषस्य। दर्शनेनेति मूलस्य
उक्तक्रमेण व्याप्त्यभावावच्छेदकतया भानस्य धूमत्वस्य धर्मितावच्छेदकतया स्फुरणेनेत्यर्थो दीधित्यनुसारेण बोध्यः। ननु व्या
प्यपक्षधर्मयोर्भेदाग्रहस्यानुमितिहेतुत्वे तेषां कारणबाधेनानुमित्यात्मकान्यथाख्यातिनिराकरणं विरुध्यते। ह्रद इति वाप्या
दौ वह्निव्याप्यधूमादिभेदाग्रहेण ह्रदादौ वह्न्याद्यनुमितेर्दुर्वारत्वात्। न च फलासिद्ध्या ह्रदादिपक्षकं वह्न्यादिरूपसाध्यकं चान्तर्भाव्यका
रणत्वकल्पनान्नानुपपत्तिरिति वाच्यम्। पक्षविशेषमन्तर्भाव्य पक्षनिष्ठप्रत्यासत्त्या कारणत्वकल्पने नापत्तिसंभवादित्यभि
संधायानुवेत्यादिकल्पे अभिनिवेशमाह॥ अस्तु वेतीति। इतरसकलकारणसत्त्वे यत्सत्त्वे कार्यानुत्पादस्तस्यैव प्रतिबंधकताया आ
वश्यकत्वादिति भावः॥ ननु जनकज्ञानेत्यादिमूलशंकायामभेदग्रहे वैयाधिकरण्यानुमितानुमित्यप्रतिबंधकत्वसाधनपरत्वे असंग
तिः जनकज्ञानाप्रतिबंधकत्वस्यैव हेतुतायाः स्वीकरणीयत्वात् तस्य च स्वमते असिद्धत्वात्। इत्यतः तस्या आपत्तिपरत्वं स्फु

रीकरोति ॥ अभेदज्ञानस्येति । मूले अभेदज्ञानस्य अजनकत्वात् ॥ अतींद्रियादिहेतुकानुमितावुक्तक्रमेण जनकत्वासंभवा

त् । तथा च विपर्ययानुमाने बाधकस्य भावः । नन्वेवमप्युक्तव्याप्तिविरोधात् भेदग्रहस्य प्रतिबंधकत्वानुपपत्तिर्दुर्वारेत्यत आ

ह । दीधितौ तथा चेति । अतथाभूतस्य जनकज्ञानाविरोधिनोपि भेदग्रहस्येति शेषः । अनापत्त्यावकत्वमिति अन्यथा भेदग्र

हदशायामनुमित्यापत्तेरिति शेषः । तथा च तादृशव्याप्तिरेव बाधितेति भावः । संदिग्धत्वइति । नैयायिकैरतींद्रियादिहेतु

कस्थले मानसविशिष्टज्ञानोपगमेन व्यभिचारानिर्णयादिति भावः । ननु लिंगपरामर्शे भेदग्रहस्य जनकज्ञानाविरोधिनः

प्रतिबंधकत्वेपि न व्यभिचारः । व्याप्त्यभावानवगाहित्वविशिष्टस्य जनकज्ञानाविरोधिनोऽप्रतिबंधकत्वोपगमादित्यत आ

ह । विशेषणांतरदानेचेति । ननु गोपदवाच्यत्वे साध्ये गोपदशक्यतावच्छेदकत्वस्य लिंगतावच्छेदकत्वसंभवेपि सास्नादिसाध्य

कस्थले न तथात्वसंभवो गोपदस्यानानार्थकतया अन्यत्रापि तच्छक्यतावच्छेदकत्वावच्छिन्नसत्त्वादित्यत आह ॥ विशेषितं चेति ॥

सास्नादिमद्वृत्तित्वविशेषितं चेत्यर्थः । वाकारो व्यवस्थितविकल्पार्थः । ननु गुणगतजातिमनंगीकुर्वतां मधुरत्वव्याप्यरस

ग॰प॰
२९

गतजातेरभावात्। तल्लिंगतानुपपत्तिरित्यत आह॥ मधुरत्वेति फलांतरेति। तादृशधर्मस्य क्षीरत्वाद्यनुमापकतायाः सर्वसम्मतत्वा
दिति भावः॥ गोत्वप्रकारकत्वं विशेषणमिति॥ गोत्वमिति ज्ञाने तदभावादिति भावः। मूले अन्यथेति। गोत्वमिति ज्ञाने व्यक्तेरप्रकारक
त्वे अनुपयोगात्। उपयोगानुपपत्तेः अवच्छेदकप्रकारकज्ञानविधयैव तस्यावच्छेद्यव्याप्तिग्रहे संबंधितावच्छेदकप्रकारकज्ञा
नविधया व्याप्तिस्मारकत्वेनैव च तस्य परामर्शे उपयोगादिति भावः। दीधितौ लिंगतावच्छेदकत्वासंभवादित्यस्य गोपदप्रवृत्ति
निमित्तत्वादिसाध्यके तादृशस्थले न गोत्वादिहेतावित्यादिः॥ आधेयतया गोविशिष्टस्य गवाधेयत्वविशिष्टस्य च द्रव्यत्वादेरपि गो
मात्रवृत्तितया सास्नादिसाध्यकस्थले समवायेन हेतौ व्यक्तेर्लिंगतावच्छेदकत्वं संभवत्येवेत्यवगंतव्यं। ननु गोत्वत्वशरीरेऽपि
भेदप्रतियोगितावच्छेदकतया गोत्वस्य गोत्वत्वेनैव निवेशनीयतया आत्माश्रय इत्यत आह। गोत्वत्वस्येति अप्रवेशादिति॥ स्व
रूपत एव तत्प्रवेशसंभवादिति भावः॥ मूले नचैवमिति॥ स्वतो व्यावृत्ते गोत्वादावपि धर्मांतरस्वीकारे अनवस्था अविश्रांतध
र्मधाराप्रसंगः प्रामाणिकत्वात् अनवस्था न दोषायेति समाधत्ते। तदितरेति॥ सास्नादौ साध्ये गोत्वत्वघटकसकलगोसम

राम
२९

वेतत्वाद्यंशवैयर्थ्यान्नचत्वंपरित्यज्यतिदीधितावचच्चेति। अत्र पतनहूटकं। य थासाध्यमिति। साध्याद्यौ साध्येगवेतरासम
वतत्वं। विशेषणीभूतंगोसमवेतत्वंवा साध्याव्यापकजातित्वादौ साध्येतरात्म्येनहेतुतापांसकलगोसमवेतत्वंकेवलंव्यापकता
वच्छेदकंवाच्यं। नतुविशिष्टंतं। विशिष्टंतुगोपदप्रवृत्तिनिमित्तत्वादिसाध्यकेतादात्म्येनगोत्वेहेतावित्यर्थः। ननुगवेतरासम
वेतत्वावच्छिन्नसाभावमेयत्वादेः साध्यादिव्यभिचारितया साध्यादिसाध्यकएवकथंतद्व्यापकतावच्छेदकं अतआह॥ कालादावि
ति॥ संबंधसामान्येनहेतुत्वेसकलगोसमवेतत्वांशानिवेशेपि गोत्ववतिसाध्यादिमत्त्वशून्यकालादौव्यभिचारस्यावश्यकतया
समवायेनहेतुत्वस्यअवश्यंस्वीकरणीयतयागवेतरासमवेतत्वसाभावादिसाधारणस्यापिसमवायेनव्यभिचारितायामन
वच्छेदकत्वादित्यर्थः। एतच्चसाध्याभाववद्वृत्तित्वमेवव्याप्तिरित्यभिप्रायेण। यदिचहेतुतावच्छेदकसंबंधेनावृत्तिव्यावर्तनंतेनसं
बंधेनवृत्तिमत्त्वमपितत्रनिवेश्यतेतदा वच्छेदकस्यानतिप्रसक्तत्वनियमेनगवेतरासमवेतत्वेसतिसमवेतत्वमेवसाध्यादिव्यापकताव
च्छेदकंवाच्यंगोत्वाभावेनसाध्याभावादिसाधनेपिप्रतियोगिविशेषणतयागवेतरासमवेतत्वस्यैवनिवेशोननुगोसमवेतत्वांश

ग.प.
२७

स्यापि वैयर्थ्यात् । न च गवेतरासमवेतत्वस्य प्रतियोगितावच्छेदकतया निवेशो तद्वैयर्थ्येऽपि प्रतियोगित्वसमानाधिकरणतया निवे
शो न तथात्वं गवेतरासमवेतत्वरूपाद्यभावस्य गोसाधारणत्वेन व्यभिचारादित्याशंक्यं सकलगोसमवेतत्वस्यापि द्वित्वादिनाभावस्य
गोसाधारणतया सकलगोसमवेतत्वनिवेशेऽपि तादृशरूपावच्छिन्नाभावस्यैव हेतुतायां वाच्यतया तदंशवैयर्थ्यस्य दुर्वारत्वात् विशि
ष्टस्य गोरवेणाभावप्रतियोगितायामप्यनवच्छेदकतया तदवच्छिन्नाभावाप्रसिद्धेश्चेत्याह । व्यतिरेकेऽपीति । संबंधांतरेण गोत्वाभाव
स्य व्यभिचारितया समवायेनेति दर्शितविषया उक्तं ॥ यत्तु गवेतरासमवेतस्य मेयत्वादेः केवलान्वयितया संबंधसामान्येन तत्वावच्छि
न्नाभावाप्रसिद्धिरतः समवेतत्वं निवेश्य मेयत्वाशंकानिवारणाय तदिति । तन्तुच्छं । संबंधसामान्येन गवेतरासमवेताभावस्याप्रसिद्ध्या
व्यभिचारित्वासंभवात् कथं यस्य यत्किंचित्संबंधावच्छिन्नाभावहेतुतायामेव व्यभिचारप्रदर्शनपरतया तद्धेतुतायां चाप्रसिद्धेर्विरहे
णतामारायसमवेतत्वांशसार्थक्याशंकानवतारेण तत्र व्यभिचारदर्शनिस्यानौचित्येनासंगतेः संबंधांतरेण संबंधसामान्येन गो
त्वाभावस्य व्यभिचारितापाकालादेः पक्षत्वे स्वरूपासिद्ध्यतयेति व्याख्यायामु ... रक्षरत्वात् ॥ मूलेऽयमिति । पर्वतवृत्तिरित्यर्थः

राम
२७

आलोको धूमो वेति। अत्र स्वरूपत एव धूमत्वादेःटिता नतु धूमत्वत्वादिना तेन रूपेण धूमत्वादेः कोटित्वे तादृशसंशयस्य स्वरूपतो धूमत्वा
दिप्रकारकपक्षधर्मतानिश्चयाविरोधित्वात्॥ न च संशयस्य भावाभावकोटिकत्वनियमे धूमत्वाद्यभावस्याप्यावश्यकत्वात्तत्प्रति
योगितावच्छेदकधूमत्वत्वादिमानमावश्यकमिति वाच्यं। तथा सति भेदप्रतियोगितावच्छेदकतया स्वरूपतो धूमत्वादिविषयकस्य धू
मादिभेदकोटिकसंशयस्यैवानवच्छिन्नत्वात् तदत्यन्ताभाववत्तद्भेदयोः साम्यकार्यकारितया तद्भेदभावेनापि तत्संशयनिर्वाहा
त् मूले उभयथापि वह्निव्याप्य इति निश्चयकथनं स्वमते हेतुरक्षणाय। अत्र वह्नेः साध्यस्योपादानात् धूमालोकान्यतरत्वं लिंगमित्य
त्र लिंगपदस्य यथाश्रुतार्थकत्वानुपपत्तेस्तद्व्याचष्टे॥ लिंगमिति। व्यभिचारवारणस्याप्रक्रान्तत्वेन न तथेत्यत्र तथापदस्य वक्ष्यमाण
तदर्थकत्वानुपपत्तेः दूरयति। तथा च न व्यभिचार इति॥ न तथेत्यस्य न लिंगतावच्छेदकमित्यर्थो न युज्यते धूमत्वादेरज्ञाने आलोक
त्वाद्यवच्छिन्नेनानुमितावपि तस्य लिंगतावच्छेदकतायाः स्वतदन्यान्यत्वस्य लिंगतावच्छेदकत्वसंभवेन हेत्वसंगतिरतो व्याचष्टे। तेनेति। ते
न तस्य लिंगतावच्छेदकत्वेन प्रकृते धूमत्वस्यैव धूमन्यान्यत्वस्यापि संदिग्धतया तस्य व्याप्यतावच्छेदकत्वखंडनमयुक्तमित्यत आह।

ग.प.
२८

धूमान्यान्यत्वमिति। एकधर्मस्यान्यतरत्वरूपस्य धर्मद्वयस्य धूमत्वालोकत्वरूपस्य तत्त्वे व्यापतावच्छेदकत्वे तथा च गौरवस्य व्यापतावच्छेदक
ताबाधकत्वे वैपरीत्यमेव स्यादिति भावः। एकस्यापि गुरुशरीरत्वे लघुशरीरावच्छेदकद्वित्वमबाधकमित्याह तादृशेति। धर्मद्वयस्येवावच्छे
दकतेत्यादित्यन्वयः। शरीरलाघवमुक्त्वा उपस्थितिलाघवमाह॥ प्रथमेतरेति। लावदन्यतमत्वस्य वह्निधूमालोकान्यतमत्वस्या
वच्छेदकत्वं स्यात् न तु धूमालोकान्यतरत्वस्य तथा च कुतो वैपरीत्यापादनमिति भावः। अन्यतरत्वाश्रयेऽव्याप्तिरेव नास्ति अत एव ते
न रूपेण हेतुप्रयोगव्यासासिध्यावादिनोक्तिग्रहः इत्येवान्यतरत्वस्य व्यापतानवच्छेदकत्वे बीजं तदाश्रयस्य व्यापत्वेन तस्य अवच्छेदक
तायाआवश्यकत्वात् इत्यभिप्रायोन्यतरत्वस्य व्यापतावच्छेदकतानिराकर्त्तुरिति भ्रमेण शंकते मूले न चेति। भ्रमं निराकरोति। त
स्यान्यदिति। न च तदन्यान्यत्वं वह्निव्यापतावच्छेदकमित्युक्तमिति। अन्यतरनिष्ठयोर्विभिन्नव्यापेर्धूमत्वालोकत्वाभ्यामेवावच्छे
दात् प्रत्येकानवच्छेद्यान्यतरत्वावच्छेद्योभयसाधारणअतिरिक्तव्याप्त्यनभ्युपगमादिति भावः। व्यर्थविशेषणघटितधर्मस्य व्याप
तानवच्छेदकत्वे धूमालोकभिन्नभेदवत्त्वमपि न व्यापतावच्छेदकं। तथा च व्यासेरवच्छिन्नत्वनियमात् तादृशभेदे वह्निव्याप्तिनिरू

राम
२८

पिता व्याप्तिरेव न संभवतीति तेन वह्निव्याप्यत्वमपि नानुमातुं शक्यते व्याप्तिव्याप्यत्वेन पक्षधर्मतानिश्चयस्याप्ययोगादिति भवन्मते वह्नि-
व्याप्तिप्रकारकपक्षधर्मतानिश्चयोपि तत्र दुर्घट इत्याशंकते ॥ नचैवमिति। ननु विशेषदर्शनसहकृतमत्यक्षं तत्र व्याप्तिनिश्चायकमि-
त्यपुरुषं तदव्याप्यत्वस्य गुरुतरत्वाद्व्याप्यतानवच्छेदकत्वे व्याप्यतया तद्ग्रहणस्य विशेषदर्शनत्वासंभवादिति पुनः शंकते ॥ नचैव-
मिति ॥ विशेषदर्शनत्वेन प्रत्यक्षसहकारित्वादिति समाधौ विशेषदर्शनत्वेनेत्यस्य व्याप्यदर्शनत्वेनेत्यर्थकत्वे क्रमेण न संभवतीति
व्याप्यदर्शनसाधारणविपरीतसाधनविरोधित्वेनेत्यर्थकतां तस्याह। दीधितौ विशेषदर्शनमिति ॥ व्यावर्तकधर्मदर्शनत्वेनेति ग्राह्य-
विरोधिधर्मदर्शनत्वेनेत्यर्थः ॥ स्वसमानाधिकरणव्याप्यतावच्छेदकांतरघटितमेव न व्याप्यतावच्छेदकमित्याशयेनान्यतरत्वस्य व्या-
प्तिव्याप्यतावच्छेदकत्वं स्वयं व्यवस्थापयति ॥ अन्यचेति ॥ अन्यतरत्वस्य धूमत्वादिरूपत्वे तत्तस्यानवच्छेदकत्वेपि धूमत्वत्वादिना व्याप्य-
तया व्याप्तिप्रकारकपक्षधर्मताधीहेतुतावादिनां व्याप्त्यनुमानं निराबाधमित्यपि बोध्यं। अन्यतरत्वस्य व्याप्यतानवच्छेदकत्वेपि तद-
वच्छेदेन तद्धूमादनुमितिर्भविष्यतीति शंकां निराकुरुते ॥ एवं चेति। ननु गौरवमात्रं न व्याप्यतावच्छेदकत्वे बाधकं तथा सति साक्षा-

ग॰प॰
२९

दिनागवादेर्हेतुताविलयप्रसंगात् किंतु व्यर्थविशेषणघटितत्वमेव धूमत्वादेः अस्येकत्पुनर्यासंग्राहकत्वादुपसंग्राहप्रयोजनकधर्मस्य
नवैयर्थ्यावच्छिन्नतत्तत्त्वनतिरिक्तवृत्तित्वरूपावच्छेदकत्वात् गगनादिज्ञानमेव कारणं अत एवानुमितिजनकतावच्छेदकतान्यतसिद्धज्ञाचद्दूषका
ले धूमत्वदर्शनस्यावच्छेदकधर्मदर्शनतया अयं धूमो वह्निव्याप्यो न वेति शंकाविरोधित्वमप्युपपद्यते गुरोरपि ताहशावच्छेदकत्वमस्य
तमेवेत्यपमालोको धूमो वेत्यादिसंदेहदशायां नानुमित्यनुपपत्तिरित्याशंकायाः प्रथमकल्पे सत्त्वात् तदेव किंचेत्यादि दूषणांतरानु
सरणे बीजमिति सूचयितुं प्रथमहेत्वाभावात्प्रयुक्तमं प्रकाशयन् किंचेत्यादेर्व्याप्यतावच्छेदकप्रकारकज्ञानहेतुत्वासंभवपरतां स्फुटय
ति। असत्त्व वेत्यादिना एवंच मूले व्याप्यत्वज्ञानमित्यस्यावधारणपरतया व्याप्तिप्रकारकपक्षधर्मताज्ञानमेवेत्यर्थः कारणं फले पधायकं
तथाच व्याप्यतावच्छेदकप्रकारकज्ञानव्यवच्छेदात् न तद्धेतुतायां व्यभिचार इति लभ्यते ॥ व्याप्तेर्व्याप्यतावच्छेदकत्वोपगमेनैव यत्तद्दोषस्य
याकस्मादहितत्वात्तत्स्यादितथात्वमनिराकृत्यप्रथमत एव तद्दोषदानमयुक्तमित्याशयं पूरयति व्याप्तेरित्यात्वात्प्रयेनेत्यादिःए
तत्त्वस्वरूपसंबंधरूपावच्छेदकत्वाभिप्रायेण॥ तदभिप्रायेणैव चाव्यसामान्यविशेषव्याप्त्योर्भेदं व्यवस्थापयन् अथेत्यादि मूले तयोरव

राम
२९

च्छेद्यावच्छेदकाभावशंकामूलेसर्कलत्वधूमादिरसिव्याप्तौ भावाभावादिति। विशेषव्याप्तीनां धूमव्यापकवह्निसमानाधिकरणवृत्तिधू
मत्वादीनां अनुगमकस्य व्याप्तित्वस्य दुर्वचतया तासां व्याप्त्यंतरावच्छेदकत्वासंभवादिति भावः। ननु व्यभिचारधीविरोधित्वमेव सक
लविशेषव्याप्तीनामनुगमकव्याप्तित्वं वह्निव्याप्यवानयमित्यादिशब्देनापि तादृशव्याप्तित्वेन व्याप्तयः पक्षधर्मांशे प्रकारतया प्र
त्यायंते एवं साध्याभाववदवृत्तित्वमपि स्वविशिष्टव्यापकताघटितव्याप्तेरवच्छेदकमिति तेन रूपेण यत्र शाब्दव्याप्यावगतिः तत्राप्य
नुमितिरुत्पद्यत एव॥ एवं अव्यतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य स्वसाधारणतया तदनुसरणे न क्वचिदपि काचिदप्यनुपपत्तिरित्याशं
क्य व्याप्तेर्व्याप्यतावच्छेदकत्वमभ्युपेत्यापि शाब्दपरामर्शजानुमितौ व्यभिचारमुपपादयति॥ वस्तुतस्त्विति॥ अतिरिच्यतामित्वस्य स्वसा
धारणमनतिरिक्तवृत्तित्वरूपमवच्छेदकत्वं वा आश्रीयतामिति शेषः। अतिप्रसंगाद्धूमत्वाद्यवच्छेदेन व्याप्तिज्ञानरहितस्यापि धूमवानय
मित्यादिज्ञानादनुमितिप्रसंगात् हृदस्तेतत्कालीनग्रहविषयः न च तदानीमिति। पर्वतो वह्निव्याप्यवानयमिति शब्दः श्रूयतेरस्यर्थः गृह्य
तेत्यस्य पक्षधर्मताग्रहकाले व्याप्तौ व्यापतावच्छेदकत्वग्राहकशाब्दाभावादिति भावः। अनुमितिरपक्षयेति॥ अनुमित्यभावः

ग॰ प॰

३०

कल्पनीयस्त्वर्थः साध्याभावात्तत्कल्पकाभावादुक्तरूपेण कारणताया असिद्धौ कारणाभावासिद्धेरिति भावः ननु तत्रस्मरणादिरूपतादृश
व्याप्तिज्ञानसंभवात्तत्र व्यभिचार इत्यस्य यरस्य तत्राह॥ कल्प्यत्वेति। लघुरूपं व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वं अयं चापि चेत्यादिमूल
स्यैवार्थ इति तत्कल्पन एव निर्भरो दर्शितः एतेन कारणीभूतसकलपक्षधर्मताज्ञानासंग्राहकत्वेनातिप्रसक्तत्वेन च व्याप्तिग्रहेति। तादृ
शधर्मो व्यापकतावच्छेदकधूमत्वादिरिव व्याप्तिरपीति न शाब्दपरामर्शासंग्रह इति भावः धूमो वह्निव्याप्य इति निश्चयसहिताद्व
व्यवान यमित्यादिज्ञानादनुमितिकारणायमात्रेति: प्रमेयसामान्यहेतुकवाच्यत्वाद्यनुमितिस्वीकारे स्वव्यापकतद्विषयताकत्वमेव तत्
द्विषयमात्रवृत्तित्वं केवलान्वय्यनुमानानुपगमे तु तद्विषयान्यावृत्तित्वमेव चाहृशरूपेण व्याप्तिग्रहविषयतानियतत्वं तादृशानिष्ठा
वच्छेदकताश्यावच्छेदकत्वाविरूपकत्वं प्रकारतायां निवेश्यं अतो न धूमो वह्निव्य इति ज्ञानदशायां जातित्वादिना धूमत्वादिप्रकार
कज्ञानादतिप्रसंगः स्वरूपतो धूमत्वादिप्रकारकज्ञानसंग्रहाय तादृशरूपावच्छिन्नत्वमुपेक्षितं तथा तायोगादृष्ट्यादिव्याप्तिग्रह
विषयमात्रवृत्तित्वासंभवात्सामान्यप्रत्यासत्तिविनासकलधूमादीनां व्याप्तिग्रहे भानासंभवादिति भावः आदिपदेन सकलधू

राम

३०

मादिरितिव्याप्तेरपिपरिग्रहः एतावता धूमत्वादिप्रकारकस्य व्याप्तिप्रकारकस्य च पक्षधर्मताज्ञानस्यासंग्रहो दर्शितः अतिप्रसंगं दर्शयति
। वह्निव्याप्यमिति । धूमत्वे व्याप्तिग्रहविषयतानियतत्वनिर्वाहकस्य व्याप्तिग्रहे सकलवह्निव्याप्यविषयकत्वस्याभावात् । सर्वमितिप
तेच्च ज्ञानमनुमितिरूपं सामान्यप्रत्यासत्त्यनंगीकुर्वतां तेषां मते पक्षे सकलवह्निव्याप्याभानासंभवात् । सामान्यप्रत्यासत्त्युपग
मे पक्षे चादूषणमिदं । अन्यथाख्यातिमनंगीकुर्वतां सर्वस्मिन् वह्निव्याप्तिविधेयकज्ञानासंभवादन्यथाख्यातिस्वीकारे चैतादृशा
न्यथाख्यातिकाले धूमवान् पर्वत इति ज्ञानादनुमितेरिष्टत्वात् वह्निव्याप्यत्वस्य स्वसमनियतसर्वत्वधर्मितावच्छेदकतापन्न
स्योद्देश्यतावच्छेदकत्वं सूचयितुं प्रमेयमिति विधेयवाचकपदांतरानिर्देशः धूमत्वावच्छेदेन व्याप्तिज्ञानदशायामनुक्ताज्ञानादनुमि
तेरिष्टत्वात् धूमत्वांशे व्याप्तिसामानाधिकरण्यमात्रावगाहितां सूचयितुं धूमइत्यनभिधाय धूमव्यक्तिरिति ॥ शाब्दज्ञानासंग्रह
इति वह्निव्याप्यवानयमित्यादिशब्दस्य व्याप्तौ व्याप्यतावच्छेदकतापाश्चसामानाधिकरण्यस्याप्यबोधकत्वादिति भावः । अत एवा
तिप्रसंगस्य दुर्वारत्वादेव व्याप्तिभानांशे इत्यादेः व्याप्तिप्रकारतांतर्गतप्रकारताश्रयो व्याप्तिग्रहविषयतानियतो धर्म इत्यर्थः व

ग॰प॰
३१

ह्निव्याप्यं सर्वं प्रमेयं धूमवान्पर्वतइत्याद्युक्तज्ञानवारणाय निरुक्तप्रकारताश्रयत्वं धर्मविशेषणं धूमे वह्निव्याप्ये अभाववत्वानयमित्यादिज्ञा
नवारणाय व्याप्तिग्रहविषयतानियतत्वमुपात्तं तथैवेति। तादृशधर्मानिर्गतत्वस्य भेदाभेदसाधारणत्वादिति भावः धूमत्वादिकं तथैवेत्यनुषं
गेणान्वयः। धूमसमानाधिकरणेत्यादीति साध्याभाववदवृत्तित्वरूपव्याप्तिग्रहस्थलेच ज्ञानद्वयादनुमितिर्मेघानां गीकार्येति भावः
वह्निव्याप्यसर्वमित्यत्र तदभाववदवृत्तित्वरूपव्याप्तिज्ञानमेव विवक्षितं धूमव्यापकवह्निसमानाधिकरणधूमत्वादिरूपवह्निव्या
प्तिभाने धूमत्वादिप्रकारकपक्षधर्मताज्ञानादनुमितेरिष्टत्वात् तथा च वह्नित्वमात्रस्य साध्यतावच्छेदकत्वे धूमत्वादेः न व्याप्तिप्रकार
तांतःपातिप्रकारताश्रयत्वमतो धूमसमानाधिकरणवह्नित्वावच्छिन्नसाध्यकानुमानं। साध्यतावच्छेदकप्रकारतांतःपातित्वे
न व्याप्तिप्रकारतांतःपातिप्रकारत्वाविशेषणे उक्तस्थले दोषाभावादाह। प्रमेयत्वव्याप्यमिति। अत्र चाभिधेयत्वाद्यवच्छिन्नव्यापकमे
यत्वसामानाधिकरण्याभिधेयत्वादिरूपव्याप्तिरभिप्रेता न तु साध्याभाववदवृत्तित्वविशिष्टसाध्यसामानाधिकरण्यरूपासाध्याभा
वस्याप्रसिद्धेः। मीमांसकैरन्यथाख्यात्यनभ्युपगमात् भ्रमात्मकतादृशव्याप्तिज्ञानमादायतन्मतेतिप्रसंगाभावात् न वा समाना

रा॰म॰
२१

धिकरणत्वावच्छिन्नव्यापकसाध्यसामानाधिकरण्यरूपतादृशव्यापकताग्रहदशायां समानाधिकरणत्वप्रकारकज्ञानादनुमितेस्तेषा
मिष्टत्वादतिरिक्तत्वग्रहे। व्याप्तिशून्यवृत्तित्वग्रहे अनुमित्यापत्तिः वह्निव्याप्यं सर्वं प्रमेयं धूमवान् पर्वत इत्यादिज्ञानादित्यादिः
एवंविधेऽशापत्तेश्चेति व्याप्तिग्रहविषयधर्मिविषयकपक्षधर्मताज्ञानत्वेनैवानुमितिहेतुता वह्निव्याप्यो धूमोऽद्रव्यवान् पर्वतइ
त्यादौ द्रव्यत्वादेरतिरिक्तवृत्तित्वग्रहे सत्त्वप्रतिबंधकस्य ग्रहे अनुमित्यापत्तिरित्यस्यापि वक्तुं शक्यतया व्याप्तिग्रहविषय
धर्मिमात्रवृत्तिधर्मप्रकारकत्वादिविशेषणवैयर्थ्यापातादित्यर्थः। अत्रेशापत्तौ प्रतिबंध्यंतरमाह। व्यभिचाराग्रहेति। एवकारे
ण व्याप्तिज्ञानहेतुताव्यवच्छेदः व्याप्तिज्ञानशून्यतादशायां व्यभिचाराग्रहे तद्दशानुमित्यापत्तिसंभवात्। यदि व्यभिचार
व्यभिचारयोर्द्वयोरेव यत्राग्रहः तत्रानुमितेरनुभवविरुद्धत्वात् तत्र नैवापत्तिः संभवतीत्युच्यते॥ तदा प्रमेयत्वव्याप्यं सर्वमि
त्यादिज्ञानादनुमितेरनुभवविरुद्धत्वात् प्रकृतेपीशापत्तिर्न संभवतीति भावः। ननु व्याप्तिप्रकारतानिरूपितायासंसर्गतात्वं निरूपि
ताविशेष्यविषयतात्वं निरूपकीभूतायाविषयतात्वन्निरूपकीभूतो यो व्याप्तिग्रहविषयमात्रवृत्तिधर्मः तत्प्रकारकपक्षधर्मताज्ञा

ग॰ प॰
३२

नत्वेन हेतुतावाच्या तादृशधर्मश्च व्याप्तिः धूमव्यापकवह्निसमानाधिकरणधूमत्वादिरूपव्याप्तौ हेतुतावच्छेदकीभूतधूमत्वादिश्च नतु
तद्घटकीभूतसामानाधिकरण्यादिकं साध्याभाववद्वृत्तित्वरूपव्याप्तिघटकाभावमादायातिप्रसंगभंगाय व्याप्तिग्रहविषयमात्रवृ
त्तित्वोपादानमिति नोक्तापत्तिनामवकाश इत्यतो दूषणांतरमाह किंचेति। कालांतर इति। कारणतावच्छेदककोटिप्रविष्टलिंगादीना
मतितत्तादृशायामप्यनुमितेरुत्पत्त्या प्रकृते कारणतावच्छेदकविशिष्टपक्षतायाः कार्यजनने नियामकत्वासंभवात् अयमिति
प्रसंगो बोध्यः स्वसमानकालीनेति। स्वक्षणवृत्तीत्यर्थः। स्वपदं फलोपधायकत्वे नाभिमतं तत्पक्षधर्मताज्ञानव्यक्तिपरं वाच्यमि
ति हेतुनपास्वीकार्यमित्यर्थः। तादृशपक्षधर्मताज्ञानत्वेनेत्यादिः व्याप्तिज्ञानोत्पत्तिद्वितीयक्षणोत्पन्नपक्षधर्मताज्ञानात् व्याप्तिज्ञान
नाशोत्तरक्षणमनुमितिरेतन्मते स्वीक्रियत इति बोध्यं। तत्तत्पक्षधर्मताज्ञानत्वेन हेतुत्वसंभव इति फलोपधायकीभूतपक्षधर्म
ताज्ञाननिष्ठानां तद्व्यक्तीनां किंचिदविशेषितानामेव हेतुतावच्छेदकत्वसंभव इत्यर्थः। यथाश्रुते तु तद्व्यक्तिनिवेशस्यावश्यक
त्वे पक्षधर्मताज्ञानत्वनिवेशे प्रयोजनविरहादसंगतेः अधिकवैयर्थ्यादिति। तादृशधर्मप्रकारकत्वादिविशेषणवैयर्थ्यादित्य

राम
३२

र्थः इदमुपलक्षणं। एतादृशरूपेण हेतुत्वे अनंतकार्यकारणभावप्रसंगेन महत्गौरवमिति बोध्यं। एतेनोक्तरित्या कारणतावच्छेद
कस्य तत्तद्व्यक्तिमात्रपर्यवसायित्वाद्यातेन एवमिति। स्वसमानकालीनत्वस्वसमानाधिकरणत्वयोरन्यतरप्रवेशस्यावश्यकतयानु
गमेनेत्यर्थः। यद्धर्मावच्छेदेनेति। तद्धर्मावच्छिन्नव्याप्तिज्ञानसहिततद्धर्मप्रकारकपक्षधर्मताज्ञानत्वावच्छिन्नमित्यर्थः परास्तमिति।
साहित्यस्य स्वसमानकालीनत्वात्मकत्वे स्वसमानाधिकरणत्वस्य सामानाधिकरण्यस्वरूपत्वे स्वसमानकालीनत्वस्य व्याप्तिज्ञाने
ऽवश्यनिवेशनीयत्वादिति भावः। एकक्षणावच्छिन्नैकात्मवृत्तित्वसंबंधेन तद्वत्त्वं यदि तत्साहित्यं तदानेतादृशानुगम इत्य
तः प्रकारांतरेणानुगममाह। तत्तद्धर्मेति। विशिष्य तत्तद्धर्मघटितत्वेनेत्यर्थः अननुगतत्वादिति। तथा च धूमत्वादिप्रकारकपक्ष
धर्मताज्ञानस्यालोकत्वाद्यवच्छिन्नलिंगकानुमितौ व्यभिचारः तत्तद्धर्मावच्छिन्नलिंगकानुमितित्वस्य कार्यतावच्छेदकत्वोपगमेपि
हेतुतावच्छेदकभेदेन कारणताबाहुल्यमिति भावः। यद्यपि हेतुतावच्छेदकघटितव्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानस्यैव हेतु
तायाः केवलान्वयिसाधारण्यानुरोधेन वक्तव्यतया तस्य च हेतुतावच्छेदकमनंतर्भाव्य कारणतायाः दुष्कल्पनतया नैय्यायिकम

वे हेतुतावच्छेदकभेदेन परामर्शकारणताभेद आवश्यकः व्याप्यतावच्छेदकानवगाहिशाब्दपरामर्शो हेतुमित्यनुत्पादः समानः त
थापि निरुक्तधर्मापेक्षया व्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वस्य लघुतया तेन रूपेण कारणताकल्पनमेवोचितमित्यत्र
तात्पर्यं ननु यत्र तत्राननुगमस्य दोषत्वे इष्टत्वेन फलसाधनताज्ञानस्योपायेच्छाद्यहेतुतया यत्रेष्टत्वेन ज्ञात तत्साधनताज्ञानं हेतुरि
तीष्टसाधनताज्ञानहेतुतापरीष्कारो मणिकृतां विरुध्यते इति आशंकते। यत्रेष्टेति। प्रतिवध्यत इति।। तत्र गत्यंतरविरहेण सुख
दुःखाभावत्वादिप्रकारकफलेच्छायास्तदवच्छिन्नसाधनताज्ञानस्य चाननुगमेनापि तादृशेच्छात्वतादृशज्ञानत्वेन हेतुत्वं स्वीक्रिय
ते कार्यतावच्छेदककोटौ चाव्यवहितोत्तरत्वसंबंधेन तत्तत्कारणतावच्छेदकावच्छिन्नवैशिष्ट्यं निवेश्य व्यभिचारो वारणीयः इच्छागताजा
तिविशेषा एव वा तत्तत्फलेच्छादिजन्यतावच्छेदकतया स्वीक्रियंते नानाफलगोचरेच्छास्थले च नानैवेच्छाव्यक्तयः स्वीक्रियंते प्रफल
यौगपद्यवदिच्छायौगपद्यस्वीकारेपि क्षतिविरहादिति भावः ननु पर्वतस्त्रिधूमत्ववह्निव्याप्तो वैशिष्ट्यं पत्र युगपदेव पक्षधर्मे
भासते तत्र विशिष्टपरामर्शत्वावच्छिन्नस्येव व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वावच्छिन्नस्याप्युपस्थितिरस्ति तथा च

तेन रूपेणैव किंन हेतुत्वमुपेयते एतन्मते अवच्छेदकलाघवात्तन्मते इति नियमांशाकल्पते न लाघवसत्त्वादित्याशंकां परिजिहीर्षुर
पिचेत्यादिमूलाभिप्रायमाहलब्धेति॥ नियमादेरित्यादिना अनन्यथासिद्धत्वपरिग्रहः एकतररूपेति। उक्तशाब्दपरामर्श
स्थलेयद्धर्मावच्छेदेनव्याप्तिज्ञानं तद्धर्मप्रकारकपक्षधर्मताज्ञानस्यनैयायिकमतासिद्धत्वादितिभावः हेतुतावच्छेदकभेदेनकार
णताभेदं नैयायिकमते प्याशंक्य मीमांसकमते लाघवमाशंकतो नत्वित्यादिना॥ विशिष्यधूमत्वादिना। ननु धूमादीनां विशिष्य
व्याप्तिग्रहकत्वेपि किंचिद्धर्मावच्छिन्नविषयतात्वेनैव सामान्यतस्तद्विषयताकारणतावच्छेदककोटौ निवेशनीयेति न कारणता
वच्छेदकाननुगमस्तत आह॥ तत्रचेति। धूमादिविषयतानां विशिष्यकारणतावच्छेदके निवेशो नेति शेषः धूमादिविषयतानां
विशिष्य निवेशोपि व्याप्तिशरीरे सामानाधिकरण्यानुयोगितावच्छेदकतया धूमत्वादीनामनिवेशो उक्तज्ञानादनुमितिप्रसं
गो दुर्वार एवेति तत्र धूमत्वादिकं तथानिवेश्य विशिष्यतत्प्रकारकत्वेन हेतुतां दर्शयति। तादृशेति। तद्धर्मविशिष्टेत्यादि तद्धर्म
विशिष्टलिंगकानुमितौ तद्धर्मविशिष्टव्यापकतावच्छेदकत्वविशिष्टसाध्यतावच्छेदकविषयताशालिग्रह विशिष्टतद्धर्मप्र

कारकपक्षधर्मताज्ञानत्वेनैवेत्यर्थः सकलवितिव्यापकत्वादिति॥ तथा च तद्धर्मो वह्नित्वेनियतपूर्ववर्त्तित्वमुभयमतसिद्धमेवेति एतन्म
तेकल्प्यतालाघवमस्तुणामेवव्याप्यतावच्छेदकानवगाहिज्ञानादनुमितिस्थले यापिकानामप्यसिद्धेवानुमितिप्रयोजिकाया
उक्तव्याप्तेर्व्याप्यतावच्छेदकघटितत्वादित्यभिप्रायः॥ अत्र च कारणतावच्छेदकावह्निज्ञानव्यवहितोत्तरत्वघटितधर्मस्यैव जन्यता
वच्छेदकत्वोपगमात् तद्वह्नित्वनियतपूर्ववर्त्तिताविशिष्टपरामर्शत्वावच्छेदेनापि उभयवादिसिद्धेवक्तानन्तरस्थले अतिरिक्तवि
शिष्टपरामर्शकल्पनागौरवस्य फलमुखत्वेनादोषत्वं मूलकृतैव वाच्यं इत्याशंकां मीमांसकमतेकारणतावच्छेदकलाघव
मणात्रीमाह॥ किंचेति। अखंडव्याप्तेरित्यक्तविशिष्टपदार्थरूपव्याप्तेरित्यर्थः प्रकारत्वासंभवादिति। तथा च विशिष्टव्या
प्तिप्रकारकत्वेन कारणताऽपि न संभवतीति भावः॥ साध्ये साध्यतावच्छेदके व्यापकत्वग्राहकं। व्यापकतावच्छेदकत्वावगाहि। तार
शव्यापकत्वपक्षधर्मत्वावगाहित्वयोरेवेति। हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वविशिष्टसाध्यतावच्छेदकरू
पव्यापकत्वावगाहित्वहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टपक्षावगाहित्वयोरेवेत्यर्थः एवकारेणाधिकरणांशे साध्याद्यव

गाहित्वव्यवच्छेदः कारणतावच्छेदकत्वमुचितमिति शेषः यद्यपि वन्ह्यादिसाध्यकधूमादिहेतुकस्थले अखंडव्याप्तेः प्रसिद्ध्या व्या
प्तिविशिष्टहेतुमत्ताज्ञानत्वेन कारणत्वं रुवचनेवसाध्यसाधनभेदेन कारणताभेदस्यावश्यकत्वात्॥ न चैवमपि साध्यसामाना
धिकरण्यांशस्य व्याप्तिघटकतया कारणतावच्छेदककोटौ निवेशाधिक्येन गौरवं दुष्परिहरमेवेति वाच्यं॥ भवन्मतेप्येकस्यणा
वच्छिन्नसामानाधिकरण्यसंबंधेनैकज्ञानवैशिष्ट्यस्यापरज्ञाने निवेशनीयतया अधिकत्वात्॥ अन्यथाखंडव्याप्तिप्रकारकत्वे
न हेतुत्वेपि गौरवात्तस्यतिस्तेपस्योचितत्वात्॥ तथापि अन्यथाख्यातिवादिनां वन्ह्यधिकरणत्वादिना तदनधिकरणादिमात्र
विषयकज्ञानादपि अनुमित्युत्पत्त्याखंडव्याप्तिविषयकत्वेन वन्ह्यादिसाध्यकानुमितावपि न हेतुतासंभवतीत्यभिप्रायः॥ व्या
पकत्वस्यापीति॥ व्यापकतावच्छेदकत्वस्यापीत्यर्थः खंडशो निरुक्तिरिति। हेत्वधिकरणत्वांशे साधनीयत्वावगाहित्वाधेयत्वां
शेऽधिकरणत्वावगाहित्वादिक्रमेण कारणतावच्छेदकगर्भे निवेशानमित्यर्थः। अखंडव्यापकत्वाप्रसिद्ध्या तदवगाहित्व
स्य यथाश्रुतस्य निवेशासंभवादिति भावः तेषां परमिति। अन्यथाख्यातिवादिनां नैयायिकानामेवेत्यर्थः मीमांसकानां न तत्र व्याप

कतासत्त्वासंभवेनानुमितेरसिद्धेरिति भावः न च केवलाभावत्वादिना साधनसामानाधिकरण्याभावप्रतियोगितानवच्छेदकत्वादिज्ञानाद
नुमितिकारणतायाधिकरणांशे धूमादिप्रकारकं आधेयत्वांशे चाधिकरणप्रकारकमित्यादिक्रमेण व्याप्तिज्ञानविवेचनं मीमां
सकानामप्यावश्यकमिति वाच्यं हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकरूपविशिष्टपदार्थ
स्य विषयितासंबंधेन कारणतावच्छेदकत्वोपगमात् विशेष्यविशेषणभावापन्नतावत्पदार्थानवगाहिज्ञाने विशिष्टनिरू
पितविषयितासंबंधेन तादृशविशिष्टवत्त्वाभावादनुत्पत्तिप्रसंगासंगतेः। यत्संबंधेन यादृशविशिष्टपदार्थस्य कारणताव
च्छेदकत्वं तत्संबंधेन तादृशविशिष्टाधिकरणस्यैव कार्योत्पादकत्वात्॥ नन्वेतन्मते साध्यसमानाधिकरण्यज्ञानस्यानुमि
त्यहेतुतया विरोधस्य हेत्वाभासत्वानुपपत्तिः अनुमितिजनकत्वानाविरोधित्वादित्यत आह॥ यथा चेति॥ वक्ष्यत इति। व्या
पकतापरामर्शहेतुताविचारे इति शेषः॥ गृह्यमाणत्वादिव्यापकताज्ञानविशिष्टपक्षधर्मताज्ञानत्वेन पक्षधर्मताज्ञानवि
शिष्टव्यापकताज्ञानत्वेन वा हेतुत्वमित्यत्र विनिगमनाविरहरूपदूषणग्रस्तत्वादित्यर्थः। ननु अनुमितिं प्रति तद्धर्मावच्छिन्न

निरूपितव्याप्यकताज्ञानत्वेन तद्धर्मावच्छिन्नहेतुमत्पक्षज्ञानत्वेन च कारणतास्वीकारे यत्र दंडचक्रादिवत् परस्परसहकारेण फलज
नकत्वात्तत्रातिप्रसंगः। न च विशिष्टपरामर्शत्वेनैककारणत्वकल्पनापेक्षया कारणताद्वयकल्पने गौरवमिति वाच्यं॥ विशिष्टपराम
र्शत्वेन हेतुतामते कारणतावच्छेदककोटौ प्रविष्टस्य अधिकरणताद्यंशे साध्यावगाहित्व तत्तद्देशीयाप्रामाण्यज्ञानविशेषानास्कंदि
तत्वरूपाधिकविशेषणस्य तथाविधविशेषणांतरैः समं मिथो विरोध्यविशेषणभावे विनिगमनाविरहेण कारणताबाहुल्यस्य
दुर्वारत्वादित्यतो दूषणांतरमाह॥ वस्तुतस्त्वंताभावव्वदन्यमीति॥ अनुमित्यादयादिति। तथाच तदसंग्राहकतया नोक्तरूपेण हे
तुतासंभवतीति भावः॥ ननु तादृशज्ञानाजन्यापत्तेरेवानुमितिनैयायिकमतेपि केवलान्वयिसाधारण्यानुरोधेन व्यापकसामा
नाधिकरण्यरूपव्याप्तिज्ञानस्यैव हेतुतापावकत्वात्। तत्रानुमित्यनुत्पादस्य तुल्यत्वादित्याशंकां परिहरति॥ व्यभिचारेति
तत्र येव्यभिचारज्ञानप्रतिबंधकतावच्छेदकत्वेन नानाविधव्याप्तिप्रकारताऽनुगमय्यतासां कारणतावच्छेदकगर्भे प्रवेशानी
यत्वादित्यर्थः। तथा चास्माकं तत्रानुमितिर्भवत्येवेति भावः॥ इदं चापाततः॥ एतन्मतेपि तद्धर्मावच्छिन्नविशेष्यकत्व

भिचारज्ञानप्रतिबंधकत्वेन व्यापकताज्ञानस्य हेतुतायाः वक्तुं शक्यतया साध्याभाववद्वृत्तित्वरूपव्याप्तिज्ञानस्य संग्रहसंभवात्तादृश
वासंशे निरूपितावछेदकज्ञानंतु नैयायिकानामपि दुःसंग्रहं। तादृशज्ञानीयव्याप्तिप्रकारतायाः व्यभिचारज्ञानप्रतिबंधकताव
छेदकत्वविरहात्तादृशप्रतिबंधकतावछेदकप्रकारितानिरूपकधर्मप्रकारितात्वेन व्याप्तिप्रकारितायाः कारणतावछेदक
त्वे प्रमेयत्वादिना व्याप्तिप्रकारकज्ञानादप्यनुमित्यापत्तेः। एवं व्यापकताज्ञानस्य साध्याभाववद्वृत्तित्वरूपव्यभिचारग्रहं
प्रति साध्याभाववद्वृत्तित्वज्ञानस्य च साधनाव्यापकताग्रहं प्रति विरोधित्वे मानाभावादननुगम एवासंभवी साध्यसामा
नाधिकरण्यविषयतायाव्यापकताग्रहनिष्ठप्रतिबंधकतावछेदककोटावनिवेशेन व्यापकसामानाधिकरण्यरूपव्याप्ति
प्रकारतायाव्यभिचारज्ञानप्रतिबंधकतावछेदकत्वं च दुर्घटं॥ अनतिरिक्तवृत्तित्वरूपावछेदकत्वनिवेशेपि च धूमव्यापक
वह्निसमानाधिकरणोंधनकालीनधूमवान्पर्वत इति ज्ञानादनुमित्यापत्तेः। यत्तु व्यापकताज्ञानव्यापकत्वनिरूपकतावछे
दकधर्मावह्नित्वविशेष्यकव्यभिचारज्ञानप्रत्यैव प्रतिबंधकं। तत्प्रतिबंधकतायां च धूमादिव्यापकसाध्यसमानाधि

करणधूमत्वादिरूपव्याप्तिज्ञानधर्मितावच्छेदकधर्मांतरावच्छिन्नविशेष्यताकव्यभिचारज्ञानस्यतादृशव्याप्तिज्ञानदशायां
दुर्वारतयासमानधर्मितावच्छेदकत्वप्रत्यासत्त्या व्यभिचारधियंप्रतितादृशव्याप्तिप्रकारकज्ञानत्वेन पृथक्प्रतिबंधकत्वं
कल्प्यते॥ एवंच तादृशव्याप्तिप्रकारतायाः साध्याभाववद्वृत्तित्वरूपव्याप्तिप्रकारतायाश्च व्यभिचारधीप्रतिबंधकता
वच्छेदकप्रकारतात्वेनानुगमय्यानुमितिकारणतावच्छेदकत्वं संभवति एवंच व्याप्त्यंशो निर्धर्मितावच्छेदकज्ञानीयव्या
प्तिप्रकारतायाऽअपितादृशरूपेणसंग्रहः संभवति धर्मितावच्छेदकतायाः प्रत्यासत्तित्वे धर्मितावच्छेदकतानिरूपकत्वस्य
व्याप्तिप्रकारतायामनिवेशात्॥ नचवह्निव्याप्यआलोकः धूमः प्रमेयइतिज्ञानकाले धूमधर्मिकव्यभिचारज्ञानोत्पत्त्या
सामान्यतोज्ञानत्वेनप्रतिबंधकत्वं॥ व्याप्तिप्रकारतानिरूपितधर्मितावच्छेदकताप्रत्यासत्तिरितिस्वीकार्यं तथाच निर्धर्मि
तावच्छेदकज्ञानीयव्याप्तिप्रकारतायाः धर्मितावच्छेदकतानिरूपकत्वाभावान्नतदसंग्रहस्तदवस्थ एवेति वाच्यं। समूहालंब
नज्ञाने धूमत्वस्य धर्मितावच्छेदकत्वेतिव्याप्तिप्रकारकत्वाविशिष्टधर्मितावच्छेदकत्वाभावादिति। तदपिनसम्यक्। धू

ग.प.
३७

मादिव्यापकसाध्यसमानाधिकरणधूमत्वादिज्ञानदशायां तद्विशेष्यतावच्छेदकावच्छिन्ने साध्याभाववद्वृत्तित्वज्ञानोपगमे क्षतिविरहात् । वस्तु
तस्तु यदि ज्ञानद्वयहेतुतावादिना व्यापकताधीर्हेतुरुच्यते तदा व्यापकत्वमपेक्ष्य लघुशरीरा साध्याभाववद्वृत्तित्वरूपव्याप्तिरेवानुमिति
प्रयोजिकान्यायमते स्वीक्रियते तत्प्रकारकपक्षधर्मताज्ञानत्वेन हेतुतावच्छेदकधर्मा निवेशे च हेतुतोपगंतव्या तथा च हेतुतावच्छे
दकभेदेन नन्वेषां कारणताभेदः ज्ञानद्वयहेतुतावादिना तादृशव्याप्तेरनुमितिप्रयोजकत्वोपगमेऽपि साध्यव्याप्यो धूम आलोकवा
न् पर्वत इत्यादिज्ञानद्वयादनुमितिप्रसंगवारणाय हेतुतावच्छेदकानां विशिष्य निवेशनीयतया तत्तद्भेदेन कारणताबाहुल्यमि
ति विशिष्टपरामर्शत्वेन हेतुत्वमेव सम्यक् ॥ यदि च केवलान्वय्यनुमानं नैयायिकानां अनुपेक्षणीयमिति व्यापकसामानाधिकर
ण्यज्ञानेऽनुमितिकारणत्वं वाच्यं इत्युच्यते ॥ तदा केवलान्वय्यनुमानसमर्थनभीरुभिर्मीमांसकैः कथं तादृशव्याप्तिमुपेक्ष्य
व्यापकतायां लाघवेन तज्ज्ञानपक्षधर्मताज्ञानयोः पृथक्कारणत्वं व्यवस्थापयिष्यत इत्यादिरीत्या परमतं निराकांक्षमि
पि कमन्यथानुसंधेयं ॥ विशिष्टपरामर्शरूपधर्मिणस्सप्रमाणकत्वान्न कल्पनागौरवायेति यद्वा सप्रमाणत्वादिति मूले तत्त्वारं

राम
३७

स्यमुक्तं तरमवतारयति ॥ नन्विति तच्च कार्यस्य प्रमाणतंत्रं च कार्यकारणताग्रहे सतीति अन्यथा अनुकूलतर्कानवतारेण व्यभिचार
शंकयास्तत्वानो विशिष्टपरामर्शवान् अव्यवहितपूर्वत्वसंबंधेनानुमितिमत्वादितिरीत्याज्ञानद्वयस्थले विशिष्टपरामर्शानुमाना
संभवादिति भावः ॥ तत्फलस्य कारणतानिर्णयाधीनत्वात् हेतुरितिनेति धर्म्यंतरघटितेत्यर्थः विशिष्टपरामर्शत्वावच्छेदेन कारणता
ग्रहे विशिष्टपरामर्शत्वधर्मिकगौरवज्ञानं विरोधितच्च गौरवं प्रमाणोत्तरात्सिद्धतदनुमित्यव्यवहितप्राक्कालीनत्वाश्रयकत्वात्
अन्यत्र दुर्वचमेवेति गौरवस्य तादृशधर्मिघटितत्वमित्यभिप्रायः गौरवनिर्णयासंभवेपि गौरवसंदेहेन प्रतिबंधात्कारणताग्र
ग्रहः संभवतीति आशंकते संभाव्यत इति । संदिह्यतर इत्यर्थः इदं गौरवांशसंशयप्रयोजकमाह ॥ धर्म्यंतरेति । अशक्यनिर्वाहत्वादि
ति ॥ तथा च कारणतासंशयात् तदुपपादकधर्मिणोपि संशयो भविष्यतीति तत्संशयाहितगौरवसंशयेन प्रतिबंधाच्च न कारणता
निर्णयः संभवतीति भावः ॥ तत्संभावनं ॥ सामान्यतो दंडत्वघटत्वादिरूपसामान्यरूपेण कार्यकारणभावग्रहस्येति तन्निर्णयस्ये
त्यर्थः प्रामाण्यो विलंबप्रसंगादिति ॥ यत्र दंडादिरूपकारणं कार्यैकोन्नेयं तत्स्थलीयधर्मिघटितगौरवसंशयेन प्रतिबंधादिति

भावः पक्षकार्य्यव्यवहितपूर्वकालेकारणतावच्छेदकावच्छिन्नसत्वं प्रमाणांतरसिद्धं तत्रतादृशगौरवाभावात् प्रायशइत्युक्तं॥ नन्वत
चेतिघटत्वदंडत्वादिनाकार्यकारणभावस्थलेरत्वर्थः गौरवमप्यास्थीयते गौरवसंदेहः॥ अविरोधितयास्वीक्रियते॥ विशिष्टपरा
मर्शत्वेनहेतुतामतेअत्यन्तिकृष्टधूमादौविशिष्टपरामर्शासंभवशंकानिराकरणस्यतत्सिद्ध्युपयोगितामाविष्करोति॥ व्यभिचा
रनिर्णयेति॥ सतिलाघवेव्यभिचारसंशयस्याकिंचित्करत्वात्तन्निर्णयोपादानं॥ ननुनिरवयवद्रव्यत्वनित्यपरिमाणयोरेक
तरदृष्टांतेप्रसाध्यतद्विशिष्टेअपरानुमित्यातदुभयसामानाधिकरण्यावगाहनंक्वघटमेवानुमितेः पक्षतावच्छेदकसाध्यसामा
नाधिकरण्यावगाहित्वनियमादित्यनुमानयोरित्यादिमूलासंगतिरतआह॥ अनुमितेकेति॥ उपगमेपीत्यनेनव्याप्तिप्रकार
धियोअनुमितिहेतुतयासंसर्गमर्यादयातादृशसामानाधिकरण्यग्रहस्यानुपयोगित्वंसूचितं॥ एतेनपक्षतावच्छेदकसाध्ययोरवच्छे
द्यावच्छेदकाभावस्यासंसर्गतयानुमितौभानोपगमेपिननिर्वाहः॥ नियतव्यापाराभावादितिमूलमसंगतंनियतव्यापारपर्यंतस्यकारण
लक्षणेऽप्रवेशादतोव्यापाराभावएवात्रविवक्षितः॥ व्यापारत्वंतुनियतत्वनिर्वाह्यमित्यंतरालिकस्याकुत्रचित्त्वंभवेपिनतस्योपनीतत्व

मात्रावच्छिन्ने उपनयेन जननीये व्यापारते त्येन तत्त्वचयितुं मूले नियतमित्यक्रममिति सूचयितुं व्याचष्टे॥ एकत्र संबंधिज्ञानेति। ह
स्त्यादिज्ञानतज्जन्यहस्तिपकस्मरणाभ्यां हस्तिपकादिविशिष्टहस्त्यादिविषयकोपनीतभानजननेपीत्यर्थः। तस्य मध्यवर्तिनः स्म
रणस्यानियतत्वेपि कथं न व्यापारत्वमित्यत आह। अयमिति। यं। यद्रूपावच्छिन्नं। यस्य। यद्रूपावच्छिन्नस्य। यज्जनकत्वं। यद्रूपावच्छि
न्नजनकत्वं। तस्यैव। तद्रूपावच्छिन्नस्यैव। तत्र। तद्रूपावच्छिन्नजनने। तद्व्यापारत्वात्। तद्रूपावच्छिन्नव्यापारत्वात्। एतावतापितज्ज
दुपनयस्य केलत्तदुपनीतभानव्यक्तितावच्छिन्नजनने तन्नियततत्स्मरणादिव्यक्तिव्यापारकत्वं दुर्वारमेवेत्यालोच्य उपनयस्य प्रमा
करणत्वमस्तु पेत्य प्रमाणांतरत्वं निराकरोति। वस्तुतस्त्विति। नश्यतीति रिति। प्रत्यक्षप्रमाण एवतदंतर्भावेण प्रमाणचातुर्विध्याव्याघा
तादिति भावः। ननु इंद्रियात्मकप्रत्यक्षप्रमाणेतदंतर्भावात्प्रमाणांतरत्वं तस्य दुर्वारमेवेत्यत आह। प्रमावैजात्यस्यैवेति। एवका
रेण प्रमाकरणतावच्छेदकभेदस्यावच्छेदः। प्रमाणांतरत्वनिमित्तत्वात्। विभिन्नप्रमाणव्यवहारप्रयोजकत्वात्। ननु उपनयहेतुतावा
दिनां तज्ज्ञानत्वेन तज्जन्यतावच्छेदकधर्मस्वीकार आवश्यकः। स च लाघवाज्जातिरूप एवेति प्रमावैजात्यं दुर्वारमित्यत आह। नचे

ग.प.
३९

ति। अत्र प्रमाणे वैजात्यमिति। उपनीतभाने प्रत्यक्षप्रमाव्यावृत्ता जातिरित्यर्थः। संभवतीति शेषः। युक्तिसत्त्वे योग्यायामपि व्याकौष्यं
जकविरहेण उपपद्यमानो जात्यनुपलंभो न जातिबाधकः। अन्यथा संयोगादौ क्रियादिजन्यतावच्छेदकजातेरपि विलयप्रसं
गादित्याशंक्य। उपनयस्य जात्यंतराव्यवस्थापकत्वं व्यवस्थापयन्नुक्ताभावमेव बाधकं दर्शयति॥ मानाभावादित्यादिना। विशे
षणज्ञानत्वेनेति। उपयोगितयेत्यग्रिमेणान्वयः। तथा च विशिष्टज्ञानत्वमेव तज्जन्यतावच्छेदकं न तु जात्यंतरमिति भावः। उपनि
तविशेष्यकमानसानुबोधेन कल्प्यकारणतांतरनिरूपितकार्यतावच्छेदकतया जात्यंतरसिद्धेरावश्यकत्वेत्याशंक्याह संनिक
र्षविधयेति। तथा च प्रत्यक्षत्वमेव तज्जन्यतावच्छेदकमिति भावः॥ ननु संयोगत्वाद्यादिसाधारणसंनिकर्षत्वमनुगतावच्छि
सकं दुर्वचमिति विशिष्ट्यैव हेतुता वाच्या तथा च सा न जन्यतावच्छेदकं यदि प्रत्यक्षत्वमात्रमुच्यते तदा लौकिकादिप्रत्यक्षे
व्यभिचार इति संयोगाद्यजन्यप्रत्यक्षत्वमेव तथा वाच्यं। एवं च संयोगाद्यजन्यतानिवेशप्रयुक्तलाघवेन वैजात्यासिद्धिर्दुर्वारेवे
त्यत आह अंतरंगेति। उपनयस्य जातिविशेषावच्छिन्नाजनकत्वादेवेत्यर्थः। बाह्यप्रत्यक्षमिति ज्ञानसप्रेवापंचैव चरत्यादिकाभा

राम
३९

ष्यंतरप्रत्यभिज्ञास एव अहमित्यादिरूपा आदिपदग्राह्यां ज्ञानादिविषयादिपरिग्रहः॥ यथा योगमन्वयः अन्यथेति। प्रत्यक्षभिन्न

वृत्तित्वेनस्वीकृतापत्यादर्शाजातिव्यक्तेः प्रत्यभिज्ञाघटुरोधेन प्रत्यक्षसाधारण्यस्वीकारे इत्यर्थः॥ जातिसंकरेति॥ किंचिद्विषये

चक्षुःसंयोगादिजन्यतयानत्वप्रत्युपत्वादेरावश्यकत्वा। तत्वेन च समं उपनयजन्यतावच्छेदकजातेर्व्याप्यव्यापकभावासंभवा

दितिभावः॥ जातेरनंगीकृत्याविशेष्यभूतमनःऽद्विषयज्ञानस्य प्रत्यभिज्ञादौ व्यभिचारप्रसंगाच्चेत्यपि बोध्यम्। तस्य दंताविशिष्टा

दिविषयकत्वानुद्रूपमेव तत्र भेदाग्रहसहकृतं विशिष्टव्यवहारादिविभिन्नेन तत्वेन ज्ञानमतो न जातिसंकरादिप्रसंग इत्यत आह

ज्ञानद्वयेति। स्थैर्यमात्रमिति। तस्य पूर्वगृहीतानुभूयमानयोरभेदप्रत्यभिज्ञैकमानकत्वादितिभावः॥ अनुमानादपि कुत्र

चित स्थैर्यसिद्धिसंभवादाह व्यवस्थापितं चेति। अन्यथाख्यातावितिशेषः॥ प्रत्यक्षसामग्र्यसमवहितज्ञानजन्यतावच्छेदकं वैजा

त्यं च प्रत्यभिज्ञादावितिन संकरप्रसंग इत्याशंकते। न चेति। अजनकत्वादिति। प्रत्यभिज्ञादौ तत्तादिभानार्थं इंद्रियसंयोगाद्यज

न्य प्रत्यक्षे ज्ञानस्यास्वतंत्र हेतुताया आवश्यकत्वात्तत एव सर्वांशोपनीतभानस्याप्युपपत्तेः तत्करूपेण हेतुत्वे मानाभावादित्यभि

ग.प.
४०

भावः। ननु तदानीमिंद्रियसंयोगादिघटितप्रत्यक्षसामग्य्रा अभावात्॥ सर्वांशोपनीतभाने प्रत्यक्षत्वं न संभवतीति चेज्जाती
यप्रमासामग्रीविरहे इत्यादिव्याप्तिबलात् प्रमावैजात्यापत्तिर्दुर्वारैव। न च तादृशव्याप्तौ मानाभावः तादृशोपनीतभाने प्रत्य
क्षत्वासंभवे तत्र उपनायकज्ञानस्य त्वन्मते हेतुतायां आवश्यकत्वात् तज्जन्यतावच्छेदकधर्म्मं विना तदनुपपत्तेरेव मानत्वात् त
ज्ज्ञानस्य जनकतायामेव प्रत्यक्षादिसामग्य्रसमवधानमवच्छेदकं भवतु तत्सहकारिवेत्यन्यदेतदित्यत आह सिद्धेश्चेति
उपनीतभानस्य लौकिकमित्यंतरसामग्य्राभावस्यैवेत्यादिः। असिद्धिमेव विवृणोति। उपनयेति। लौकिकसन्निकर्षस्य विषयि
ताविशेषावच्छिन्नं प्रत्येव जनकतया उपनीतभाने तादृशविषयितानभ्युपगमेनन व्यभिचार इति भावः। न चांशिकोपनीतभा
ने उपनीतस्य प्रकारतयैव भानोपगमात् विशेषणज्ञानविधयैव तत्रोपनयहेतुतात्सर्वांशोपनीतभाने जातिविशेषस्यैव तज्जन्य
तावच्छेदकतया कल्पनमनुचितं। अलौकिकप्रत्यक्षत्वस्य गुरुत्वात्। तथा च प्रत्यक्षत्वं तत्र निर्युक्तिकमिति वाच्यं॥ सुरभि चंदनमि
त्यादौ मानससर्वांशोपनीतभानेपि विशेष्यस्य चंदनादेश्चक्षुरादिना संबंधेन स्वांशे प्रकारतायाः अभ्युपगमेन विशिष्टबुद्धौ विशे

राम
४०

षणज्ञानहेतुतयैव निर्वाहात् उपनीतभाने उपनायकज्ञानेस्य तं न हेतुताया अकल्पनात्। त्ति प्रत्युक्ता सर्वांशोपनीतभाने उपनयज
न्यतावच्छेदकतया जातिविशेषः सोपि प्रत्यक्षत्वव्याप्य एव। न तु तद्विरुद्ध इत्युपनयस्य न प्रमाणांतरता। न च तादृशज्ञाने प्रत्यक्ष
त्वमप्रामाणिकं। प्रत्यक्षत्वाद्यन्यस्य अनुभवत्वव्याप्यजातेरप्रामाणिकतया तत्प्रकारकज्ञानत्वस्यास्यति साधारण्येन व्यभिचा
राद्विशिष्टप्रत्यक्षस्यैव विशेषणज्ञानादिजन्यतावच्छेदकतया तत्र प्रत्यक्षत्वानुपगमे तस्य विशेषणज्ञानजन्यत्वानुपपत्तेः॥ न च उ
पनयविधयैव तत्र विशेषणज्ञानस्यापेक्षणीयतया विशिष्टप्रत्यक्षत्वावच्छिन्नाया विशेषणधीजन्यताया स्वीकारासत्वेपि न क्ष
तिरिति वाच्यं। स्वरूपतो घटत्वादिप्रकारकोपनीतभाने घटत्वादिविषयकज्ञानस्योपनायकविधया अपेक्षायामपि स्वरूप
तस्तस्याच पर्यंतानपेक्षायां जातित्वादिना घटत्वादिज्ञानाद्घट इत्येतादृशोपनीतभानापत्तेः॥ स्वरूपतस्तद्विषयकज्ञानजन्य
तावच्छेदकस्य स्वरूपतो तत्प्रकारकप्रत्यक्षत्वस्य स्वरूपतस्तत्प्रकारकोपनीतभानसाधारणतया आवश्यकत्वात्। अथ स्वरू
पतो घटत्वादिविषयकं यत्र निर्विकल्पकं जातित्वादिना घटत्वादिज्ञानं च तत्र स्वरूपतो घटत्वादिप्रकारकोपनीतभानवारणा

एतादृशोपनीतभाने स्वरूपतः तत्प्रकारकज्ञानहेतुत्वमावश्यकं। तथा च तस्य प्रत्यक्षस्य साधारणविशेषणतानजन्यतावच्छेदकाक्रां-
तत्वे पि न क्षतिः। न च तादृशस्थले तथाविधमुपनीतभानमिष्टमेवेति वाच्यं।। येन रूपेण यस्य ज्ञानं तेनैव तस्योपनयः न तु तद्वि-
शेषितस्येति नियमादिति चेन्न हि स्वरूपतस्तत्प्रकारकोपनयस्यापि स्वरूपतस्तत्प्रकारकालौकिकप्रत्यक्षत्वमेव जन्यतावच्छेदकं
वाच्यं न तु सर्वांशोपनीतभानवृत्तिवैजात्यं। तथा सति उक्तस्थले घटत्वप्रकारकचाक्षुषस्योपनीतभानापत्तेः। तथा च सर्वांशोप-
नीतभानस्यापि तादृशोपनयजन्यतावच्छेदकाक्रान्तत्वनिर्वाहायैव तत्प्रत्यक्षत्वस्वीकार आवश्यकः। वस्तुतो येन रूपेणेत्यादि-
नियमो निर्विकल्पस्यानुपनायकत्वे निर्विकल्पकस्योपनायकताम् अंगीकुर्वतां न तादृशो नियमः त्वक्तस्थले दर्शितमुपनीत-
भानमिष्टमेवेत्युक्तं पल्लवेन। किंचिदंशे तद्प्रकारकं विशेषणज्ञानमेव दृष्टत्र विशेषणज्ञानमित्याशयेन शंकते।। नन्वेव-
मिति। धारावाहिको भेद इति। विशिष्टबुद्धिधारांतःपातितृतीयादिविशिष्टबुद्ध्यनुपपत्तिरित्यर्थः। तत्पूर्वं निर्विकल्पकात्म-
कस्य विशेषणज्ञानस्य विनाशात्। विशिष्टबुद्धिरूपस्य तस्य विशेषणप्रकारकतया स्वातंत्र्यविरहादिति भावः। समाधत्ते। इ

तरमात्रेति। तत्तदितरांशे भयांशे तत्प्रकारकज्ञानानंतरं शेन विशिष्टज्ञानोपपत्तये मात्रपदं॥ तेन यद्धर्मिणि विशिष्टज्ञानं फलं तद्-
र्यंशे तत्प्रकारकयत्तत्प्रकारकं तदन्यतद्विषयकोपस्थितेरित्यर्थः॥ तदितरविशेष्यतानिरूपितप्रकारतान्यतद्विषयताको-
पस्थितेरिति वा विशेष्यताभेदेन प्रकारताभेदात्॥ उभयविशेष्यकविशिष्टबुद्धिसंग्रहात्॥ न चैवं मात्रपदं व्यर्थं विशेष्य-
भेदेन प्रकारताभेदादेवोभयविशेष्यकज्ञानसंग्रहादिति वाच्यं॥ पटो घटो घटपटौ इति ज्ञानयोर्वैलक्षण्यनिर्वाहार्थं त-
त्रस्थले उभयविशेष्यतानिरूपितद्वित्वनिष्ठैकप्रकारताया आवश्यकत्वात्। तादृशज्ञानोत्तरं तादृशविशिष्टबुद्धिनि-
र्वाहाय तस्यावश्यकत्वात्॥ अथवा पुरुषेदंडो न वेत्यादिधर्मिविशेषणकासंदेहे समुच्चये वैलक्षण्यार्थं कोटिद्वयविशे-
ष्यतानिरूपितैकप्रकारताभ्युपगमे न तस्य तादृशासंदेहातरादिजनकत्वनिर्वाहार्थं तदुपादानस्यावश्यकत्वात्॥ स्व-
तं च विशेषणज्ञानस्य विशिष्टधीहेतुत्वमभ्युपेत्य संशयार्थं स्वीकार्यं एवं स्वतंत्रवह्निस्मरणेन परामर्शोत्तरं पक्षे वह्न्युपनी-
तभानानिर्वाहेऽपरितोषबीजं दर्शयन्न विशेषणज्ञानहेतुतायां स्वातंत्र्यप्रवेशो युक्तिविरहप्रदर्शकं न चोत्पादिसमलमवतार

पतिकोटीति संशयेन नाशादित्यग्रिमेणान्वयः स्मरणनाशेपि संशयात्मकविशेषणज्ञानादेव निश्चयो भविष्यतीत्याशंक्याह
तस्य चेति। व्याप्तिस्मरणादिनेत्यस्य परामर्शार्थमुपगंतव्येनेत्यादिः॥ व्याप्तिःस्मरणानंतरं पक्षधर्मताज्ञानकाले विशिष्ट
रौ नकाले वा पुनः संशयो भविष्यतित तो निश्चयइत्याशंक्याह विशेषदर्शनेति॥ विशेषदर्शनं॥ व्याप्यतयागृही
तस्य पक्षे निश्चयः। संशयायोगादिति॥ तदभावस्य कार्ये सहभावेन संशयहेतुत्वादिति भावः। यद्यपि परामर्शा
नंतरं वह्निरित्याकारकस्मरणं कल्पयित्वा पक्षे उपनीत वह्नि निश्चयः शक्योपपादनः तथापि तादृश कारण
तायाः प्रामाणिकत्व एव तत्कल्पनमुचितं तदेवं नेति वक्तुं बातिमनुरुध्यता दृशकारणत्वं मूलकृता निराकृ
तमिति भावः॥ मूलेन चेति॥ न चेत्यर्थः। मुक्तकारणतायांतु। किसत्वे स्वातंत्र्यस्याधिकस्यावच्छेदकत्वं गौरवेण दुर
पवादमिति सूक्तिं शंकते दीधितौ न चैवमिति॥ एवं। विशेषणज्ञानहेतुतायां स्वातंत्र्यानिवेशे। भावस्य घटादेः॥ ग्रहा
पत्तिः। भूतलं घटाभाववदित्यादिनिश्चयकाले भूतलादौ ग्रहापत्तिः। तादृशापत्तिं परिहरति॥ अभावग्राहकेति। वल

वत्त्वेतितुल्यवत्सामग्रीदशायांसंशयोत्पत्त्यापत्तिरेवेतिभावः।नचतादृशसामग्र्याःप्रतिबंधकत्वमप्रामाणिकमितिशंक्यंस्वतंत्र
विशेषणज्ञानसत्त्वेकदाचित्तथाविधनिश्चयापत्तेः।कस्यचित्समाधानमुपन्यस्यतिअभावेतिउक्तक्रमेणेत्योपपन्नावभावाविशेष
णत्वप्रवेशेगौरवमन्यथायं।।तथासतिवन्ह्यभाववद्धृदइतिस्वरूपव्याप्तिघटकतयावन्हिविषयकज्ञानाद्वन्ह्युपनीतभानान्निर्वाह
स्यास्वरसबीजंविशिष्टबुद्धिसामान्येहेतुतायांस्वातंत्र्यनिवेशःस्वतंत्रविशेषणज्ञानंविनाअनुमितिमंगीकुर्वाणस्याशंका
स्पदमेवनेतिप्रत्यक्षेतन्निवेशेनकारणत्वांतरंचातिनिर्युक्तिकमित्याह।।वस्तुतस्त्विति।मानाभावादितिअथज्ञानत्वसाम
स्येश्वरज्ञानवृत्तितयाअनुभवत्वस्याप्येश्वरज्ञानवृत्तितयाजन्यतावच्छेदकत्वासंभवात्तद्व्याप्यजातिंविशिष्टविषयकविजातीयत्व
त्वस्यत्वमेवविशेषणधीजन्यतावच्छेदकंवाच्यमितिकथंमानाभावादितिचेत्।अनुभवत्वजातेरीश्वरज्ञानवृत्तित्वेमाना
भावात्।।अनुमितिसाधारणविशिष्टानुभवत्वेनैवविशेषणधीजन्यत्वोपगमात्।।अन्यथानुमितौकारणत्वांतरकल्पनाप
त्तेः।।प्रत्यक्षत्वस्यापीश्वरज्ञानवृत्तित्वेमानाभावाच्चनसंकरप्रसंगः।नचभगवज्ज्ञानेप्रत्यक्षत्वानंगीकारेतस्यजन्यमात्रंप्रत्यक्ष

पादानगोचरप्रत्यक्षत्वेन हेतुत्वानुपपत्तिरिति वाच्यं उपादानप्रत्यक्षहेतुतायां लौकिकविषयतायाः प्रत्यासत्तित्वावश्यकत्वेन
ज्ञानत्वस्यावच्छेदकत्वसंभवाद्भगवज्ज्ञाने प्रत्यक्षत्वानंगीकारे क्षतिविरहात्॥ लौकिकविषयतायाः प्रत्यक्षत्वव्यात्रनिरूपि
तत्वे मानाभावात्॥ ईश्वरज्ञाने प्रत्यक्षत्वव्यवहारस्य लौकिकविषयतावत्त्वनिबंधनत्वेनौपचारिकत्वात् तान्नतु तर्हीत्यादिमूलम
युक्तं तथाहि यो यत्र विशिष्ट इत्यादि नियमे विशिष्टत्वस्य तन्मात्रवृत्तिधर्मप्रकारकत्वेनेति नार्थः॥ किंतु फलीभूतग्रहधर्मितावच्छेद
कप्रकारकत्वेनैव। एवं च पर्वतीयधूमत्वादिना व्याप्यग्रहेपि धूमत्वेन पर्वतीयधूमेपि सामान्यलक्षणया व्याप्तिग्रहाद्वह्निव्याप्यधूम
वान्पर्वत इति परामर्शो नानुपपन्न इत्याशंक्योक्तनियमे बाधकांतरमाह॥ वस्तुत इति॥ यत्र क्वचिदपीति॥ फलीभूतज्ञानवि
षयधर्मिमात्र इत्यर्थः॥ धर्मिणि॥ फलीभूतग्रहविषयधर्मिणि॥ संशयादीत्यादिना निश्चयपरिग्रहः। नन्वपूर्वधर्मिणि संश
यरवस्वीक्रियते न तूपनीतधर्मनिश्चयः॥ यश्च संशय एव तत्रैव सति व्याप्यदर्शने निश्चयोनुभूयते स आनुमानिक एव॥ व्याप्यदर्श
नस्यास्माकं अनुमितिहेतुत्वादिति निश्चयात्मकोपनीतभाने कथितनियमो निराबाध एवेति कदाचित्तद्रूपादिति शंकयाया

दृशसामग्र्या कोट्यंतरभासकसामग्रीसमवधाने संशयात्मकतत्कोटिविशिष्टधीर्जन्यते तादृशसामग्रीतोऽसत्त्यां विपरीतको
टिभानसामग्र्यां तत्कोटिनिश्चयोऽनुभवसिद्धतयादुरपन्हवः विपरीतकोटिभानसामग्रीविगमश्च विशेषदर्शनादि
तत्कोट्यस्मरणाद्यपीति एककोटिमात्रस्मरणे व्याप्यदर्शनं विना पैककोटिनिश्चयोत्पत्त्या नोक्तनियमो निश्चयसामग्र्यादायापि सं
भवतीत्याह॥ द्वयोस्त्विति। तुः अवधारणे। तथा च एतादृशे च संशयनिश्चययोरुत्पत्तौ विशेष इत्यर्थः। एतेनापूर्वध
र्मिविषयकसंशयादौ व्यभिचारस्य दुर्वारत्वेन। व्याप्तिमनुमायेति। तथा च पर्वतीयधूमे विशिष्य प्रागगृहीताया व्या
प्तेस्तत्रोपनयानभ्युपगमेऽदुक्तनियमो दुर्वार एवेति भावः॥ सर्वत्र व्याप्त्यनुमितिरपि न संभवतीति सूलोक्तमपि दूषणं द
र्शितरीत्या त्रिदुरुद्धरमित्याह॥ धूमत्वत्वेनि॥ व्याप्ति व्यापकस्याग्रहइति। व्याप्ति व्याप्यत्वेनानिश्चयस्य त्वइत्यर्थः॥ व्या
प्यतावच्छेदकनिश्चयं विना व्याप्तेर्दुर्निश्चयत्वादिति भावः॥ वह्न्यनुमितीति॥ व्याप्त्यनुमानासंभवादिति भावः। एतेनदर्शि
तसंशयाद्यनुपपत्त्योक्तनियमस्यैव तत्तमशीलस्य नियमांतरस्यानभ्युपगमे च॥ यद्धर्मावच्छेदेनेति॥ पर्वतीयधूमे विशिष्य

ग.प.
४४

ध्यासग्रहेपि धूमत्वावच्छेदेन व्याप्तेर्ग्रहात्तद्विशिष्टपरामर्शानुपपत्तिरिति भावः॥ अवच्छेदकधर्मनिष्ठयाधीनोपनीतभान
मादाय नियमोपगमाद्दर्शितसंशयादि व्यभिचारोपि शक्यते वारयितुमित्याशंक्याप्रयोजकतामप्याह भानाभावादिति।
अवच्छेदकधर्मदर्शनाधीने पूर्वं धर्मितावच्छेदकविशिष्टविषयकनिश्चये व्यभिचाररूपं बाधकमप्याह॥ चंदनत्वे
ति॥ सौरभादेर्बुद्ध्यावित्यग्रिमेणान्वयः। व्याप्तिप्रकारेण चंदनत्वादेरग्रहात् तत्र सौरभानुमितिसंभव इति भावः॥ ननु त
द्धर्मविशिष्ट एव तद्भासत इत्यस्य तदन्यधर्मविशिष्टे न भासत इति नार्थः किंतु तद्धर्मविशिष्टे तद्भासत इत्येव॥ तथा
चोक्तस्थले इदं चंदनं सुरभीत्येवोपनीतभानमुपेयते इत्यतो न व्यभिचार इत्यत आह। यदि चेति। इत्येव धीरस्त्वि
ति॥ उपनीतमत्स्य स्वरूपा एतादृशी धीरेवानुमितिकार्यकारिणी भवत्वित्यर्थः॥ ननु लिंगोपधानमते बाधकस्यासान्न तादृ
शोपनीतभानस्वीकारसंभव इत्यत आह नहीति। साधकविरहादिति॥ उपनीतभानोपगंतॄणां दर्शितनियम एव लिं
गोपधानसाधक इति भावः॥ व्यभिचारादर्शनसहकृतसहचारदर्शनरूपव्याप्तिग्राहकसंभवान्महानसीयधूमद

राम
४४

वपक्षीयधूमेपि सन्निकृष्टे व्याप्ते लौकिकप्रत्यक्षमेव स्वीक्रियते न तु पक्षीतभानमिति कथं योग्यत्वे इत्यादि नियमे विशिष्टपरा
मर्शानुपपत्तिरित्याशंक्य निरस्यति मूलेन चेत्यादिना॥ हेतुसाध्योभयसाक्षात्कारस्य व्याप्तिप्रत्यपेक्षणीयतां मूलोक्तामु
पपादयति दीधितौ संबंधीति॥ मीमांसकमते संसंबंधिकवस्तुव्यवहारएव संबंधिप्रत्यक्षहेतुतानतत्प्रत्यक्षेऽतस्तवै
वेति॥ नैयायिके नैवेत्यर्थः॥ क्रमत्वादित्यस्य यत्किंचिदेकसंबंधिग्रहविरोधींद्रियासंन्निकर्षादिदेशसमवधानादिदशा
यां प्रत्यक्षस्वारणायेत्यादिः॥ ननु संबंधिद्वयप्रत्यक्षस्य हेतुत्वेपि यत्र संबंधिप्रत्यक्षोत्पत्तिक्षणे तत्सामग्री विगमस्तत्र
तद्द्वितीयतृतीयक्षणयोः संयोगादिप्रत्यक्षापत्तिः। संबंध्यंशे लौकिकानात्मकस्य संयोगादिलौकिकप्रत्यक्षस्यानुभ
वविरुद्धतया रणापत्तेर संयोगादिति संबंधिग्राहकसामग्री हेतुताया आवश्यकत्वे संबंधिसाक्षात्कारहेतुतायां मानाभावइत्य
परितोषात्संबंधिप्रत्यक्षसामग्र्यभावस्यैव प्रकृते व्याप्तिप्रत्यक्षविरोधितामाह॥ तदनादरेपीति॥ साध्यघटितमूर्तिकेत्य
नेन व्याप्तिप्रत्यक्षे साध्यभानानुरोधेनापि साध्यसन्निकर्षापेक्षेति सूचितं॥ अत्मात्मकविशिष्टज्ञाने विशेष्यविशेषणसं

ग.प.
८५

वंधस्यानपेक्षणात्प्रमात्वोपयोगित्वयातत्परिगणनं संगमयति ॥ विशेषणेति ॥ तदंशे। तद्धिशेषणविशेष्यसंवंधांशे। नतुवि
शेषणांशे। संयोगनद्रव्यविशेषणकस्थले विशेष्ये विशेषणसंयोगस्य संयोगसंवंधेन विशेषणप्रमात्वनिर्वाहकत्वेपि इंद्रियसंयुक्त
विशेषणसंयोगस्य लौकिकसंन्निकर्षानात्मकतया विशेषणांशे लौकिकत्वानुपयोगित्वेन लौकिकत्वे शाब्दत्वस्यैवतदन्यथानुपपत्तेः सं
वंधांशे प्रमात्वं च संवंधघटितप्रमात्वं। अत्र च विशेषणविशेष्यसंवंधस्य तदानीमविद्यमानत्वेपि इदंत्वप्रमासीदिति भ्रमोत्पत्तिनिरि
त्यपरितोषात्कल्पांतरमाह ॥ लौकिकत्वेवेति ॥ उपयुज्यत इत्यग्रिमेणान्वयः ॥ लौकिकत्वमपि संवंधांशे वोध्यं ॥ विशेष्य
विशेषणसंवंधस्य विशेष्यघटितलौकिकसन्निकर्षसंपादकतयातदंशे लौकिकत्वोपयोगिता। अथवा तदंशाइत्यस्य
विशेषणांशाइत्येवार्थः ॥ विशेषणविशेष्यसंवंधस्य विशेषणांशे लौकिकत्वोपयोगिता कथं न समवायेन गुणादिविशिष्ट
बुध्यभिप्रायेण ॥ द्वितीयकल्पे विशेष्यपदं च सन्निकृष्टधर्मिमात्रपरं ॥ अतोनुभूयमानारोपस्थले विशेष्यविशेषणसं
वंधासत्वेपि विशेषणांशे लौकिकत्वान्नासंगतिः विशेषणविशेष्यसंवंधस्य लौकिकपदस्य प्रमात्वघटकलौकिकविष

रा.म
८५

पतापरतयायथाश्रुतमेववासमर्थनीयं॥विशेषदर्शनस्यसमतेनिश्चयविशेषेप्यहेतुतयाउपयोगितायाः प्रकारमाह॥वि
शेषदर्शनंचेति॥क्वचिदिति विपरीतकोटिभासकतद्दुष्टत्वादिकालीननिश्चयइत्यर्थः॥अत्राप्युपयुज्यतइति संबध्य
ते॥क्वचिदिति चमत्कारांतरेण यत्र नविशेषणज्ञानंतत्रत्यविशिष्टज्ञानइत्यर्थः। दर्शनत्वेनेत्यंतं स्मारकतायां हेतुः॥स्मार
कतयाउपयुज्यतइति संबंधः॥ एवंचविशिष्टप्रत्यक्षनिर्वाहकतयामेवकीर्तनमिदंनतत्कारणमात्रसेवेति भावः॥वि
शेषणज्ञानस्यैवविशेषणभासकसन्निकर्षत्वात्सन्निकर्षांतरकथनंकिमर्थमित्यतआह॥विशेषणस्यचेति॥तदंशे॥वि
शेषणांशे॥लौकिकतायामिति।इत्थंचमूलेसन्निकर्षपदंलौकिकसन्निकर्षपरंबोध्यं।व्याप्तिप्रविष्टचरमांशस्यव्याप्तेक
मतेधूमत्वरूपस्यलौकिकसन्निकर्षादेवभानात्प्रकृतव्याप्तिविशिष्टप्रत्यक्षसामग्रीघटकत्वमपिविशेषणलौकिकस
न्निकर्षस्येत्यविरोधः एवंचवह्नीत्यादिमूलंपरमससिद्धंसामान्यप्रत्यासत्त्यभावमभ्युपेत्यसामान्यलक्षणासत्त्वेप्यासे
कास्यानुपयोगितांदीधितिकृदाहवस्तुतइति परमार्थतइत्यर्थः॥एतेनयदिसामान्यप्रत्यासत्त्यभावोभ्युपगम्यतेतदा

ग॰प॰
५६

स्यतिरेकेति सूचितं न च यो यत्रेत्यादिनियमोपगमे नैव पर्वतीयधूमे व्याप्तिविशिष्टप्रत्यक्षसामग्री संभवति। न तु पर्वते वह्नि
विशिष्टप्रत्यक्षसामग्रीति विशेषणत्यादनं मूलकृत उपपद्यते। नियमानभ्युपगमे ज्ञानसन्निकर्षघटितसामग्र्या उभ
यत्राविशेषेण विशेषोक्तेरत्यन्तासंभवात्। तथा च व्याप्ते धूमत्वादिरूपत्व एव पक्षीयधूमे तदंशस्य लौकिकसन्निकर्षा
देव भानात् धूमत्वांशे वह्निसमानाधिकरणधूमवृत्तित्वस्यैव ज्ञानसन्निकर्षग्राह्यतया तत्र च तथाविधमहानसीयधू
मवृत्तित्वस्य तन्मात्रवृत्तिधूमत्वत्वप्रकारेण पूर्वं गृहीतत्वादुक्तनियमो निर्वहति न तु व्याप्तेः सामानाधिकरण्यरू
पत्वे। तथा च व्याप्तेरैक्ये मूलकृतो निर्भर एवेति दीधितिकृतां व्याप्तिभेदपक्षे स्वत्वाभावाभिधानविरोध इति वाच्यं।
मूलकृता स्वमते व्याप्तेः पक्षधर्मधूमसत्त्वहेतुतया व्याप्तेरैक्याभिधानात् प्रसक्तिरिति दीधितिग्रंथे प्रसक्तिपदस्य पक्षी
यधूमे स्वमतव्याप्तसत्त्वरूपप्रसक्तिपरतया व्याप्तिभानानाते उक्तनियमभंगरूपप्रसक्तिसत्त्वेपि तद्ग्रंथाविरोधात्॥ केचित्तु
व्याप्तिभेदेपि सामान्यप्रत्यासत्त्याकलव्याप्त्यनुभवात् स्वमतव्याप्तेः पक्षवृत्तिधूमे सत्त्वमुपपद्यत इति किमर्थमेकैव

राम
५६

हीत्यक्तमित्यत्तु शब्दस्य स्वरूपमेव वक्तव्यमापत्त्यादाह वस्तुत इति। वस्तुगत्येत्यर्थः॥ भेदेपीत्यनेनान्वयः। सामान्यतः। सामान्यप्रत्या

सत्तिबलात्। तथैव। व्याप्तित्वेनैव। तथा च धूमनिष्ठव्यापकवह्निसामानाधिकरण्यरूपैव व्याप्तिरिहाभिप्रेता प्रतियोगितावच्छे

दकादीनामैक्याच्चोपचारादेकपदप्रयोग इति व्याप्तिवादोक्तमेवानुसरणीयं॥ न च प्रतियोगितावच्छेदकादीनामैक्यस्याकिंचि

त्करतया तत्प्रतिपादनमात्रफलस्योपचारस्य वैयर्थ्यमिति वाच्यं। सखंडे परंपरासंबंधाखंडस्यैव प्रत्यासत्तितया तादृश

वह्नित्वादिरूपसामान्यप्रत्यासत्त्या निखिलवह्निमत्तादिभानेन व्याप्तित्वेन व्याप्तिप्रत्यक्षस्य सकलव्याप्तिविषयकत्वलाभार्थं

उपचारानुसरणात्॥ अन्यथा जातिलिंगतावादिमतोक्तसामान्यलक्षणानुपयोगरूपदोषस्य स्वमतेपि सत्त्वादसंगत्यापत्तेः॥

एवं च सिद्धांतलक्षणे एतन्मूलग्रंथसंगतार्थतया वस्तुत इत्यादिफक्किकावर्णनं भ्रमविजृंभितमेवेत्याहुः॥ पक्षवृत्तिधूमा

सन्निकर्षदशायां धूमत्वरूपव्याप्तेरपि तत्रोपनेयेनैव ग्रहस्य स्वीकरणीयतयोक्तनियमसत्त्वे तद्दलोपपत्त्या तदस्थलीयमानस

विशिष्टपरामर्शानुरोधेनोक्तनियमोऽनुमानप्रामाण्यवादिनापि न स्वीकार्य एवेत्याशयेन सामान्यप्रत्यासत्तिपक्षमालंब्य प्र

ग.प.
४७

र्वपक्षयति । नन्विति ॥ निरूपयतां । निश्चियतां । पर्वतो वह्निमानित्यादिचाक्षुषसामान्यएव वह्निचक्षुःसंयोगादेर्हेतुतया वह्ने
रसन्निकर्षादिति मूलस्यासंगतिरिति वदतो मिश्रस्यमतं निराकरोति । नहीति । वह्निरिंद्रियेणद्रव्यस्याधेयतया ग्रहे आधेय
त्वविषयितावह्नित्वद्रव्यविषयिताशालि वह्निरिंद्रियजन्यज्ञानसामान्ये प्रतियोगितया उपनीतघटादिविषयके घटो ना
स्तीति चाक्षुषादौ व्यभिचारणायाधेयतयेति । मानसे वा त्वग्ग्रहस्य स्यादिविषयकस्वप्नज्ञाने व्यभिचारवारणाय वह्नि
रिंद्रियेणेति ॥ गुणवत्तावगाहिचाक्षुषादौ तद्वारणाय द्रव्यस्येति ॥ आधाराधेयत्वयोस्तु स्यादिति वेद्यत्वाभावे पर्वतोवह्नि
मानित्यादिज्ञानसंग्रहाय तद्रूप्यवेति ॥ द्रव्याधारत्वस्येत्यर्थः ॥ अत्रापि वह्निरिंद्रियेणेत्यनुषज्यते । तथाचैतन्मते आधारत्व
विषयतानिरूपितद्रव्यविषयताशालि वह्निरिंद्रियजज्ञानत्वं कार्यतावच्छेदकं ॥ वस्तुतस्तु त्वगिंद्रियादिसंयोगान्वास्तु षा
द्यनुत्पत्त्या चक्षुःसंयोगत्वादिनैव हेतुता वाच्या ॥ तथाचचाक्षुषत्वादिकमेव कार्यतावच्छेदके निवेशनीयं । नतु वह्निरिंद्रि
यजन्यज्ञानत्वमपीति बोध्यं । इत्यादाविति ॥ इत्याद्युपनीतदंडादिमत्तावगाहिनि तद्दृशि शुविशेषणकाभावचाक्षु

राम
४७

पादादित्यर्थः॥ फलापत्त्या परामर्शं क्वचिन्निराकरोति॥ कथमिति॥ अन्यथा॥ असन्निकृष्टद्रव्यत्वस्य विशेषणांशेऽप्यभाने। मुख्य
विशेष्ये वृत्तिनियामकसंबंधेन साक्षात् द्रव्यप्रकारकत्वं कार्यतावच्छेदकं वक्तव्यमतो विशेषणांशे द्रव्यत्वावगाहिसुखस्य
लेन व्यभिचार इत्याशंकां निराकरोति॥ न चेति॥ पक्षधर्मव्याप्तेः प्रकारत्वे परंपरया व्याप्तिघटकवन्हेरपि प्रकारतान्तत्र व्य
भिचारवारणाय साक्षादिति॥ आधेयतयेत्यस्य व्यावृत्तिमाहाभेदारोप इति॥ स्मर्यमाणरजतस्याभेदेनारोप इत्यर्थः॥ आ
धेयतया। वृत्तिनियामकसंबंधेन। भूतले घटाभाव इत्यादावभावत्वांशे पि व्यावृत्तिर्बोध्या॥ न चैवमपीदंताविशिष्टे मुख्य
विशेष्ये इदंतात्वकतत्ताप्रकारकप्रत्यभिज्ञाने व्यभिचार इत्यत आह॥ इदंतेति॥ तत्तावदभेदो भासत इति॥ ननु तत्तादिसंस
र्ग इति शेषः। तावतापि सोयमित्याकारकता निर्वाहादिति भावः॥ मानाभावादिति॥ इदंशाकारणतायामित्यादिः। सामान्य
प्रत्यासत्तिजन्यत्वस्य कार्यतावच्छेदकनिवेशे न सामान्यजप्रत्यक्षेण व्यभिचार इत्यत आह। तन्नेति। भानसंभवात्। भाने युक्तिसंभ
वात्। तदनभ्युपगमे तत्रासंसर्गाभावसंशयनिरत्ययुपपत्तेरिति भावः। यदि तत्तावदभेदभ्रमोपि तादृशसंशयादिविरोध्युपेय

ग.प.
४९

तेनद्वाप्रकृतेपीति॥ अनुमितिस्थलेपीत्यर्थः॥ अभेदग्रहेण॥ अभेदोपनीतभानेनाकृतार्थत्वात्तद्वन्ह्यभावसंशयनिरुत्थाद्यु
पपत्तेः। प्रकारांतरेणप्रत्यभिज्ञायांव्यभिचारोद्धारंनिरस्यति। एतेनेति। एतेन। व्यभिचारस्यदुर्वारत्वेन। तत्ताकारादुपनीत
त्वंतत्तात्वेनाभासमानत्वं। तच्छब्देनाव्यवह्रियमाणत्वंवा। आद्ये तत्तात्वानवच्छिन्नरजतनियामकसंबंधावच्छिन्नद्रव्यविष
यताविशिष्टरजताध्यक्षत्वादिकंकार्यतावच्छेदकं॥ द्वितीये तच्छब्दप्रयोगाजनकत्वसहिततद्रजतसंबंधावच्छिन्नद्रव्यविषयता
विशिष्टमितिबोध्यं॥ अयोग्यस्येवासन्निकृष्टस्याप्युपनीतस्यचाक्षुषादौभानमविरोधेनदुरपन्हवमितिसूचयितुंचै
त्रपदेत्यादिदृष्टांताभिधानं। दंड्यासीदितिज्ञानेव्यभिचारस्यातीतत्वानवगाहित्वविशेषणेनशक्यवारणतयातदनवगा
हिनिवर्त्तकत्वोऽतीतदंडादिभानेव्यभिचारमाह॥ अयंदंडीति॥ निरुक्तकार्यतावच्छेदकयोराद्यंदूषयति॥ तत्तात्वस्येति॥ अ
तिरिक्तस्येति। दंडत्ववन्हित्वाद्यतिरिक्तस्येत्यर्थः॥ तथाचतदनवच्छिन्नद्रव्यप्रकारतयैवाप्रसिद्धेरितिभावः। नचतत्तादप्रति
पाद्यतावच्छेदकत्वंअन्यद्वाकिंचिदिदृशंवन्ह्यादिनिष्ठंतत्तात्वंनतुवन्हित्वादिकमितिवाच्यं॥ तस्यहेपिवन्हित्वादिनाव

राम
४९

न्यादिमत्त्वग्रहे सोयमिति व्यवहारात्। द्वितीयपक्षेऽजनकत्वं फलानुपधायकत्वं स्वरूपायोग्यत्वं वा तत्राद्यं दूषयति॥ तदुच्छे
ति। निमित्तान्तरविरहे इति। प्रयोगे ज्ञानादिविरहेत्यर्थः। तथा च ताहशधर्मस्य कार्यतावच्छेदकत्वे यत्र जातेरपि प्रत्यभिज्ञाने
निमित्तान्तरविरहात्तत्र तदुद्भवप्रयोगस्तत्र व्यभिचार इति भावः॥ द्वितीयं दूषयति। तज्जनने इति। प्रकृतेपि। वन्हिमानित्या
दिज्ञानेपि॥ इष्टत्वादिति। तदुद्भवस्य वह्नित्वाद्यवच्छिन्नवदर्थकतया व्यवहर्त्तव्यज्ञानविधया तत्प्रयोगे वह्नित्वादिवि
शिष्टप्रकारकज्ञानमात्रस्यैव स्वरूपयोग्यत्वादिति भावः। तथा च तदयोग्यद्व्यप्रकारकज्ञानमेवासिद्धमिति भावः॥
अत एव विद्यमानदण्डाद्यात्मकतत्तावगाहिप्रत्यभिज्ञायां व्यभिचारादेव॥ चक्षुराद्युपनीतप्रभादिगोचरभूतल
स्पर्शनादौ मानसादौ बाह्यविषयकत्वप्रानुभवे व्यभिचारवारणाय तदिन्द्रियग्राह्येति॥ तदिन्द्रियासाधारणकारणकलौ
किकप्रत्यक्षयोग्यार्थकं। घटस्पर्शनादौ च चक्षुरादिसंयोगस्य व्यभिचारवारणाय तेनेति। त्वगादिसंयोगाद्घटादेः चाक्षु
षादिवारणाय तत्संयोगेति। एतन्मते आधेयतयेति कार्यदिग्नियनिवेशाद्न्यनापि व्यभिचारं दर्शयति॥ नयनादिवेति॥ उ

ग॰प॰
४९

क्तकार्यकारणभावानस्युपगमेऽनिष्टमाशंकते। अथेति॥ मानसनिश्चयस्येष्टत्वादन्यथा उक्तकार्यकारणभावे नापि तद्धा
रणासंभवाच्चायनइति॥ संशयस्यानुभवसिद्धत्वान्निश्चयइति॥ निश्चयानुत्पत्तिप्रयोजकाभिधानेनोत्तरयति॥ कचि
दित्यादि॥ तत्सहचरितेनेति॥ दंडसहचारीत्यर्थः॥ अदर्शनादित्यं तंतदस्मरणे हेतुः। तदस्मरणादिति॥ तथा च विशेष
णज्ञानाभावादेव तत्प्रकारकनिश्चयाभाव इत्यर्थः। साधारणधर्मदर्शनादिना कोटिद्वयसहचरितधर्म्मदर्शनादिना॥
कोटिद्वयस्मरणइत्तिशेषः॥ संशयस्यैवजननादिति॥ तथा च निश्चयत्वप्रयोजकविपरीतकोटिभानसामग्रीविर
हस्यासत्वान्न निश्चयापत्तिरिति भावः। ननु कोटिद्वयोपस्थितावपि यत्र विशेषदर्शनवशाद्विपरीतकोटिभानसामग्री
विरहः स यत्र वा तत्कोटिसहचरितधर्मदर्शनात्तत्कोटेरेवोपस्थितिस्तत्र तन्निश्चयो दुर्वार इत्यत आह॥ सतिविशेष
दर्शनादाविति॥ आदिनाकोट्यंतरोपस्थित्यभावस्य विकल्पेन परिग्रहः॥ संशयनिश्चयसाधारणद्रव्यविशिष्टबु
द्धिविशेषे इंद्रियसंयोगहेतुतायाः संशयानुपपत्त्या उक्तिसंभवोपिनेत्याह यद्युक्तं चैतदिति॥ एतद्यवहितस्यापि इंद्रि

राम
४९

दे: सति विशेषदर्शनादौ उपनयान्निश्चयजननं कथमन्यथेत्यंतरं विशेषादर्शन इति पूरणीयं। असौ संशयः तद्धि शिष्टबु
द्धिः बहिरिंद्रियजन्यद्रव्यविशिष्टबुद्धिः। निश्चयत्वं जन्यतावच्छेदके प्रवेश्यमित्याशयेन शंकते। नतन्निश्चय इति निश्चयत्वस्या
र्थसमाजग्रस्तत्वेन जन्यतावच्छेदके प्रवेशासंभव इति कथयिष्यन् निश्चयत्वाभावस्य व्यभिचारे किंचित्करता माह किंतेने
ति न तु व्यभिचारवारणान्यथानुपपत्त्यार्थसमाजग्रस्तस्यापि कार्यतावच्छेदकत्वमुपेयमित्यत आह। स्क्वेति। तथा। निश्च
यत्वस्यापि जन्यतावच्छेदकत्वस्वीकारः। दर्शनादित्यत्रासमस्ततया विशेषस्येत्यनुषज्यते॥ संभवादुक्तत्वेः उक्तकार्यकारण
भावस्य निर्युक्तिकत्वादिति शेषः यद्यपि प्राग्रे च निश्चयस्येष्टत्वमुक्तं तथापि तदा मुख्यानभिधानादनुभवकलहान्निरुक्तेरि
दानीं यादृशसामग्रीतो विशेषादर्शनदशायां संशयः तत एव विशेषदर्शनकाले निश्चय इत्यनुभवसिद्धनियममवलंब्य नि
श्चयोत्पत्तिर्दर्शिता। अभ्युपेत्याह मा भूदिति तत्र मानसेत्याह यन्नियमस्य चक्षुरादींद्रियसंयोगापेक्षानियमस्यासत्त्वान्न विशेषो
विजातीयं ज्ञानं तथा च तत्करणतयानुमानस्य प्रमाणतेति भावः न च व्याप्यदर्शनानंतरजातालौकिकप्रत्यक्षत्वं तादृशानुव्यवसा

यद्विषयकरतिवाच्यं साध्यनिश्चयाद्युत्तरकालीनतादृशप्रत्यक्षानंतरं तादृशानुव्यवसायानुदयात् न च साध्यनिश्चयाद्युत्तरत्व
मपि निवेशनीयमिति वाच्यं तदनुस्थितावपि तथाविधानुव्यवसायोदयात्॥ अस्त्वनुव्यवसायबलादनुमितित्वं जातिः सा प्र
त्यक्षत्वव्याप्यैवेति न तत्करणस्य प्रमाणांतरत्वेति शंकते मानसेति॥ अनुमितौ प्रत्यक्षत्वस्याप्रामाणिकतया अनुमितिः प्र
त्यक्षविजातीयैवेति न तत्करणं मानांतरमिति समाधिमभिसंधाय प्रत्यक्षत्वे मानं पृच्छति कुत इति॥ पूर्वपक्षी शाब्दोय
मित्यादावपि प्रत्यक्षत्वमंगीकुर्वाणोनुभवत्वमेव प्रत्यक्षत्वसाधकमित्युत्तरयति॥ अनुभवत्वादिति॥ अनुभवत्वप्रत्य
क्षत्वयोः समनियतत्वे समनियतजातिद्वयानंगीकारेणानुभवत्वं यदि जातिस्तदा प्रत्यक्षत्वमेव तदिति साध्याविशेष इ
ति दूषयति किमेवमिति स्मृत्यन्यज्ञानत्वरूपोपाधिरेवानुभवत्वं प्रत्यक्षत्वसाधकमतो न साध्याविशेष इत्याशंकते स्मृत्य
न्येति॥ अनुभवत्वमित्यनुषज्यते। अप्रयोजकत्वादिति अनुकूलतर्कं विना पक्षेतत्समेवाव्यभिचारसंदेहस्यापि व्याप्ति
विरोधित्वादिति भावः ननु विशेषणज्ञानादिजन्यतावच्छेदिका अनुभवत्वरूपसाधारणी जातिरेव साक्षात्करो

मीत्यनुव्यवसायसाक्षिकंप्रत्यक्षत्वंनत्वनुमित्यादिवृत्तिव्याप्यवृत्ताअव्याप्यजातिः प्रामाणिकी तथाच प्रत्यक्षानुमानयोर्न ए
यकप्रमाणतानच विशेषणज्ञानजन्यतावच्छेदकजातेरनुमित्यादिसाधारण्ये बाधाभावः विशेषणज्ञानासत्त्वे परामर्शादि
विरहेणैवानुमित्याप्रत्ययोगादितिवाच्यं। दृष्टिव्याप्तिमितरभेदद्रव्यत्वाद्याकारकप्रसिद्धसाध्यविशेष्यकानुमित्युत्पादकाले
साध्यविशेषणकानुमितिवारणाय विशेषणधीजन्यतावच्छेदकस्यानुमितिसाधारणताया आवश्यकत्वात् यदि च दृष्टि
वीतरभिन्नेत्यनुमितिर्विशिष्टवैशिष्ट्यविषयिणीति विशेषतावच्छेदकप्रकारकधीविरहान्न तस्याः साध्यविशेष्यकानुमिति
दशायामापत्तिरित्युच्यते तदापि अनुमितेर्विशेषणतावच्छेदकप्रकारकधीजन्यतावच्छेदकाक्रान्ततत्त्वेनैव प्रत्यक्षानुमित्योः
स्यादिति व्यावृत्तेर्जातीयत्वमावश्यकं स्यादिति व्यावृत्तजातेरेव तज्जन्यतायामपि अवच्छेदकत्वात्॥ यदि चान्वयिपरामर्शरूपकारण
विरहादेव नाप्रसिद्धसाधकस्थले साध्यतावच्छेदकविशिष्टवैशिष्ट्यानुमितिः स्वं तं च साध्यतावच्छेदकप्रकारकज्ञानदशायामप
प्रसिद्धसाध्यकव्यतिरेकिपरामर्शात् साध्यविशेष्यकैवानुमितिरूपेयते साध्यप्रसिद्धेस्तत्र प्रतिबंधकत्वानुपगमात् अथवाप्र

ग॰ प॰
५१

सिद्धसाध्यकस्थलेऽपि साध्यविशेष्यकानुमित्यनुपगमे व्याप्तिविरहात् तादृशव्यतिरेकिपरामर्शात् सर्वत्र विशेष्ये विशेषणमित्या
दिरीत्या साध्यविशेषणकैवानुमितिरुपेयत इत्यभ्युच्यते। तदाभिसमानविषयकशाब्दबोधचाक्षुषादिसामग्रीकाले अनुमिति
वारणायानुमितित्वावच्छिन्नं प्रति तादृशसामग्र्याः पृथक् प्रतिबंधकत्वं सिद्धिरिति नावाच्यं अनुमितेः प्रत्यक्षविरोषत्वमते मान
सत्वावच्छिन्नं प्रति तादृशसामग्र्याः पृथक् प्रतिबंधकतयैवोपपत्तौ न तत्कल्पनमिति लाघवादनुमितौ प्रत्यक्षत्वसिद्धिर्निष्प्रत्यू
हैवा न च कश्चित् तराब्दादिसामग्रीकाले भिन्नविषयकानुमित्युत्पत्त्या अनुमितेर्मानसत्वनये समानविषयकमानसत्वमेव तादृश
सामग्रीप्रतिबध्यतावच्छेदकं वाच्यं तथा च भिन्नविषयकानुमित्यन्यमानसाऽसंग्रह इति वाच्यं भिन्नविषयकं मानसेच्छासुत्तेज
कीकृत्य भिन्नविषयकमानसस्थले पृथक् प्रतिबंधकतायाभवें तोऽप्यवश्यकतया समानविषयकमानससाधारणप्रतिबं
धकतया तदसंग्रहे व्याप्तिविरहात् तन्न चानुमित्यन्यमानसस्थलीयप्रतिबंधकतायामनुमितित्वप्रकारकेच्छाया अतिप्रसं
गभयेनानुत्तेजकतया अनुमितित्वप्रकारकेच्छासुत्तेजका कृत्यानुमितिस्थले पृथक् प्रतिबंधकत्वमुभयोरावश्यकमिति नोक्त

राम
५१

लाघवावकाशइतिवाच्यंयद्विषयकशाब्दादिसामग्रीकालेनुमितिस्तत्प्रकारकेच्छयानतदाप्यनुमितिर्जायतेतत्रैवदर्शितलाघव
संभवात्नचतत्रलाघवेपियत्रानुमितित्वप्रकारकेच्छावलादनुमितिर्जातातत्रत्स्थलीयानुमित्यव्यमानसन्निश्चप्रतिवध्यताया
मनुमित्यन्येमानसत्वमेवावच्छेदकंवाच्यंअन्यथाअसत्यांमानसत्वप्रकारकेच्छायांसत्यांचकथितशाब्दादिसामग्र्यामनु
मितित्वप्रकारकेच्छासत्वेप्यनुमित्यनुपपत्तेरितिगौरवमितिवाच्यं॥अनुमित्यन्यमानसेसर्वत्रलौकिकसन्निकर्षबलादा
त्मत्वभानोपगमेनलौकिकविषयितासंबंधेनात्मत्वस्यैवानुमित्यन्यमानसत्वस्थलीयस्यतादृशप्रतिवध्यतावच्छेदकत्वो
पगमेनानुमितेरुपपादनादितिनोक्तप्रयोजकत्वशंकोत्पत्तौऽनुमितौप्रत्यक्षत्वस्यबाधकमाह॥अनुमिताविति॥साक्षा
त्कारित्वग्रहप्रसंगवारणप्रकारमाशंकते॥तद्व्यंजकेति॥स्फरभिवंदनमित्यादिचाक्षुषादेःसौरभादिसाक्षात्कारत्वेना
नुव्यवसायवारणायविशेष्यतासंबंधेनतत्तद्विषयधर्मितावच्छेदकताप्रत्यासत्त्यासाक्षात्कारित्वप्रकारकप्रत्यक्षंप्रतिस्वरूप
संबंधेनतत्तद्विषयनिष्ठलौकिकसंन्निकर्षजन्यत्वस्यहेतुत्वात्तद्विरहादेवानुमित्यनंतरंवन्हिंसाक्षात्करोमीत्यनुव्यव

ग.प.
५२

साध्यापत्तिरित्यर्थः॥ लौकिकसन्निकर्षादित्यादिना दोषपरिग्रहः। आत्मानुमितावित्ति। तस्या आत्मनिष्ठमनःसंयोगरूपलौकि
कसन्निकर्षजन्यत्वस्य न चैवमात्मोपनीतभाने भवता मतिन कथं साक्षात्कारित्वग्रहः॥ अनुमितेरिव तस्याप्यात्ममनोयो
गासमवायिकारणकत्वादिति वाच्यं। मानसत्वावच्छिन्नाया एव मनोयोगजन्यतायास्तत्र्यंजकत्वोपगमात्। मानसज्ञाने आत्म
नो लौकिकसन्निकर्षादेव भानात् चाक्षुषत्वादावेव तस्योपनीतस्य भानात् तत्र च मानसत्वावच्छिन्नजन्यतायाः अभावात्॥ अ
नुमितौ मानसत्वादीनां चानुमितौ ताद्रूप्याऽभिजन्यताया अनपायादिति भावः। ननु फलाघवेनानुमितेर्मानसत्वसिद्धौ
उक्तातिप्रसंगवारणाय साक्षात्कारित्वग्रहं प्रत्यनुमितिभेदस्य कारणत्वमेव कल्पनीयं इत्यतः प्रत्यक्षप्रमाणेनानुमितौ प्रत्य
क्षत्वाभावं व्यवस्थापयति। वह्निमिति॥ यद्यपि वह्निं न साक्षात्करोमीति प्रतीतेरात्मनिष्ठे वर्त्तमानकालीनवह्निज्ञाने वह्निसा
क्षात्काराभाव एव विषयः न त्वात्मनिष्ठवर्त्तमानवह्निज्ञाने साक्षात्त्वाभावः स्वरूपतो भासमानसाक्षात्त्वजातेः प्रदार्थतावच्छे
दिकाया अभावस्य तादृशाद्वेनाभत्वापत्त्या यथा प्येकविशेषणविशिष्टाधिकरणे विशेषणद्वयविशिष्टाभावप्रतीतेस्त

राम
५२

द्विशेषणवत्तिनद्विशेषणाभावपर्यवसन्नत्वमिति वह्निविषयकत्ववज्ज्ञाने साक्षात्तद्रूपविशेषणाभावः प्रकृते पर्यवस
तीत्याशयेनोक्तं साक्षात्त्वाभावेति। ननु सुरभि चंदनमित्यादिचाक्षुषदशायां जातस्य सौरभं न पश्यामीति प्रत्ययस्ये
वोक्तप्रत्ययस्यापि भ्रमत्वमस्त्वित्यत आह॥ अगत्येति। चंदनं पश्यामीत्यादिप्रतीत्या सुरभि चंदनमित्यादिज्ञाने चाक्षु
षत्वादेरावश्यकतया गत्यंतरविरहेण सौरभं न पश्यामीत्यादौ चाक्षुषत्वाद्यभावांशे भ्रमत्वकल्पनमित्यर्थः। अनुमि
तोऽप्यसाक्षात्कानुपगमेन न साक्षात्करोमीति प्रतीतेः प्रमात्वसंभवात् न तत्परित्यागः। धियां प्रमात्वसौत्सर्गिकत्वा
दिति भावः॥ अत्र नव्याः सौरभं न पश्यामि न साक्षात्करोमीत्यादिप्रतीतेः प्रमात्वानुरोधेन लौकिकत्वाख्यविषयिताविशे
षः कल्प्यते। तद्विशिष्टचाक्षुषत्वं पश्यामीत्यस्य तद्विशिष्टसाक्षात्कारत्वं साक्षात्करोमीत्यस्य तदभाव एव न पश्यामि न
साक्षात्करोमीत्यस्य विषयः। न च तथापि सौरभनिरूपिततादृशविषयिताविशिष्टचाक्षुषाप्रसिद्ध्या सौरभं न पश्या
मीत्यत्रागतिरेवेति वाच्यं। चाक्षुषनिष्ठतादृशविषयितायां सौरभनिरूपितत्वाभावस्यैव तादृशप्रत्यक्षविषयतोपग

मात्। अंधः आकाशं न पश्यतीत्यादावपि कथंचित्त्वमात्त्वमुपपादनीयं। न चातिरिक्तविषयिताऽप्रसिद्धं तत्तया नस्वीकरण
योग्येति वाच्यं। प्रतीत्यनुरोधेन तत्कल्पनेऽप्रसिद्ध्यंतभयस्याविरोधित्वात्। अत एवाभावत्वप्रतियोगित्वादीनामतिरिक्तप
दार्थत्वं ग्रंथकृतानुमतं॥ न चैवं प्रत्यक्षत्वजातिरेवाप्रामाणिकी स्यात्। तत्कार्यस्य लौकिकत्वेनैवोपपादनसंभवादिति वा
च्यम्॥ विशेषणज्ञानादिजन्यतावच्छेदकतयैव तत्सिद्धेः विषयिताविशेषापेक्षया जातेस्तत्र लाघवात्॥ सर्वांशोपनी
तभानस्याप्रामाणिकत्वे तदसंग्राहकतयापि लौकिकत्वस्य विशेषणतावच्छेदकप्रकारकज्ञानादिजन्यतावच्छेदकत्वासं
भवात्॥ एवं चानुमितेः प्रत्यक्षतामतेपि न तत्र साक्षात्त्वाभावग्रहानुपपत्तिरिति तस्याः प्रत्यक्षत्वाभावेऽनुमत्यंतरमेवानु
संधेयं॥ संनिकर्षविरहादित्यनुमानप्रामाण्यव्यवस्थापिकां मूलयुक्तिं सामान्यलक्षणानभ्युपगमपक्षे संगमयति।
सामान्येति॥ अप्रसिद्धवन्ह्यादीति॥ पूर्वज्ञातपर्वतीयवन्ह्यादीत्यर्थः। व्याख्यातं। प्रत्यक्षविजातीयतया व्यवस्थापि
तं अन्येषां युक्तिमुपन्यस्यति व्यवस्थापयिष्यत इति केचिदित्यत्र रसोद्भावनं तद्बीजं तु असन्निकृष्टस्याभावस्य सा

ध्यतया अनुमितौ भानेपि तस्याः प्रत्यक्षत्वं निराबाधमेव यत्किंचिद्विषयसन्निकर्षजन्यतयैव प्रत्यक्षत्वनिर्वाहात् सा
ध्यांशे प्रकारतया भासमानस्याभावत्वादेः सामान्यस्यापि सन्निकर्षतया अज्ञाततत्त्वमात्रेणाप्यसन्निकृष्टत्वानिर्वाहा
च्च ॥ न च ज्ञातस्य साध्यस्यानुमितौ भाने तादृशाभावविरोध्यकोपनयस्य तत्र व्यभिचारप्रसक्तिरेव तस्याः प्रत्यक्ष
त्वबाधिकेति वाच्यं । प्रकारतायाश्चोपनीयकज्ञानजन्यतावच्छेदकत्वोपगमेन व्यभिचारानवकाशात् तन्मूलस्य विरो
ध्यकमानसोपनीतभानेपि तस्यांशेऽभेदसंबंधेन प्रकारतोपगमेन तत्संग्रहात् ॥ अन्यथा सामान्यप्रत्यासत्तिजन्या
ज्ञातविरोध्यकबोधे व्यभिचारस्य दुर्वारत्वात् ॥ वस्तुतः साध्यतावच्छेदकप्रकारेण ज्ञानेपि अभावत्वादिना साध्य
स्य सामान्यप्रत्यासत्त्यैवं ज्ञानं सम्यक् संभवतीति नोपनयस्य व्यभिचारसंभव इत्याद्यनुसरणीयं ॥ अप्रसिद्धसाध्यकानु
मितिमनभ्युपगम्यैतादृशयुक्तिं दूषयतां परेषां मतमाह ॥ तत्रेति ॥ भेदत्वादिना पृथिवीनिष्ठभेदत्वादिना आदिना
ह्रदे धूमात्यंताभाव इत्याद्यनुमितिप्रकारस्यात्यंताभावत्वस्य परिग्रहः ॥ जलादिप्रतियोगिकत्वग्रहे जलादिप्रतियो

ग॰ पृ॰
५४

गिकत्वानुमितिर्जलादिप्रतियोगिकत्वं साध्यतयाऽनुमितिविषयः इति यावत्॥ इत्थं नियामकसंसर्गस्य व्यापकताघटकत्वे तु ज
लादिरूपसाध्यस्य संसर्गतयापि तत्प्रतियोगिकत्वं विषयः संभवतीति द्रष्टव्यं॥ एतावतैव जलादिभेदस्य तादृप्येणासा
नदशायां पृथिव्यादिनिष्ठजलादिभेदप्रसिद्ध्या कृतमप्रसिद्धसाध्यकानुमितिस्वीकारेणेति भावः जलादिप्रतियोगिक
त्वानुमापकान्वयिनोऽनुपस्थितिदशायामपि व्यतिरेकिना तद्व्यक्तित्वादिनापि तदनुमानसंभवो बोध्यः अत्राप्ययं रहस्य
त्वरससूचनाय तद्बीजं तु पृथिवीनिष्ठभेदत्वादिना भेदमात्रानुपस्थितावपि जलादिव्यापकं पृथिवीत्वाभावाभावेन पृ
थिव्यादौ जलादिभेदसिद्धेरप्रसिद्धसाध्यकानुमितिमनभ्युपगम्य दुरुपपादत्वात् तदुपलाये पक्षैकदेशे जलादिभेदस्य प्र
सिद्धेव कदाचित्साध्यकानुमितेरप्युपपादनसंभवात्तद्दशानुमित्यैवाप्रसिद्धसाध्यकानुमानखंडनमौचित्यादिति एवं
तद्धर्मावच्छिन्नप्रतियोगिकत्वातिरिक्तत्वद्व्यक्तित्वस्याभावानास्य साध्यग्रहात्पूर्वं दुर्ग्रहत्वाद्धेतुत्वं तदस्याभावान्वेत्यादि
अनुमितिकारणविशिष्टपरामर्शानुपपत्तिरूपपूर्वपक्षमध्यकथितबाधकमुद्धृत्य यो यत्र पूर्वमित्यादिनियमं स्थाप

राम
५४

सत्तुपपादनं। सामान्यस्य प्रत्यासत्तित्वा

पित्वा अनुमितिस्थले पक्षे साध्योपनीतमानं सामान्यप्रत्यासत्तिमते पि निराकुर्वाणस्य कस्यचिन्मतं निरसितुमुपन्यस्यति मूले
कश्चिद्धिति परंपरासंबंधेन व्याप्यत्वं। परंपरासंबंधघटितं व्याप्यत्वं सामान्यप्रत्यासत्त्याकारः। जातिमात्रस्य लिंगत्वोपगमे ऽनु
भवविरोधमपाहर्तुं दृश्यते चेति ननु धूमत्वेन धूमे व्याप्तिग्रहदशायां धूमत्वोपस्थितेरावश्यकतया तत्रापि परंपरासंबंध
घटितव्याप्तेः शक्यग्रहत्वमधिकरणे धूमत्वावच्छिन्नवत्त्वघटितधूमव्यापकताग्रहे धूमघटितसंबंधेन धूमस्याधिकरणां
शे भानसंभवेन धूमत्वव्यापकतायां अपि वह्नौ भानसंभवात् धूमत्ववति संयोगेन वह्निमदिति त्वे भासमाने धूमत्वे पि वह्नि
मतः स्वसंयोगसमवायरूपपरंपरासंबंधभानसंभवाच्चेति व्यक्तिव्याप्तिज्ञानदशायां जातिव्याप्यग्रह एवासिद्ध इत्यत आ
ह नहीति मानाभावादिति धर्मिणः साक्षात्संबंधमाने धर्म्मस्य परम्परासंबंधमाननियमासिद्धेरिति भावः। अनुमित्यन्यथा
नुपपत्तेर्मानत्वसंभवेनाचार्यपरितोषाना दर्शिनियमे बाधकं पूरयति दीधितौ। तन्निष्ठेति अवच्छेदकधूमत्वादिनिष्ठे अव
च्छेदकान्तरं धूमत्वादि असंभवात् अवच्छेदकधूमत्वादौ अनुमितौ पयिकव्याप्तिमहासंभावात् अभावे हेतुतावच्छेदक

ग.प.
५५

स्यापितथात्वात् प्रकृतेऽविशेषितधूमत्वादिविशेषिताधिकरणस्य व्यापकताघटकत्वोपगमेपि धूमत्वत्वादिप्रकारेण व्यापक
सामानाधिकरण्यज्ञानमेवानुमितिहेतुर्वाच्यः सामानाधिकरण्यांशे निर्धर्म्मितावच्छेदकस्यानुमित्यहेतुत्वात् तथा सति प
म्परासंबंधेन धूमत्वादिसूच्यतया निश्चीयमाने ह्रदादावपि वह्न्याद्यनुमानापत्तेः वह्निसामानाधिकरण्यसामान्याभाव
स्य तत्राग्रहेण केवलेन वह्निसमानाधिकरणत्वेन धूमत्वादेस्तदा तद्ग्रहसंभवात् धूमत्वत्वाद्यवच्छिन्ने सामानाधिकर
ण्यग्रहश्च कथं धूमत्वत्वाद्युपस्थितिं विना साध्याभाववद्वृत्तित्वरूपा व्याप्तिरपि पक्षवृत्तौ व्याप्यतावच्छेदकनिश्च
यं विना मा प्रसीदुर्निश्चया उपनीतविपरीतकोटेरपि भानसंभवेन संशयसंभवात्त्नि धर्मितावच्छेदकसंशयासंभ
वेन साध्याभाववद्वृत्तिमानिति निश्चयसंभवेपि पक्षवृत्तितावच्छेदेन व्यभिचारसंशये च पक्षः साध्याभाववद्वृ
त्तिमानिति निश्चयेपि दुर्घट इति भावः। मानाभावादित्यस्य मानस्यावच्छेदके व्याप्तिप्रमितिजनकस्य तन्निष्ठावच्छेदकांत
रग्रहस्याभावात्। नियमेनासत्त्वादित्यर्थसंभवेन पूरणं विनापि निर्वाह इति द्रष्टव्यं॥ तस्मादित्यादेरव्यवधानव्य

राम
५५

स्थापितानुमानप्रामाण्योपनयस्यासन्निवेशयोरुपसंहारत्वासंभवात्। प्राग्व्यवस्थापितविशिष्टपरामर्शहेतुत्वोपसंहारत्व
माविष्कर्तुमाह। उपसंहरेतीति मूले पक्षे धर्मे व्याप्तिविशिष्टज्ञानमिति विशेष्यतायां विशेषणतायां वा अवच्छेदिकयाव्या
प्याप्रकारेण विशेष्यस्य विशेषणस्य वा पक्षीयहेतोर्ज्ञानं प्रथमत इत्यर्थः। एतच्च ज्ञानं सामान्यलक्षणाप्रत्यासत्तिमते:
स्मरणमेवान्यथानुमाहानसीयधूमादिविशेष्यकव्याप्तिस्मरणाधीनंप्रत्यक्षं। तत्र व्याप्तिपक्षधर्मतयोरेकत्र द्वयमित्यादि
रीत्याभानेपि तत्तस्य व्याप्तिविशिष्टत्तद्धूमे पक्षधर्मतायाः पक्षेवाज्ञाहज्ञातधूमस्य वैशिष्ट्यावगाहितासंभवति तादृश
बुद्धौ व्याप्तिविशिष्टत्तद्धूमज्ञानस्य विशेष्यतावच्छेदकविशिष्टविशेष्याादिज्ञानविधया हेतुत्वात्। अत एव वचनतस्यानुमितिहेतु
तापितत्साधारणे नैकत्र व्याप्तिपक्षधर्मतोभयावगाहिज्ञानत्वेनानुमितिहेतुत्वे व्यासंशोसंशयानुमितिवारणाय तदन्यत्व
स्यापि स्यानुमितिजनकतावच्छेदके निवेशनापत्तान्। विशिष्टवैशिष्ट्यावगाहित्वेनैवानुमितिहेतुत्वोपगमादिति तदनंतरमि
तितदनंतरजातत्वमित्यर्थः। विशिष्टवैशिष्ट्यज्ञानं। व्याप्तिविशिष्टे पक्षवैशिष्ट्यावगाहिज्ञानत्वावच्छिन्नं पक्षे वा तृतीयलिंग

ग॰प॰
५६

परामर्शः पक्षे व्याप्तिविशिष्टप्रतियोगिकवैशिष्ट्यज्ञानत्वावच्छिन्नं वाऽनुमितिहेतुरिति शेषः॥ उभयोः पक्षयोस्तुल्यतया पूर्वत्रापरितो
षाभावाद्द्वाकारणमेकत्रानिर्भरसूचकतया व्याचष्टे॥ दीधितौ वेति ननु। पूर्वमेकविधस्यैव परामर्शस्यानुमितिहेतुतायाः प्रतिज्ञा
नत्वादत्र विकल्पे नोभयविधस्य तद्धेतुत्वोपसंहारविरोध इत्यत आह॥ उभयथेत्यभिप्रेततापक्षतेरिति। अनुमितिलक्षणानिर्वा
हादित्यर्थः। यादृशस्य हेतुता तादृशपरामर्शजन्यताया एवानुमितिलक्षणे निवेश्यत्वादिति भावः॥ एवं च पक्षधर्मस्य व्या
प्तिविशिष्टज्ञानमनुमितिहेतुरित्यस्यापि पक्षतावच्छेदकावच्छिन्नविशेष्यकं व्याप्यप्रकारकं व्याप्यवच्छिन्नविशेष्यकं पक्षप्र
कारकं वा ज्ञानमनुमितिहेतुरित्येवार्थः इति नोपक्रमविरोध इत्याशयः। उक्तपरामर्शयोरेकस्मादेवानुमितिर्नान्यस्मादित्यत्र
युक्तिविरहे प्रत्येकरूपावच्छिन्नस्य न जनकत्वं एकतरासंग्राहकत्वादिति मूलोपर्य्यस्वरसं प्रकाशयन् उभयानुगमकं कारणताव

रा॰म॰
५६

च्छेदकमाह वस्तुत इति। अथवा मूलस्थवाकारः समुच्चये तथा च प्रत्येकरूपेण हेतुत्वं निर्विवक्षितमपि तूभयोरनुगतरूपेणै
क्याह वस्तुत इति विनिगमनाविरहेण विनिगमनाभावाद्धेतुभूतयोरुभयोरसंग्राहकत्वेन अतं च तान् विशिष्यजनकतान

वच्छेदकत्वात्॥ इदमत्र बोध्यं। व्याप्यपक्षयोर्वैशिष्ट्यावगाहित्वं न वास्तवं पक्षानुयोगिकं व्याप्यप्रतियोगिकं यद्वैशिष्ट्यं हेतुतावच्छेदकसं
बंधः तदवगाहित्वं भ्रमस्थलासंग्रहात् व्याप्यसाधनावगाहिज्ञानसाधारण्याच्च नापि व्याप्यप्रतियोगिकत्वपक्षानुयोगिकत्वोभयोपरा
गेनातादृशासंसर्गावगाहित्वं संबंधसंसर्गकज्ञानासंग्रहात् संसर्गानुयोगित्वप्रतियोगित्वयोर्विशिष्टबुद्धाविषयत्वात् तत्समूहालं
बनवैलक्षण्यस्य तेन विनैवोपपत्तेः नापि व्याप्यपक्षोभयोपरागेन हेतुतावच्छेदकसंबंधावगाहित्वं तच्च तदुभयनिरूपितहेतुता
वच्छेदकसंबंधीयसंसर्गताकत्वं भ्रमस्थले उभयीयसंसर्गाप्रसिद्धावपि संसर्गतायाविशेष्यविशेषणोभयनिरूपितत्वादिति
नानुपपत्तिरिति एवं सति पर्वतवान् वह्निव्याप्य इति ज्ञानादनुमित्यापत्तेः न च तत्र संयोगरूपहेतुतावच्छेदकसंबंधावच्छिन्नाधा
रत्वं संबंधो न तु संयोगस्तस्योभयनिष्ठतया तादृशबुद्धेरपि भ्रमत्वप्रसंगात् यत्र च संयोगो व्याप्यताघटकसंबंधस्तत्र पक्षे संयोगा
वच्छिन्नाधारतया व्याप्यप्रकारकज्ञाने च संयोगावच्छिन्नाधेयतया पक्षप्रकारकज्ञानाच्चेत्तत एवानुमितिरपि तु संयोगमात्रे
णतदेकतरांशेऽपरप्रकारकज्ञानादेवेति वाच्यं॥ एवमपि यत्राधारत्वादिरेव व्याप्यताघटकसंबंधस्तत्रोक्तज्ञानादनुमित्याप

ग.प.
५७

मेर्दुर्वारत्वात् अथ संयोगो यत्र हेतुतावच्छेदकसंबंधस्तत्रैव व्याप्यपक्षवैशिष्ट्यावगाहित्वेन हेतुतास्वीक्रियते न तु संयोगावच्छि
न्नाधारतादिर्यत्र हेतुतावच्छेदकसंबंधस्तत्रापि तत्तत्तेन संबंधेन हेतुप्रकारकस्य पक्षविशेष्यकपरामर्शस्यैवानुमितिहे
तुतया तादृशपरामर्शत्वस्यैव जनकतावच्छेदकत्वोपगमात् न हि तत्र संयोगावच्छिन्नाधेयतासंबंधेन व्याप्यांशे पक्षप्रका
रकमपि ज्ञाने हेतुः तस्य हेतुतावच्छेदकसंबंधानवगाहित्वात् तद्धेतुत्वे उक्तरूपेण तत्संशयग्रहासंभवाच्चेति चेत्तर्हि संयोगो
यत्र हेतुतावच्छेदकसंबंधस्तत्रापि तेन संबंधेन हेतुप्रकारकपरामर्श एव हेतुर्न तु तेन संबंधेन पक्षप्रकारकोपि तथा
सति यत्संयोगेन हेतुर्विशेषसाध्यशून्योपि द्रव्ये हेतुविशेष्यकद्रव्यप्रकारकयथार्थपरामर्शात्तादृशानुमितिप्रसंगात् तस्य
लिंगपरामर्शविधयाधितार्थविषयकत्वाघवत्तानादिरूपदोषासमवहितत्वाद्भ्रमानुमितेः सर्वानुभवविरुद्धतया दृष्टापत्त्ययो
गात् तथा च तत्राप्युक्तानुगतरूपेण हेतुता न युज्यते इति तथा हेतुत्वं न युक्तापि च साध्यशून्ये हेतुसंयोगसत्त्वे तेन संबं
धेन व्याप्तिरेव बाधितेति कथमुक्तस्थले प्रसंजितभ्रमानुमितिजनकताकस्य परामर्शस्य यथार्थत्वेति वाच्यं हेतुसं

राम
५७

वंधित्वापि हेतुवृत्तिद्रव्ये हेतुसंयोगानुयोगित्वविरहेण तत्र साध्याभावस्य व्याप्यत्वविघटकत्वात् अन्यथा संयोगेन तत्घटादेः तद्घटा
न्यत्वाद्यव्याप्यत्वप्रसंगात् साध्याभाववत्ति तद्घटादौ तद्घटादिसंयोगत्वात्। अत्र वदंति धूमवान्पर्वतः पर्वते धूम इत्यत्रोभय
त्रैव संयोगः संवंधतया भासते न तु संयोगावच्छिन्नाधारत्वाधेयत्वे तथा सति संयोगस्य संवंधताविलोपप्रसंगात् संवंधतादृ
शाज्ञानयोर्विषयतावैलक्षण्येण मिथो वैलक्षण्येपि धूमवान् पर्वतः धूमे पर्वत इत्यनयोः पर्वतवान् धूमः पर्वते धूम इ
त्यनयोश्चाविशेषप्रसंगः तस्माद्धूमवान् पर्वत इत्यत्र पर्वते धूम इत्यत्र च संवंधस्य संवंधविधया धूमे प्रतियोगित्वं पर्वते
चानुयोगित्वं भासत इत्यपेयं धूमे पर्वतः पर्वतवान् धूम इत्यनयोश्च धूमेनुयोगित्वं पर्वते प्रतियोगित्वमिति विशेषः न
च विशेषणस्यानुयोगित्वभाने विशेष्यस्य च प्रतियोगित्वभाने विशेषणविशेष्यभाववैपरीत्यप्रसंगः यतो विशेषणवि
शेष्यत्वेन भासमानवैशिष्ट्यप्रतियोगित्वानुयोगित्वे। अपि तु विषयताविशेषावेवेत्याशयेन उक्तानुगमकरूपस्याकारणता
वच्छेदकत्वमंगीकृतं तथा च व्याप्यांशे संवंधस्य प्रतियोगित्वं पक्षांशे चानुयोगित्वमवगाहमानत्वैव व्याप्यपक्षवैशिष्ट्याव

गाहितेत्तिनकश्चिदतिप्रसंगः इदंतुतत्त्वं। तद्धानयमित्यत्रविशेष्यविशेषणस्यासंयोगएवसंबंधः तथेदमित्यत्रचसंयोगावच्छिन्ना
धेयतामित्येवविशेषः।पशर्मेसंयोगावच्छिन्नाधारत्वंपरत्रसंयोगमात्रंसंबंधइतिवैपरीत्यस्यनप्रसक्तिः विशेष्यसंबंधानुयोगि
तायाः प्रमात्वनियामकतया धूमेपर्वतइत्यादिबुद्धेः प्रमात्वापत्तात् एवंचसंबंधविधयाभासमानसंयोगादेःप्रतियोगित्वा
नुयोगित्वभानस्यप्रामाणिकं एवंचपक्षविशेष्यकपरामर्शएवानुमितिहेतुर्नापरइत्यत्रविनिगमकमपिसुलभं व्याप्यविशे
ष्यकपरामर्शस्यसंयोगावच्छिन्नाधेयतासंसर्गकत्वेनैवहेतुतायावाच्यतया तदपेक्षयापक्षविशेष्यकधियःसंयोगसं
संसर्गकत्वेनहेतुत्वेलाघवादिति हेतुसाध्यसामानाधिकरण्याघटितत्वेनमूलोक्तव्याप्त्यपेक्षया व्यापकत्वस्यलाघवं निरा
करर्तुंव्यापकत्वेपितन्निवेशाद्गुरुतरांकतेऽप्ययेति तत्त्वस्यप्रतियोग्यनधिकरणवृत्तित्वमिति। स्वंवृत्तित्वांतविशेष्यतयावि
वच्छिन्नोभावः स्वप्रतियोग्यधिकरणवृत्तियोयेयेतदन्यत्वस्यविवेशोऽसंयोगिसत्त्वादित्यादावतिव्याप्तिरिति भावः। धर्म्मसा
त्रव्यापकत्वंयेनयेनसंबंधेनयद्यत्कश्चिदपिसंबंध्यंतेनतेनसंबंधेनतत्तत्स्वतियेनयेनसंबंधेनत्वसमवृत्तितेनसंबंधेन

व्यापकत्वं नाहरशोति। प्रतियोग्यनधिकरणवृत्तीत्यर्थः। गगनादेर्हेतुमन्निष्ठस्याभावप्रतियोगित्वमकिंचित्करमित्याह॥ त
दधिकरणेति। तदधिकरणं गगनाद्यधिकरणं। तदभावस्य गगनाद्यभावस्य तद्ध्यादित्यर्थे उक्तापत्तिं वारयति य हेतुसामा
नाधिकरण्येव्यापकताघटकं वाच्यं। न चैवं एवं च वसमाधूमे अस्कतावदिति एवं गगनाद्यभावस्य प्रतियोग्यसमानाधि
करण्यविशेषणोन व्याप्तिः वस्तुगत्या उभयाभावघटितस्य प्रतियोग्यसामानाधिकरण्यस्य गगनाद्यभावसाधारण
तया व्याप्तिवादे दर्शितत्वात्तद्व्यावृत्तिरित्यत उक्तमायात तत्तद्वृत्ति वृत्तिमत्त्वं व्यापकताघटकसंबंधेन संबंधत्वेन
तु तेन संबंधेन हेतुसामानाधिकरण्यपर्यंतमितिशेषः। कश्चित्तु वृत्तिमत्त्वमात्रमित्येव पाय हेतुसाध्ययोर सामानाधि
करण्यज्ञानजनकज्ञानविघटने नैवानुमितिविरोधितच्च तद्देशोपपद्यते यदि तयोः सामानाधिकरण्यज्ञानमनुमिति
जनकं भवतीति शंकते नचैवमिति एवं हेतुसाध्यसामानाधिकरण्यज्ञानस्याहेतुत्वे पक्षधर्मताग्रहे तद्ग्रहदशायां प
रामर्शविरहात् पक्षधर्मतया हेतत्वं च गाहित व्यापकतासानरूपानुमितिकारणविरहेणात द्यापत्त्ययोगात्तद्ग्रहे तद्ग्रह

ग.प.
५९

दशायांसाध्यासमानाधिकरणधर्म्मांतरग्रहस्येवेतिसाध्यासमानाधिकरणतयाविश्चितजलात्वादौपक्षधर्म्मताग्रहस्येवतस्यापिप्र
कृतहेतौपक्षधर्म्मताग्रहस्यापितद्वद्वृत्तित्वस्यतदभावव्याप्तिपर्य्यवसिततयासाक्षादेवानुमितिविरोधित्वात्साध्यवदवृत्ति
तयाधर्म्मांतरस्याग्रहोनसाध्याभावव्याप्तिसेनतद्व्याप्तिविषयकइतितद्विषयधर्मांतरस्यपक्षेग्रहेप्यनुमितिरिष्यतएवेति
यदितदाप्रकृतेपितुल्यमित्याहान्यथेतिएतन्मतेचविरोधःसाध्याभावव्याप्यत्वंअसाधारण्यंवावृत्तित्वंगगनादेरेवानु
कूलतर्कविरहेणसाधारण्यसंदेहादेवशब्दत्वादिकंशब्दादौनित्यत्वादिसाधकमित्यवधेयंअस्मत्हेतौसाध्यवदवृत्तित्व
ग्रहसहितःपक्षधर्म्मताग्रहोविरोधिधर्म्मवत्ताज्ञानविधयासाक्षादनुमितिविरोधितयापिसाध्येहेतुसामानाधिकरण्यग्र
हकालेऽनुमित्यापत्तेर्द्दुर्वारतयासाध्यहेतुसामानाधिकरण्यधीरनुमितिहेतुरवश्यमेववाच्येत्यतआहपर्वतइतिज्ञाने
नतुल्ययोगक्षेमतिप्रथमज्ञानकालेऽनुमित्यनुत्पादेप्याद्यविरोधितयागृह्यमानधर्म्मग्रहस्येवग्राह्यंयद्विरोधितया
गृहीतंतद्धर्मग्रहस्यापनुमितौसाक्षाद्विरोधितयाद्वयोरेवतथात्वंतदनुमित्युपगमेचप्रकृतेप्यनुमितिरिष्यतएवेत्य

राम
५९

र्थः साध्यहेत्वोः समानाधिकरण्यग्रहात् कदाचिदस्तु मित्यनुत्या दास्तु भवेच्छा सामानाधिकरण्यस्य व्याप्यकत्वव्याप्यतया तदग्रह
दशायामसामानाधिकरण्यग्रहस्य व्याप्यकताधीविरोधित्वादिति भावः व्याप्तिव्याप्यकतयोः सामान्याय व्याप्ता वपि साध्यहेतु
सामानाधिकरण्योर्भ्भावइत्तिरां कतेन वेत्यादिना साध्येति साध्यतावच्छेदकावच्छिन्नप्रतियोगिकत्वाभाववत् स्वावच्छिन्नस
मानाधिकरणसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकयावद्भावकत्वमित्यर्थः साध्यतावच्छेदकानवच्छिन्नत्वाव
विच्छिन्नसमानाधिकरणाभावीयसाध्यतावच्छेदकसंबंधावच्छिन्नयावत्प्रतियोगिताकधर्म्मवत्त्वमितितु परमार्थः अतोव
ह्निमान् धूमादित्यादौ हेतुमन्निष्ठस्वसंयोगेन गुणाद्यभावस्य स्वरूपसंबंधावच्छिन्नवह्नित्वावच्छिन्नाभाववस्तम्भनियत्तत्तयात
दभावाभिन्नत्वेऽपि न क्षतिः अभावैक्येऽपि प्रतियोगिताभेदात् यावदर्थस्य लघोर्वैचत्वमाशंक्याह साध्याप्रतियोगिकत्वेतिप्र
त्वापि साध्यतावच्छेदकानवच्छिन्नत्वावच्छेदकस्वविशिष्टसमानाधिकरणाभावासाध्यताप्रतियोगितावच्छेदकसंबंधावच्छि
न्नप्रतियोगितात्वकत्वमिति पर्य्यवसितार्थः अवच्छेदकत्वं चेदं स्वरूपासंबंधात्मकमनतिप्रसक्तत्वनियतत्वमित्यभिमानः वह

गा०प०
९०

श्रीहर्षः संबंधः उभयत्रैव यः कश्चित्संबंधत्वेन संबंधविधया प्रविष्टः। प्रमेयसामान्यसाध्यकस्थले अन्योन्याभावेपि च साध्य
तावच्छेदकावच्छिन्नप्रतियोगिताकत्वप्रसिद्धिरतः संबंधविशेषावच्छिन्नात्यंताभावेति संयोगादिसंबंधावच्छिन्नाभावह
त्यर्थः। प्रथमे गौरवं प्रकाशयति व्यापकत्वांतर्भावेनेति तथा च तदंतर्भावे अवश्यक इति भावः। द्वितीये गौरवं प्रका
शयति प्रमाणाभावेति प्रतियोगितादिभिरेव सममनतिप्रसक्तधर्मस्य स्वरूपसंबंधात्मकावच्छेद्यावच्छेदकभावस्यानुभ
विकत्वादिति भावः। अनतिरिक्तवृत्तित्वपर्यवसायित्वात् अनतिरिक्तवृत्तित्वरूपत्वात् न च व्यापकतायामपि स्वसमाना
धिकरणाभावीयप्रत्येकं किंचित्प्रतियोगित्वाद्यभावमादायातिप्रसंगवारणाय यावत्तदभावकूटोनिवेश्य इति यावत्त्व
निवेशस्यावश्यकत्वात् आह। व्यापकतायामिति। प्रतियोगित्वादेरित्यादिनानिरूढलक्षणघटकतदवच्छेदकत्वपरि
ग्रहः। सामान्याभावस्य तादृशप्रतियोगितावच्छिन्नाभावस्य इदंत्वावच्छिन्नत्वं प्रतियोगित्वे सर्वमत एव स्वरूपसंबंधः
न तु व्यापकत्वं। अन्यथा दर्शितव्याप्तिलक्षणप्रविष्टसाध्यप्रतियोगिकत्वसामान्याभावस्यापि व्यापकतान्तरघटितत्व

राम
९०

याऽगौरवापत्तेरित्याह ॥ संबंधादिनिष्ठेति आदिपदं संबंधांतरावच्छिन्नाभावपरिग्रहार्थकं ॥ संबंधप्रतियोगित्वाभावप्रतियोगि
त्वयोर्वैलक्षण्येऽप्युक्तिप्रसंगस्य दुर्वारताव्यंजकं तस्य सामान्याभावस्य स्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकसाध्य
तावच्छेदककत्वाभिधानेऽपि तादृशसाध्यतावच्छेदकीभूतसंबंधस्याधिकस्य हेतोऽस्याहि भाविषयतायाः प्रकारत्वतावच्छेदके
निवेशनीयतया व्यापकत्वपरामर्शहेतुतागौरवं दुष्परिहरमेवेति भावः । व्यापकसामानाधिकरण्यरूपव्याप्तिधीहेतुता
मतेऽपि व्यापकताप्रदर्शकोदाहरणप्रयोगसंगतेरत एवेत्याशुपदं भासंगतिरत आह ॥ साध्यनेति । ननु वीप्सावशादुद्देश्यध
र्मे धूमादौ विधेयवह्न्यादिमद्व्यावृत्तित्वमेवप्रमीयते । न तु विधेयगतमुद्देश्यधर्मव्यापकत्वमित्युपेयमतो न साध्यावद्व्या
वृत्तित्वसाधनहेतुतामतेऽप्युकोदाहरणासंगतिरित्यत आह ॥ वीप्सेति । वीप्सासमभिव्याहारः । वीप्सितपदसमभिव्याहारः ।
उद्देश्यधर्मः उद्देश्यगतधर्मः स च वीप्सितयत्पदेतरोद्देश्यवाचकपदघटितवाक्योऽग्राह्यो ग्रामो रमणीयरस्यादौ तत्तदे
पस्याऽप्योग्यामत्वादिरूपोद्देश्यतावच्छेदकधर्म एव । यत्पदवीप्सास्थलेऽपि यो यो धूमवानित्यादौ यत्पदार्थैर्विधेयत्वयावि

ग.प.

६१

वच्छितो धूमादिः तस्यापि यत्तत्पदघटितवाक्यद्वयोद्देश्यधर्म्मिसंबन्धितयावच्छिन्नत्वात्॥ अन्योन्याभावघटितव्यापक
तायाल्लघुत्वादन्योन्याभावस्यावश्यमुपादानं प्रतियोगित्वाभावः प्रतियोगितानवच्छेदकावच्छिन्नत्वं। विधेयधर्म्मे विधेयको
टिनिविष्टधर्म्मसत्त्वं धर्म्मीयामीयामोरमणीयः यामीयामोनरमणीयः इत्यादौ यथायोगं हृदिरूढो हेश्यवाचकपदसम
भिव्याहृतपदोपस्थाप्यो विधेयतावच्छेदको रमणीयत्वादिर्विधेयो रमणीयभेदादिश्च यो यो धूमवान् स वह्निमान् स च
जलहृदः इत्यादौ च वीप्सितपदघटितवाक्यसमभिव्याहृततत्पदघटितवाक्यांतरस्थो वह्न्यादिरूपविधेयतावच्छेदकः
ह्रदभेदादिरूपो विधेयश्च विधेयधर्मतद्व्यतिरेकान्योन्याभावप्रतियोगितारूपो यथासंख्यमन्वयः॥ उद्देश्यधर्म्मविधेय
धर्म्मौ वीप्सितपदघटितवाक्यस्योद्देश्यतावच्छेदकविधेयतावच्छेदकाविसयव्यापकस्यावं॥ यो यो धूमवान् स वह्निमा
न् इत्यत्र धूमवह्न्योर्विभिन्नवाक्यस्थयोर्यत्तत्पदार्थांशे विधेयतादृमादेर्वह्न्यादेरुद्देश्यतावच्छेदकत्वविरहात्॥ यत्तु यमत
पदयोस्तात्पर्य्यग्राहकत्वमेव धूमवान् वह्निमानित्यनयोरवेद्देश्यविधेयभावेनान्वय इति॥ तदसुदं यो परछतिसजा

एम

६१

नातीत्यादावाख्यातार्थस्य व्युत्पत्तिविरोधेन धर्म्यानुपस्थित्या च उद्देश्यतावच्छेदकत्वासंभवात् यत्तदाभ्यां विरूपेणोपस्थि
तयोरपि तत्पदेन परामर्शादिति मणिकारलिखनविरोधाच्च॥ एतेन पूर्ववाक्ये वह्निरर्थकं उत्तरवाक्यस्थतत्पदं धूमाव
च्छिन्नपरमित्यपि परास्तं॥ अनुपक्रांतस्य तत्पदेन परामर्शायोगाच्च विधेयधर्मतद्वतोरत्यंतान्योन्याभावाभ्यां यथासंख्य
मन्वयः उद्देश्यधर्मवतीति न तु भासत इत्यनेकांन्वयः॥ धूमवति वह्निमदन्यत्वानधिकरणत्वभानेऽर्थाद्धूमे वन्हिमद्व्याधिकर
णकत्वाभावरूपव्याप्तिलाभस्य संभवतीति न परानभिमतप्रतिक्षेपशंका॥ अत एव वन्हिमाने च धूमवानिति मूलस्यापि सं
गतिः। वह्निमदन्यतादात्म्यव्यवच्छेदकत्वेन धूमवत एव तादृशवाक्यात्प्रतीतेः॥ असंभवादिति विधेयधर्मावाद्यप्रसिद्धेरि
त्यर्थः॥ इदमवधेयं यामो यामौ रमणीय इत्यादौ यामत्वादिव्यापकताविशिष्टाभेदादेरुद्देश्ये रमणीयादिसंबंधतोपग
माद्व्यापकताबोधनिर्वाहः॥ व्यापकत्वस्य पदार्थत्वेन प्रकारत्वायोगात्तानत्वदिरुक्तयामपदं यामव्यापकार्थकं तस्य वा
भेदेन विधेयान्वयः शक्तिग्राहकं तु द्विरुक्तानुशासनमिवेति वाच्यं॥ तथा सत्प्रदेशतयायामादीनामन्वयानुपपत्तेः स्वा

ग॰प॰
६२

तंत्रेणानुपस्थितत्वात् । न चैकतयाश्रयपदमुद्देश्यवाचकमपरं चोक्तार्थकमिति वाच्यं ॥ एकपदस्थले उभयात्मकसमुदायोद्देशात्
पदद्वयस्यैवाभावात् ॥ द्वितीयाद्यर्थकर्मत्वादौ प्रकृत्यर्थस्याधारतयैवान्वयस्य व्युत्पन्नत्वतया ग्रामं ग्रामं ददातीत्यादौ वीप्सित
पदस्य व्यापकार्थकत्वे व्यापकादिकर्मकदानादेः प्रत्ययापत्तेस्थानपोद्देश्यविधेयभावस्थले वीप्सा विनापि उद्देश्यतावच्छेदका
वच्छेदेन विधेयभानात् व्यापकतावोधार्थं वीप्सितपदप्रयोगो व्यर्थ एव यदि व्यापकतायाः न प्रकारतेति वाच्यं उद्देश्यतावच्छेद
कसामानाधिकरण्यमात्रेणापि कश्चिद्विधेयबोधाद्व्यापकत्वपरत्वस्फुटीकरणाय द्विरुक्त्यादरात् ॥ अस्तु वा द्विरुक्तोद्देश्यवा
मपदसमभिव्याहृततरमणीयादिपदस्यैव ग्रामव्यापकरमणीयत्वादिना निरूढलक्षणाया द्विरुक्तोद्देश्यपदसमभिव्याहार
नियतत्वात् द्विर्वचनवैयर्थ्यं ग्रामं ग्रामं ददातीत्यादौ कर्मतादिरूपविधेयवाचकविभक्तेस्तन्न लक्षणासंभव इति सुधिभिर्भक्ति
त्वात् अतस्तत्र व्यापकत्वं संबंध एव दानकर्मतात्वादिना कर्मत्वादेरनुपस्थितावपि तद्रूपावच्छिन्नव्यापकत्वं कर्मत्वादौ ग्रामा
देः संबंधः न तु शुद्धकर्मतात्वावच्छिन्नमतिप्रसंगात् प्रयोगो धूमवान्नरत्यादौ तु वह्न्यादिपदस्य धूमव्यापकवह्नित्वादिना निरू

राम
६२

ढलक्षणाउद्देश्यतावच्छेदकव्यापकतायाएवविधेयसंसर्गघटकतयाभानस्यप्रामाणिकतयापूर्वोक्तयुक्त्याचतत्रधूमादे
रुद्देश्यतावच्छेदकताविरहेणतद्व्यापकतायाःसंसर्गघटकत्वासंभवात्तद्विरुक्तयत्त्वदस्यव्यापकत्वमर्थःतत्प्रतियोगित्वेनधू
मस्यानुयोगित्वेनचवह्नेरन्वयः इतिमल्लापितमतितुच्छंनामार्थयोर्भेदेनान्वयायोगात् यत्त्यदस्यधूमवत्पदसामाना
धिकरण्याभावेसामानान्यतयानउंसकतापत्तेः यत्रयत्रधूमइत्यादौआधारत्वरूपार्थान्वयेनसत्संभवानुपपत्तेश्चद्वि
(ज्ञानिरूढलक्षणेनउद्देश्यतावच्छेदकव्यापकतायाएवसंचत्सकवीसास्थलेव्यापकतायानशाब्दधीः किंतुद्विरुक्तयामा
दिपदाद्वामत्वादिनाउपस्थितेषुसकलयामादिषुद्विरुक्तपदात्पदाच्चमहानसत्वमहानससामान्यत्वादिनाउपस्थितेषुसकल
देनचतेनतेनरूपेणपरामृष्टेषुसकलधूमादिमत्सुविधेयसंबंधःशाब्दात्मतीयतेतावताचकश्चिदपिव्याप्याधिकरणेव्या
पकाभावशंकयाअसंभवात्व्यभिचारज्ञानाभावसहकृतंसहचारदर्शनसत्वाद्नुमानरकालंभावनसएवव्यापकताबोधःस
कृदुच्चरितरत्यादिनियमस्यप्रामाणिकत्वेऽगत्यातस्यसंकोचः। अथताद्दशनियमासत्वेद्विरुक्तिवैयर्थ्यमितिचेतस

प॰मु॰
६३

कत्वव्यक्तिपरत्वग्राहकतमात्रदुपयोगात्तयोपदत्वस्य पदद्वयभ्रमेण महानसचत्वरादिरूपधर्मिद्वयमात्रपरत्वभ्रमसं
भवादतिस्फुटत्वाद्यन्यायातिरिक्तस्थलेतत्पदेनीसाहस्यते एकतत्पदेनापि धर्मिद्वयपरामर्शसंभवान्नन्यानपरत्वे
तत्पदे तरवैयर्थ्यमिति प्रतिसंधाने नतादृशभ्रमनिरतीसंभवात् एकदापाकद्यक्तिप्रत्यापत्तेस्तैवचवीप्सापदार्थः अनुग
पक्षापूर्ममिस्थावीप्सार्त्वाभिमुखैर्विवरणात्त्तु व्यापकत्वप्रत्यायनेष्ठाशुगपदितस्य वैयर्थ्यापत्तेः। योयो धूमवान्नित्य
दौपत्पदार्थव्यापकत्वावोधाच्च स्यादेद्विर्वचनानुपपत्तेश्चेत्पूर्हुः। अत्रव्यापकतायाः शाब्दवोधानुपगमे यत्पदेनम
हानसत्वादिना सकलव्यक्तिषु वन्ह्यादिमत्ववोधेपि धूमादिमत्वेन तेषु वन्ह्याद्यभाववत्वशंकासंभवान्मनसाव्या
पकतानिश्चयः संभवतीत्यनुपपत्तिः समानविषयकत्वमात्रेणविरोधितान्यवस्था पन्नमंतरेणदुर्वारेतिचिंत्यं। साध्या
योगव्यवच्छेदपदेन व्यापकतालाभार्थव्याचष्टे। अयोगइति। अभावप्रतियोगित्वं हेतुमन्निष्ठाभावप्रतियोगित्वं विरोधा
र्थकनञात्तद्धिकरणयोगविरोधिनोऽयोगपदार्थत्वमित्यभिप्रायः। साध्यस्यायोगान्ययेत्वस्थि श्यापकतालाभाद्या

राम
६३

वच्छेदान्वयितया व्याचष्टे। तथा चेति॥ अवच्छेदेनेति॥ व्यापकत्वान्वयिअभेदस्तृतीयार्थः॥ न्यूनतामंगायसाध्यवदन्यावृत्तित्वधी
हेतुतामते केवलान्वय्यनुमानानुपपत्तिदोषमपि दर्शयति। नस्याच्चेति। हेतौ। साध्यप्रतियोगिकाभाववसामानाधिकरण्यरूपव्य
भिचारधियः साध्ये हेतुमन्निष्ठाभावप्रतियोगित्वविषयकत्वया समानविषयकत्वेन विरोधितामते व्यापकताधीविरोधित्वमाव
श्यकमिति हेतुः साध्यव्यभिचारी स्यात्तद्भावनस्तापि युक्तत्वाद्दोषो. धीत्वादिमूलकासंगतिरत आह। एतच्चेति। विरोधस्यापि व्याप
कताधियो व्यापकताधीप्रतिबंधकत्वस्यापि तिरस्कृतत्वं सर्ववादिसिद्धत्वं अभिसंधाय न तु हेतुधर्मिकव्यभिचारधियोऽविरोधि
त्वां अत्रैव हेतुमाह। साध्याभावेति स्वयं समानप्रकारकधियः एव विरोधित्वोपगमादिदं तीति। मूले किमत्र मेयमिति सर्वत्र वा
सत्त्व पक्षीयसाध्यभानमेवानुमानफलमित्यभिमानेन॥ स्मृता व्याप्तिः पक्षतावच्छेदकविशिष्टे साध्यसंबंधमगृहीत्वैव धूमे
ऽवगम्यते॥ पक्षतावच्छेदकानवच्छिन्नेपि पक्षे साध्यसंबंधग्रहादनुमानवैकल्ये वैपरीत्यमेवेत्याह॥ वस्तुतस्त्विति॥ ननु धूम
सामानाधिकरण्यमिति। येन पर्वतीयधूमसामानाधिकरण्यस्य वन्हेर्भानेवास्त्वा धूमाधिकरणपक्षसंबंधस्य तत्र भानमावे

ग.प.
६४

स्यकमितिशंकोन्नेति शेषः मानस एव परामर्श इति योजना सर्वत्र हेतुरिति शेषः अत्र सर्वपदस्यानुमितिसामान्यार्थकत्वेऽसं
गतिः साध्यविशेष्यकस्य परोक्षरूपस्य कदाचिच्चाक्षुषादिरूपस्य च परामर्शस्यानुमितिजनकत्वसंभवादत आह दृ
ष्टितो प्रायिकत्वाभिप्रायेणेति॥ इंद्रियासंनिकृष्टसाध्यकप्रत्यक्षपरामर्शजन्यानुमितिसामान्याभिप्रायेणेत्यर्थः साध्ये
द्रियसंनिकर्षसत्वे प्रत्यक्षतः साध्यसिद्धेः कथं परामर्शेनानुमितिर्जननीयेत्याकांक्षायां तदुपपादकहेतुमाह पक्षइति॥ ज
नकतानइत्यादिनियमे विशेषणद्वयेन व्यभिचारोद्धार आशंकते यद्युभयेति यद्युभयनिरूपितवैशिष्ट्यविषयतावच्छि
न्नस्य जनकताश्रयज्ञानेतयोरेकतरांशे उपसर्जनतयाभानं तस्यान्यतरस्य प्राधान्येन स्वविषयत्वेत्यर्थः दंडी पुरुष इ
तिज्ञाननिरूपितायां पुरुषे दंड इति ज्ञाननिष्ठजनकतायां च दंडपुरुषोभयवैशिष्ट्यविषयिताया अवच्छेदिका अपि तु दंडदंड
त्ववैशिष्ट्यविषयतैवेति पुरुषे दंड इति ज्ञाने दंडोपसर्जनतया भानं तस्यापि पुरुषस्य फलीभूते दंडी पुरुष इति ज्ञाने प्राधान्येन
भानेपि नक्षतिरिति भावः चैत्रानुयोगिकदंडवैशिष्ट्यज्ञानत्वेन दंडविशिष्टचैत्रानुयोगिककुंडलवैशिष्ट्यज्ञानजनके दं

राम
६४

डिचैत्रे कुंडलमिति ज्ञाने कुंडलांशे उपसर्जनतयाभानस्य चैत्रस्य फलीभूतज्ञाने प्राधान्येन ज्ञानात् तयोरेकतरांशे इति दंडा
नुयोगिकसंसर्गत्वविशिष्टवैशिष्ट्यावगाहिज्ञानत्वेन संसर्गदंडवान् पुरुष इति विशिष्टवैशिष्ट्यधीजनके पुरुषे रक्तदंड इति ज्ञाने दंडांशोपसर्जन
तयाभानस्य पुरुषस्य फलीभूतज्ञाने प्राधान्येन भानान्न तदुभयान्यतरस्येति अथैवमपि व्याप्यविशेष्यकपक्षविशेषण
कपरामर्शानन्तरं पक्षविशेष्यकानुमितेरुत्पत्त्या व्यभिचारः यदि च तादृशानुभवे विवदमानस्तत्र साध्यविशेष्यकानुमितिमेव
स्वीकरोति तथापि व्याप्यांशे उपसर्जनतयाजनकज्ञाने भानस्य साध्यस्यानुमितौ प्राधान्येन भानान्नाव्यभिचारो दुर्वार एवं यदि चा
नुमितेः पक्षविशेष्यकत्वनियमानुभवस्य उक्तनियमस्य चानुरोधात् पक्षविशेष्यक एव परामर्शोऽनुमितिहेतुरुच्यते तदापि
यत्र पक्षः सैव हेतुमान् तत्र पक्षांशे उपसर्जनतया भानस्य हेतुरूपपक्षस्यानुमितौ प्राधान्येन भानान्नाव्यभिचारः॥ अभावादि
पक्षकानुमितौ प्राधान्येन भानस्य पक्षस्य साध्याभावादेर्जनकीभूतव्याप्तिज्ञाने प्रतियोगितांशे उपसर्जनतयाभानान्नाव्य
व्यभिचारः॥ एवं दंडिचैत्रे कुंडलमिति ज्ञाने कुंडलांशोपकारीभूतस्य चैत्रस्य तज्जन्ये दंडी चैत्रः कुंडलीति ज्ञाने प्राधान्येन

भानादपि व्यभिचार इति चेत् उपसर्जनविधेयेति सावधारणं। तथा च तदेकतरांशे उपसर्जनतया भातस्येत्यस्य तदेकतरविशे
ष्यतया अभातस्येत्यर्थः। विशेष्यत्वं च साक्षात्परंपरासाधारणं अतो भावादिपक्षकानुमितिजनकपरामर्शे ऽभावादिरू
पपक्षस्य व्याप्त्यंतर्गतप्रतियोगितांशे प्रकारतयैव परंपरया विशेष्यतयापि भानान्न तद्विशेष्यतया अभानवत्त्व
रूपहेतुमत्त्वमिति न व्यभिचारः। न च परामर्शता हेत्वा पक्षस्य परंपरया विशेष्यत्वेपि कारणीभूतव्याप्तिज्ञाने उपसर्ज
नतयैव भानात् व्यभिचारस्य दुर्वारता जनकतानसामान्ये अविशेष्यत्वनिवेशे च व्यापकता परामर्शहेतुतामतेपि क्वचि
त् फलत्वसमूहालंबनरूपज्ञाने पक्षस्य विशेष्यतया तत्र हेतुसत्त्वं दुर्भिक्षमिति वाच्यं। स्वफलोपधायकज्ञानसामान्ये साक्षात्ज
नकयत्किंचित्ज्ञाने वा अविशेष्यत्वस्य विवक्षणात् व्याप्यविशेष्यकपरामर्शश्च नानुमितौ हेतुरित्याशयः। पक्षस्यापि
कता परामर्शे पक्षतावच्छेदकांशे विशेष्यत्वेपि न दुर्भयेत्यानेन पक्षे हेतुमत्यमुपाशाय तदेकतराविशेष्यतया हेतुसत्त्वं सुघटं
न चैवमपि रक्तो दंड इति ज्ञाने विशेषणतयैव भातस्य तज्जन्ये रक्तो दंडवान् पुरुषः रक्तत्वं प्रमेयमित्यादिज्ञाने धान्येन भाना

व्यभिचारइतिवाच्यं। नप्राधान्येनभानमित्यस्य उक्तज्ञानीयप्रकारतारहितत्वेसतीतद्विषयत्वमित्यर्थकत्वात् अन्यथाव्यापकता
परामर्शस्यानुमितिहेतुत्वेपक्षधर्मेति॥ पक्षधर्मसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नाभावस्यज्ञानपक्षधर्म
रासभादिसमानाधिकरणाभावप्रतियोगित्ववतिवह्न्यादौभ्रमानात्मकंनसंभवतीत्यर्थः तथाचतस्यानुमितिहेतुत्वेऽ
भ्रांतस्यनानुमितिस्यादितिभावः तादृशप्रतियोगित्वंप्रतियोगिकत्वेनधूमादिसमानाधिकरणाभावप्रतियोगित्वत्वा
वच्छिन्नाभावज्ञानस्यहेतुतायामुक्तदोषाभावात्तत्रदोषांतरमाह॥ तादृशेतिअवगाहिवेत्यत्रज्ञानमनुषंजनीयंअ
तिप्रसक्तमितिव्यभिचारग्रहदशासाधारणमित्यर्थः पक्षधर्मधूमसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नप्र
तियोगित्वकत्वावगाह्यभावज्ञानत्वेनहेतुतांदूषयतिपक्षधर्मेतितद्वानंअभावावगाहित्वंअव्यापकंसुद्दधूमत्वादि
रूपहेतुतावच्छेदकावच्छिन्नव्यापकताज्ञानासंग्राहकपक्षधर्मधूमत्वावच्छिन्नव्यापकतात्मकाभावाद्धूमत्वावच्छिन्ननि
रूपितव्यापकतात्मकस्यसामान्याभावस्यान्यत्वादितिभावः नचतादृशज्ञानासंग्रहोनदोषायसर्वत्रपक्षीयधूमादिस

मानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नाभावज्ञानादिवानुमितिरूपगंतव्येति वाच्यं ईदृशव्यापकतायाग्रहे यत्र पर्व
तीयधूमस्तत्र वह्निरिति सहचारग्रहस्यापेक्षिततया महानसादौ सहचारदर्शनेनास्या अग्रहीतत्वेन पक्षीयधूमद
र्शनदशायां मुपनयासंभवात्॥ कथंचित् उपनयसंभवेपि पूर्वंगृहीतव्यापकतायां अनुपयोगितापत्तात् तत्ज्ञानादनु
मितिस्वीकारे रनुभवविरोधात्॥ नच पक्षीयधूमत्वावच्छिन्नव्यापकतासम्बन्धावगाह्नवतामपि क्वचिदनुमितुत्पत्त्यात्तद्धेतुत्वे क
थंअनुभवविरोध इति वाच्यं॥ पक्षीयधूमत्वेन पक्षधर्मतावगाहिन एव तादृशव्यापकताघटितव्याप्तिविषयकपरामर्शस्य
मयानुमितिहेतुत्वोपगमात् न रूपेण पक्षधर्मताज्ञानं विना तादृशव्यापकताज्ञानादनुमितेरनुभवविरुधत्वात्॥ यत्तु
धूमसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन पक्षधर्मधूमसमानाधिकरणाभावप्रति
योगित्वत्वेन तादृशाभावप्रतियोगित्वप्रकारकमभावज्ञानमनुमितिरिति तदसत्॥ यादृशधर्मपुरस्कारेण प्रतियोगिनो
ऽभावांशे प्रकारता तादृशस्यैव प्रतियोगितावच्छेदकत्वभानं नं न्यूनेऽधिके वेत्यनुभवेन पक्षीयत्वघटितधर्मप्रकारेण

प्रतियोगिनिभासमाने पक्षीयस्कंधांशं परित्यज्य प्रतियोगितावच्छेदकत्वभानस्यानुभवविरुद्धत्वात् नहि नीलो घटो नास्ती
त्याद्याकारिका कदाचिदपि घटादिसामान्याभाववुद्धिः भावात्ताद्दशप्रतियोगितावच्छेदकत्वभानमनुभवं विरौत्सीत्
तथा च प्रकृतज्ञानस्य ताद्दशज्ञानत्वरूपेणानुमितिहेतुत्वे धूमसमानाधिकरणाभावांशस्य संवंधविधया विषयतायाः
प्रकारत्वेन विषयतायाश्चावच्छेदकतया अनुप्रवेशगौरवं व्याप्यवत्ताधीहेतुतामते च प्रतियोगितासंवंधेन धूमसमा
नाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नप्रकारकत्वस्यैव लाघवेनावच्छेदकत्वात् न चोभयत्वावच्छिन्नप्रतियोगिताकत्वं
संवंधविधया धूमसमानाधिकरणाभावप्रतियोगित्वं च प्रतियोगित्वांशे प्रकारतयावगाहमानां वुद्धिं वारयितुं व्याप्य
परामर्शहेतुतावादिनापि धूमसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नप्रतियोगितासंसर्गकत्वपर्यंतं निवेश्य
मिति कुतो लाघवमिति वाच्यं॥ प्रतियोगितावच्छेदकधर्मावच्छिन्नत्वीयप्रकारागेनैव प्रतियोगितायाः संसर्गतोपगमनो
क्तज्ञानस्यैवासिद्धेः॥ अथ व्यापकताधीहेतुतामतेपि प्रतियोगितासंसर्गकत्वमात्रं निवेश्यं। शुद्धप्रतियोगित्वत्वाद्यवच्छि

ग.प.
१७

न्नप्रतियोगिताकत्वसंसर्गकज्ञानादनुमितिरिष्यत एव उभयत्वाद्यवच्छिन्नप्रतियोगिताकत्वसंबंधेन पक्षीयधूमसमा
नाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नप्रकारकज्ञानं नापि नेष्यते। प्रतियोगित्वप्रकारीभूतो यादृशो धर्मः तदवच्छि
न्नत्वं तद्घटकधर्मावच्छिन्नत्वान्यतररूपेणैव प्रतियोगितायाः संसर्गतोपगमादिति चेत्। माभूदेवं गौरवं तथापि किंचि
दंशपरित्यागेन प्रतियोगिप्रकारीभूतधर्मे प्रतियोगितावच्छेदकत्वपर्याप्त्यवगाहनोपगमे बाधादिबुद्धेः प्रतिबंधकता
यां गौरवेण तस्य हेतुपतया उक्तपरामर्शहेतुत्वासंभवः। तथाहि घटत्वाद्यवच्छिन्नविशिष्टबुद्धिं प्रति घटादिसामान्याभाव
ज्ञानस्य तादृशज्ञानत्वेन न प्रतिबंधकता घटादिसामान्याभावत्वेनाभावात् एवगाहिज्ञानासंग्रहात्। नापि प्रतियोगिता
संबंधेनाभावांशे शुद्धघटत्वाद्यवच्छिन्नप्रकारकज्ञानत्वेन शुद्धघटत्वाद्यवच्छिन्नप्रतियोगिताकत्वसंसर्गकनीलघट
त्वाद्यवच्छिन्नप्रकारकभवभ्रमत्वसिद्धज्ञानासंग्रहात्। नापि शुद्धघटत्वाद्यवच्छिन्नप्रतियोगितासंसर्गेण प्रतियोगिप्रका
रकाभावज्ञानत्वेन शुद्धघटत्वाद्यवच्छिन्नत्वतया तदनवच्छिन्नप्रतियोगितावगाहिभ्रमासंग्रहात्। किंतु संसर्गघटक

राम
१८

तथा घटत्वांशे प्रतियोगितावच्छेदकत्वपर्याप्त्यवगाहिज्ञानत्वेनैव अस्मन्मते प्रतियोगितासंसर्गकघटत्वादिपर्याप्तप्रकारतावच्छे
दकताकज्ञानत्वेन स्वरूपसत्पर्याप्तिनिवेशापेक्षया अवपर्याप्त्यवगाहित्वानिवेशमतेऽनेकविषयतानिवेशाधिक्याद्गौरवमि
ति इदं त्ववधेयं सर्वत्र पक्षीयत्वविशिष्टहेतुनिरूपितव्यापकतापरामर्शादेवानुमितिः तादृशव्यापकतायाः प्रागग्र
हेपि तद्घटकप्रत्येकपदार्थज्ञानादिविशिष्टविषयकोपनीतभानात्मकतद्विषयकपरामर्शस्तु घटः धूमादिसामान्यव्या
पकताग्रह पक्षीयधूमाद्यव्यापकत्वशंकानिरेतद्द्वारा उक्तपरामर्श उपयुज्यत इति समीचीनतया प्रतिभाति ननूक्तव्याप
कताज्ञानवत् स्वर्गकामो यजेतेत्यादिविधिजन्यस्वर्गसाधनताघटकव्यापकतावबोधोपि विनर्कग्रस्त इति भवतामपि तत्र
कागतिः। तथाहि स्वर्गव्यापकत्वं यदि स्वर्गसमानाधिकरणाभावप्रतियोगित्वस्वावच्छिन्नाभाववत्तदा यागत्वावच्छिन्ने तत्त्वा
धः। गंगास्नानादिजन्यस्वर्गस्य यागव्यभिचारित्वात्। नापि स्वर्गसमानाधिकरणाभावप्रतियोगित्वप्रतियोगिकोऽभावः। अति
प्रसक्तस्याद्वित्वाद्यवच्छिन्नतदभावस्यापि तथात्वात्॥ नापि विजातीयस्वर्गसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नाभा

ग.प.
९२

वः। कार्यकारणभावेग्रहीत एव तदन्यथानुपपत्त्या कार्यतावच्छेदकजातिकल्पनात्। प्रथमं मानाभावेन तादृशजात्यनुपस्थित्या तदघ
टितरूपावच्छिन्नाभावस्य विधिना बोधयितुमशक्यत्वादित्यत आह स्वर्गेति। अयं भावः। स्वावच्छेदकक्षणाव्यवहितोत्तरक्षणावच्छि
न्नत्वस्यानुयोग्यनुयोगिकत्वोभयसंबंधेन तद्रूपावच्छिन्नाभावाधिकरणताविशिष्टाधिकरणतानिरूपकतानवच्छेदकत
द्रूपावच्छिन्नत्वनिष्ठान्यथासिद्धिनिरूपकतानवच्छेदकधर्मवत्त्वत्कत्वमेव तद्रूपावच्छिन्नं। तद्रूपावच्छिन्नं तज्जनकत्वं। इदं च
च यागत्वाद्यवच्छिन्नं स्वर्गादिजनकत्वं जन्यतावच्छेदकजातेर्विशेषापरिचयेपि संग्रहं। केवलान्वयिनी स्वरज्ञानादौ एता
दृशकारणत्वासंभवेपि न क्षतिः। परं स्वप्रयोगिकारणताया एव निरूपकत्वात्। अथवा स्वरूपसंबंधविशेष एव का
रणत्वं न त्वनन्यथासिद्धनियतपूर्वसत्वं॥ अन्यथासिद्ध्यभावकूटस्य दुर्ज्ञेयत्वात्। एवं च प्रमाणांतरावेद्यजातिविशेषस्य
यागादिनिष्ठजनकतानवच्छेदकत्वोपगमे विशिष्टजनकतावच्छेदकघटितस्य निरूपकरूपस्य दुर्ग्रहत्वेपि न क्षतिरिति
दिक्॥ ॥ ॥ इति परामर्शग्रंथ समाप्तः॥ ॥ ॥

राम
९८

[OrderDescription]
,CREATED=27.12.19 16:07
,TRANSFERRED=2019/12/27 at 16:31:11
,PAGES=177
,TYPE=STD
,NAME=S0002406
,Book Name=M-2398-NAVPNYAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF

FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF

FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF

FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF

FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF

FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF

FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF

FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF

FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,